# इतिहासपुराणम्

कक्षा ९



नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी-भक्तपुरम्

# इतिहासपुराणम्

कक्षा ९

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
**पाठ्यक्रमविकासकेन्द्रम्**
सानोठिमी–भक्तपुरम्

प्रकाशकः

**नेपालसर्वकारः**

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

**सानोठिमी–भक्तपुरम्**

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति । लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य एकांशस्य वा यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमसंस्करणम् - २०८२

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति। विद्यार्थिषु राष्ट्रं राष्ट्रियतां च प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाऽऽचरणस्य विकासोऽप्यत्वे आवश्यको दृश्यते। अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षेण निर्मितं २०७८ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते। शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति। शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम्। एवं व्यक्तेर्नैतिकाचरणप्रदर्शनाय, सामाजिकसद्भावप्रवर्धनाय, पर्यावरणस्य समुचितप्रयोगशिक्षणाय, दृढशान्तौ प्रतिबद्धतायै च शिक्षाया आवश्यकता समाजेऽवलोक्यते । तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनः, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः। एवं कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते। इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य 'इतिहासपुराणम्' इति विषयकपाठ्यक्रमस्याधारेण नवम्याः कक्षायाः पाठ्यपुस्तकमिदं विकसितं वर्तते ।

इदं पुस्तकं प्रा.डा. ध्रुवप्रसादः भट्टराई, प्रा. नवराजः घिमिरे, डा. नेत्रविनोदः भट्टराई, श्री गणेशप्रसादः तिमिल्सिना, पुरुषोत्तमः घिमिरे-प्रभृतीनां महानुभावानां कार्यदलेन परिमार्जितं सम्पादितञ्चास्ति। अस्य पाठ्यपुस्तकस्य विकासे पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां शिल्पानामनुसरणं कृतमस्ति । अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः युवराजः पौडेल, प्रा.डा. माधवशरण उपाध्यायः, प्रा.डा. आनन्दप्रसादः घिमिरे, प्रा.डा. ऋषिरामः पौडेल, निश्चलः अधिकारी, शिवराजः लामिछाने, राजुः श्रेष्ठ-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते। अस्य चित्राङ्कनं कुलदीपजङ्गबहादुर गुरुङ-इत्याख्येन महानुभावेन रूपसज्जा च भक्तबहादुरः कार्की इत्याख्येन महानुभावेन कृतमस्ति ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राश्च पाठ्यक्रमेण लक्ष्यीकृतान् विषयान् नैकविधस्रोतसां साधनानाञ्चोपयोगेन अध्यापयितुमध्येतुं प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावादध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत उक्तविषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

नेपालसर्वकारः

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

पाठ्यक्रमविकासकेन्द्रम्

# विषयसूची


| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| प्रथमः | पुराणपरिचयः | १ |
| द्वितीयः | पुराणलक्षणम् | ११ |
| तृतीयः | सर्गप्रतिसर्गौ | २० |
| चतुर्थः | मन्वन्तरपरिचयः | २९ |
| पञ्चमः | वंशार्थो वंशानुचरितञ्च | ३८ |
| षष्ठः | आचारस्य महत्त्वम् | ४८ |
| सप्तमः | ब्रह्मचिन्तनस्योपलब्धिः | ५५ |
| अष्टमः | शौचाचारः | ६१ |
| नवमः | दन्तधावनम् | ६७ |
| दशमः | आदिकाव्यप्रणयनम् | ७५ |
| एकादशः | वाल्मीक्याश्रमः | ८४ |
| द्वादशः | नेपालः | ९० |
| त्रयोदशः | पशुपतिः | ९९ |
| चतुर्दशः | आर्याष्टाङ्गमार्गाः | १०८ |
| पञ्चदशः | अशोकस्य नेपालभ्रमणम् | ११८ |

# पुराणपरिचयः

निखिलानां ज्ञानानां धर्माणां च मूलं वेद एव । किन्तु वेदे सूत्ररूपेण निर्दिष्टं ज्ञानं सामान्यानां जनानां कृते दुर्बोधमिव प्रतिभाति । अत एव सामान्यानां जनानां कल्याणाय वेदविहितानामर्थानां प्रकाशाय च वेदव्यासो महाभारतं पुराणानि च रचयामास । एतेषां मुख्यं प्रयोजनं तु वेदविहितस्यार्थस्य सरलव्याख्यानमेव । अत एवोक्तम् -

**इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्** ॥ इति ।

'पुरा भवम्' इत्यस्मिन्नर्थे पुराशब्दात् ट्युप्रत्यये विहिते सति पुराणशब्दो निष्पद्यते । तथैव पुरा अनिति (जीवयति, बोधयति वा) इत्यर्थे पुरा इत्युपपदपूर्वकाद् अन्धातोरचि प्रत्ययेऽपि पुराणशब्दः सिद्ध्यति । अत एवोक्तं पुराणेषु -

**यस्मात् पुरा ह्यनक्तीदं पुराणं तेन कथ्यते** । (वायुपुराणम् १।२०३)

**पुरा परम्परां व्यक्ति पुराणं तेन वै स्मृतम्** । (पद्मपुराणम् १।२।५४)

**यस्मात् पुरा ह्यभूच्चैतत् पुराणं तेन तत् स्मृतम्** । (ब्रह्माण्डपुराणम् १।१।१७३)

एतेषां पर्यालोचनेन पुरातनानामनेकेषां वृत्तान्तानां वर्णनपरका ग्रन्थविशेषाः पुराणपदेनोच्यन्ते इति ज्ञातं भवति ।

तथैव 'इति ह आस' इति इतिहासशब्दस्य व्युत्पत्तिः । पुरावृत्तम् इति चैतस्येतिहासस्यापरं नाम वर्तते । तदुक्तं शुक्रनीतौ-

**प्राग्वृत्तकथनं चैव राज्यकृत्यमिषादितः ।**

**यस्मिन् स इतिहासः स्यात् पुरावृत्तं स एव हि** ॥ (शुक्रनीतिः)

परिक्रिया पुराकल्पश्चेति भेदेन इतिहासो द्विविधो भवति । यत्र एक एव नायको भवति तादृश इतिहासः परक्रियापदेन व्यवह्रियते । यस्मिंश्च वृत्तान्ते बहवो नायका भवन्ति तादृश इतिहासः पुराकल्प इति पदेन निगद्यते ।

संस्कृतवाङ्मये पुराणानाम् इतिहासस्य चोत्तमं स्थानमस्ति । पुराणेतिहासानामध्ययनेन वयं पौरस्त्यसभ्यतायाः वैभवं जानीमः । पुराणेषु यत्रतत्र तीर्थानाम्, स्थानानाम्, राज्यानाम्, राज्ञाम्, साधूनां, सदाचारिणाम् च सम्यग् वर्णनं समुपलभ्यते । एतेषां विस्तृताध्ययनेन प्राचीना भौगोलिकी अवस्थितिः, सामाजिकी व्यवस्था च सम्यग् अवगम्यते । अत एव पुराणानां पर्यालोचनेनास्माकं सभ्यता सुरक्षिता भवति, धर्मरक्षा सुदृढा भवति, सनातनसंस्कृतिश्चोद्बुद्धा भवति । 'इतिहासपुराणानि पञ्चमो वेद उच्यते' इत्युक्त्या इतिहासपुराणानां संस्कृतवाङ्मये वेदानामिव समुन्नतं स्थानमस्तीति ज्ञातं भवति ।

धर्मः, अर्थः, कामः, मोक्षश्चेति चत्वारः पुरुषार्थाः सन्ति । पुरुषार्थानां प्राप्तिरेव मानवजीवनस्य लक्ष्यम् अस्ति । इतिहासस्य पुराणानां चानुशीलनेन पुरुषार्थानां सरलतया प्राप्तिर्भवति । इतिहासे पुराणे च विविधानां कथानां माध्यमेन ज्ञानविज्ञानयोर्विस्तारो विहितो विद्यते । अत एव ज्ञानलाभाय इतिहासपुराणानामध्ययनं नितरामावश्यकं प्रतिभाति ।

सर्वेषामास्तिकदर्शनानां निरूपणं पुराणेषु विहितमस्ति, प्रायेण तत्र विशेषतः साङ्ख्य-योग-वेदान्तदर्शनानां विशेषतो विवेचनं प्राप्यते । अभ्युदयस्य निःश्रेयसस्य च लाभाय मानवै कथमग्रेसरैर्भाव्यम् इति पुराणेष्वेव वर्णनं प्राप्यते । तथैव ज्ञानम्, कर्म, वैराग्यम्, भक्तिः, श्रद्धा, यज्ञः, दानम्, सदाचारः, अहिंसा, मानवधर्मश्चेत्यादयो सदुपदेशाः पुराणेभ्य एवोपलभ्यन्ते ।

तानि च पुराणनि अनेकशो विद्यन्ते । सर्वप्रथमम् अष्टादश महापुराणानि प्रसिद्धानि सन्ति । कूर्मपुराणे तेषां नामनिर्धारणम् एवमुपलभ्यते -

**ब्राह्मं पुराणं प्रथमं पाद्मं वैष्णवमेव च ।**

**शैवं भागवतं चैव भविष्यं नारदीयकम् ॥**

**मार्कण्डेयमथाग्नेयं ब्रह्मवैवर्तमेव च ।**

**लैङ्गं तथा च वाराहं स्कान्दं वामनमेव च ॥**

**कौर्मं मात्स्यं गारुडं च वायवीयमनन्तरम् ।**

**अष्टादशं समुद्दिष्टं ब्रह्माण्डमिति संज्ञितम् ॥** (कूर्मपुराणम्, पूर्वार्द्धम्, १।१३-१५)

एतेषामष्टादशमहापुराणानामुल्लेखः मत्स्यपुराणे, भागवते च दृश्यते। श्रीमद्भागवतमहापुराणस्य द्वादशस्कन्धे त्वष्टादशानां पुराणानां क्रमः, श्लोकसङ्ख्या च निर्दिष्टास्ति -

**ब्राह्मं दश सहस्राणि पाद्मं पञ्चोनषष्टि च ।**

**श्रीवैष्णवं त्रयोविंशच्चतुर्विंशति शैवकम् ॥**

**दशाष्टौ श्रीभागवतं नारदं पञ्चविंशतिः ।**

**मार्कण्डं नव वाह्नं च दशपञ्च चतुःशतम् ॥**

**चतुर्दश भविष्यं स्यात्तथा पञ्चशतानि च ।**

**दशाष्टौ ब्रह्मवैवर्तं लिङ्गमेकादशैव तु ।**

**चतुर्विंशति वाराहमेकाशीतिसहस्रकम् ॥**

**स्कान्दं शतं तथा चैकं वामनं दश कीर्तितम् ।**

**कौर्मं सप्तदशाख्यातं मात्स्यं तत्तु चतुर्दश ॥**

**एकोनविंशत्सौपर्णं ब्रह्माण्डं द्वादशैव तु ।**

**एवं पुराणसन्दोहश्चतुर्लक्ष उदाहृतः ।**

**तत्राष्टादशसाहस्रं श्रीभागवतमिष्यते ॥** (श्रीमद्भागवतमहापुराणम्, १२।१३।४-९)

श्रीमद्भागवतानुसारेण पुराणानां श्लोकसङ्ख्या इत्थमस्ति -

| क्रमः | पुराणनामधेयम् | श्लोकसंख्या |
|---|---|---|
| १ | ब्रह्ममहापुराणम् | १०००० |
| २ | पद्ममहापुराणम् | ५५००० |
| ३ | विष्णुमहापुराणम् | २३००० |
| ४ | शिवमहापुराणम् | २४००० |
| ५ | श्रीमद्भागवतमहापुराणम् | ८००० |
| ६ | नारदीयमहापुराणम् | २५००० |
| ७ | मार्कण्डेयमहापुराणम् | ९००० |
| ८ | अग्निमहापुराणम् | १५४०० |
| ९ | भविष्यमहापुराणम् | १४५०० |
| १० | ब्रह्मवैवर्तमहापुराणम् | १८००० |
| ११ | लिङ्गमहापुराणम् | ११००० |
| १२ | वाराहमहापुराणम् | २४००० |
| १३ | स्कन्दमहापुराणम् | ८११०० |
| १४ | वामनमहापुराणम् | १०००० |
| १५ | कूर्ममहापुराणम् | १७००० |
| १६ | मत्स्यमहापुराणम् | १४००० |
| १७ | गरुडमहापुराणम् | १९००० |
| १८ | ब्रह्माण्डमहापुराणम् | १२००० |



















केषुचन स्थानेषु शिवपुराणस्य स्थाने वायुपुराणस्योल्लेखो विहितो विद्यते । तथा सत्यपि पुराणसङ्ख्यायां श्लोकसङ्ख्यायां च समानता भवति । यतो हि वायुपुराणेऽपि २४००० श्लोका एव सन्ति । वर्णाश्रमव्यवस्थायाः, राजनीतेः, लोकव्यवहारस्य च यथेष्टं वर्णनमष्टादशसु पुराणेषु दृश्यते । नवविधानां भक्तीनाम्, भगवदुपासनाविधेश्च वर्णनं पुराणेषूपलभ्यते ।

एवमनेकैर्गुणराशिभिर्विलसितानां पुराणानां रचयिता खलु महर्षिर्वेदव्यासः । स एव मुनिः प्रथमं वेदस्य चतुर्धा विभागं विधाय तेषामर्थप्रकाशनाय पुराणानि रचयामास । एतस्य महर्षेः सुप्रसिद्धं नाम कृष्णद्वैपायन इत्यपि वर्तते । एतस्य पिता महर्षिः पराशरः, माता च सत्यवती आसीत् । श्रीमद्भागवते उक्तम्-

**पराशरात् सत्यवत्यामंशांशकलया विभुः ।**

**अवतीर्णो महाभागो वेदं चक्रे चतुर्विधम् ॥** (श्रीमद्भागवतम् १।३।४९)

वेदव्यासस्य शुकदेवनामा सुप्रसिद्धः पुत्रो बभूव । स पुराणानां प्रसारं विदधौ ।

पुराणानां विभागोऽनेकेष्वाधारेषु विहितो वर्तते । पद्मपुराणानुसारेण सात्त्विकानि, राजसानि, तामसानि चेति त्रिविधानि पुराणानि सन्ति । विष्णुपुराणम्, नारदीयपुराणम्, श्रीमद्भागवतम्, गरुडपुराणम्, पद्मपुराणम्, वाराहपुराणञ्चेति षट् पुराणानि सात्त्विकानि वर्तन्ते । ब्रह्माण्डपुराणम्, ब्रह्मवैवर्तपुराणम्, मार्कण्डेयपुराणम्, भविष्यपुराणम्, वामनपुराणम्, ब्रह्मपुराणञ्चेति षड् राजसानि पुराणानि अभिमतानि सन्ति । तामसपुराणत्वेन मत्स्यपुराणस्य, कूर्मपुराणस्य, लिङ्गपुराणस्य, शिवपुराणस्य, स्कन्दपुराणस्य, अग्निपुराणस्य च गणना भवति ।



















पुराणेषु न केवलं कथा एव सन्ति, अपि तु तेषां वर्णनक्रमे भूगोलस्य, खगोलस्य च यत्रतत्र उल्लेखो लभ्यते । आधुनिकविज्ञानसम्मता बहवो विषयास्तत्र लभ्यन्ते । साधूनां राज्ञां च चरितस्य, वंशानुचरितस्य च

माध्यमेन राजनीतेः, समाजस्य च विकासः कथमभूदिति सम्यग् ज्ञातुं शक्यते। प्राचीनकालिकी आर्यसंस्कृतिः कीदृशी आसीदिति ज्ञातुं पुराणानि एव प्रमाणभूतानि सन्ति। आध्यात्मिकी समुन्नतिस्तु पुराणानां प्रथमं लक्ष्यमेव।

पुराणानि अष्टादशैव न सन्ति। अष्टादशपुराणेभ्यो भिन्नानि उपपुराणानि, औपपुराणानि च शास्त्रेषु वर्णितानि सन्ति। प्राचीनैर्महर्षिभिः महापुराणान्याधृत्यैव उपपुराणानाम्, औपपुराणानाञ्च रचना विहिता वर्तते। तेषु च उपपुराणेषु क्वचन महापुराणानां कथा विस्तारभयेन सूक्ष्मीकृताः सन्ति, कुत्रचित् परित्यक्ता विद्यन्ते, कुत्रचिच्च चमत्काराय अन्या अपि कथाः समाविष्टा वर्तन्ते। एवं सत्यपि तानि सर्वाणि महापुराणवदेवादरणीयानि, स्पृहणीयानि, मान्यानि, पूज्यानि, श्रद्धास्पदानि च सन्ति। विष्णुपुराणानुसारेण अष्टादशमहापुराणेभ्योऽतिरिक्तानि यानि पुराणानि समुपलभ्यन्ते तानि विभिन्नैर्मुनिभिर्विविधेषु कालेषु ग्रथितानि ज्ञेयानि। स्कन्दपुराणानुसारेण तूपपुराणानि साक्षाद्ब्रह्मणैव प्रोक्तानि सन्ति। विद्वद्भिर्महापुराणवदुपपुराणान्यपि स्वतन्त्रग्रन्थरूपाणि स्वीकृतानि सन्ति।










उपपुराणानां वर्णनपद्धतौ चमत्काराधानाय महान् प्रयासो विहितो विद्यते। महापुराणेषु अनुक्ता अपि बहवो विषया उपपुराणेषु महत्या रोचकशैल्या प्रतिपादिताः सन्ति। उपपुराणानां नामविषये मतैक्यं नास्ति। तथापि अधो निर्दिष्टानि पुराणान्युपपुराणानीति बहुत्र प्रसिद्धिरस्ति -

(१) आदिपुराणम्, (२) नरसिंहपुराणम्, (३) स्कन्दपुराणम्, (४) शिवधर्मपुराणम्, (५) दुर्वासःपुराणम्, (६) नारदीयपुराणम्, (७) कपिलपुराणम्, (८) वामनपुराणम्, (९) औशनसपुराणम्, (१०) ब्रह्माण्डपुराणम्, (११) वरुणपुराणम्, (१२) कालिकापुराणम्, (१३) माहेश्वरपुराणम्, (१४) साम्बपुराणम्, (१५) सौरपुराणम्, (१६) पाराशरपुराणम्, (१७) मारीचपुराणम्, (१८) भास्करपुराणम्।










उपपुराणेषु कमपि देवविशेषमुद्दिश्य तस्य विशदतया वर्णनं लभ्यते । तत्र च स एव देवविशेषः कर्तुमकर्तुमन्यथाकर्तुं समर्थ इति व्याख्यातं भवति प्रायेण । वैष्णवपुराणेषु विष्णोः, शैवपुराणेषु शिवस्य, शाक्तपुराणेषु देव्याः, गाणपत्यपुराणेषु च गणेशस्य चरित्रं विशेषण चित्रितमुपलभ्यते ।

पुराणानामुपपुराणानां वाऽध्ययनेन जनो विविधेषु विषयेषु निपुणो भवति । पुरावृत्तानां माध्यमेन सदाचारशिक्षणाय पुराणानि भृशमुपयोगीनि वर्तन्ते । तथैव इतिहासस्य वर्णनेनापि राजनीतिसमाजशास्त्रधर्मशास्त्रादीनां यथायथं बोधो जायते । अत एव सर्वैरेव पुराणानामितिहासस्य चाध्ययनम्, अनुशीलनं च विधेयम् ।

# अभ्यासः

## १. अतिसङ्क्षेपेण उत्तरयत

(क) श्रीमद्भागवतमहापुराणे कति श्लोकाः सन्ति ?

(ख) पुराणानि कतिविधानि सन्ति ?

(ग) शुकदेवस्य पितुर्नाम किम् ?

(घ वेदव्यासस्य पितरौ कौ ?

(ङ) इतिहासः कतिविधः ?

## २. सङ्क्षिप्तोत्तरं लिखत

(क) अष्टादशमहापुराणानां नामानि लिखत ।

(ख) सात्त्विकपुराणेषु कानि पुराणानि समायान्ति ?

(ग) वराहविष्णुगरुडपुराणेषु प्रतिपुराणं कति श्लोकाः सन्ति ?

(घ) इतिहासशब्दस्य कोऽर्थः ?

(ङ) पुराणशब्दस्य सप्रमाणं व्युत्पत्तिं लिखत ।

## ३. अधो लिखितस्य पाठांशस्य स्वगिरा सारांशं लिखत

इतिहासस्य प्रमुखं लक्ष्यद्वयं भवति - प्रथमं महापुरुषाणां पूर्णपरिचयः, अपरं भूगोलस्य वास्तवं ज्ञानम् । यतो हि पौराणिकस्येतिहासस्य प्रमुखं लक्ष्यमाध्यात्मिकं ज्ञानमेवास्ति । अष्टादशमहापुराणवद् अष्टादशोपपुराणान्यौपपुराणानि च विद्यन्ते । एतेषां निर्माणं महापुराणानामाधारेण जातमस्ति । प्राचीनकालिकैर्विभिन्नैर्मुनिभिरष्टादशानां महापुराणानां छायामाश्रित्यैवोपपुराणानामौपपुराणानाञ्च रचना कृताऽस्ति । विस्तारभियोपपुराणेष्वौपपुराणेषु च क्वचन महापुराणानां कथाः सूक्ष्मीकृताः, कुत्रचित् परित्यक्ताः, कुत्रचिच्च चमत्कारानयनाय विलक्षणानां कथानां समावेशः कृतोऽस्ति । एवं वैशिष्ट्ये जातेऽपि उपपुराणानि महापुराणवदेवादरणीयानि, स्पृहणीयानि, मान्यानि, पूज्यानि, श्रद्धास्पदानि च सन्ति । महापुराणानां परिचयप्रसङ्गे विष्णुपुराण उल्लिखितं विद्यते यद् अष्टादशमहापुराणेभ्योऽतिरिक्तानि यानि पुराणानि समुपलभ्यन्ते तानि विभिन्नैर्मुनिभिः कृतानि ज्ञेयानि । इत्थं महापुराणेभ्यः पृथग् यानि पुराणानि प्राप्यन्ते तानि तेभ्य एव निर्गतानि मन्तव्यानि । स्कन्दपुराणानुसारेण तूपपुराणानि साक्षाद्ब्रह्मणैव प्रोक्तानि सन्ति । विद्वद्भिर्महापुराणवदुपपुराणान्यपि स्वतन्त्रग्रन्थरूपाणि मन्यन्ते ।

## ४. अनुच्छेदं पठित्वा तदनुवर्तिनः प्रश्नान् उत्तरयत

आर्यसंस्कृतौ समाजे वा सृष्टिकालत एव नारीणां महत्त्वपूर्णं स्थानमासीत् । पुराणेषु नारीणां त्रयो विभागा दृश्यन्ते - १. देवीशक्तयः- लक्ष्मी-सरस्वती-पार्वती-दुर्गा इत्यादयः, २. अर्धदेवीशक्तयः- अप्सरा-गान्धर्वकन्या इत्यादयः, ३. सामान्यनार्यः- प्रमा-धूतपापा-कन्दली-अनसूया इत्यादयश्चेति । ता अपि शिक्षाधिकारिण्यो जायन्ते स्म । स्त्रीशिक्षायाः प्रचारो वैदिककालत एव सम्प्राप्यते । ऋग्वेदे मन्त्रद्रष्ट्रीणां नारीणां विदुषीणां नामान्यपि लभ्यन्ते । तासु चेमानि नामानि सन्ति - विश्ववारा, सिकता, निवावरी, अपाला, लोपामुद्रा, ममाता, सूर्या, इन्द्राणी, सर्परञ्जनी इत्यादीनि । अनेन स्पष्टं भवति यत् स्त्रीवर्गोऽपि पुरुषवर्गेण सह समुचितरूपेण मन्त्रान् अधीत्य यज्ञकर्मणि भागं गृह्णाति स्म । श्रौतसूत्रे स्त्रियो धार्मिककर्मणि अन्यस्मिन् पवित्रोत्सवकर्मणि च मन्त्रोच्चारणं कुर्वान्ति स्मेति निरूपितमुपलभ्यते । पुरातनसमये महिलानां स्थानं शिक्षादृष्ट्याऽतीवोच्चतरमासीत् । तथा च धार्मिकादरणीयस्थितौ स्त्रीः साक्षात् शक्तिरूपा बौद्धिकगुरुरूपा स्वयं सरस्वतीरूपा माननीया चासन् ।

उपनिषत्समयेऽपि स्त्रीशिक्षायाः प्रचारो बाहुल्येनासीत् । बृहदारण्यकोपनिषदि याज्ञवल्क्यस्य पत्नी मैत्रेयी गूढदार्शनिकतत्त्वं ज्ञातुं जिज्ञासितवती इत्युल्लिखितं वर्तते, तेन तदा बहुलतया स्त्रीशिक्षा प्रचलिता आसीदिति ज्ञायते । वाचक्नवी गार्गी अपि उपनिषत्समयस्य अपरा नारी विद्यते । सा तत्त्वज्ञानिनो विदेहराजजनकस्य सभायां स्वकीयसूक्ष्मदार्शनिकप्रश्नानां माध्यमेन महर्षियाज्ञवल्क्यमपि मूकीकृतवती । सुलभा-बडवा-प्रतिथेयी-मैत्रेयी-गार्गीप्रभृतयो दर्शनाचार्याः स्वयमपि बहून् दार्शनिकसिद्धान्तान् प्रतिपादितवत्यः । महर्षिणा पतञ्जलिनापि स्वकीयमहाभाष्ये विदुषीणां नारीणां समाजस्योल्लेखो विहितो दृश्यते । पतञ्जलिनोल्लिखितं यत् तस्मिन् समये समाजे विदुषीणां भागद्वयमासीत् - एका उपाध्यायी, अपरा च उपाध्यायानी । उपाध्यायी उपाध्यायस्य कार्यं कृतवती । तस्याः समीपे सम्भवतः सर्वेऽपि स्त्रीपुरुषा अध्येषत । अपरा उपाध्यायस्य पत्नी मन्तव्येति ।

**प्रश्नाः**

(क) आर्यसंस्कृतौ नारीणां स्थानं कीदृशमासीत् ?

(ख) पुराणेषु नारीणां कतिधा विभागो दृश्यते ?

(ग) याज्ञवल्क्यस्य भार्या का ?

(घ) का दर्शनाचार्या स्वयमपि बहून् दार्शनिकसिद्धान्तान् प्रतिपादयामास ?

(ङ) उपनिषत्समये नारीशिक्षायाः प्रचारो कीदृश आसीत् ?

## ५. अधो लिखितमनुच्छेदं पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत

पुरा देवासुरसङ्ग्रामे बलदर्पितैरसुरैरिन्द्रादयो देवा निर्जिताः । ततः शोकसन्तप्तः शक्रो देवगुरुं वाक्पतिं प्रार्थयत् । ततो गुरुस्तपस्तप्तुं तमादिदेश । तदनुसारेण तपसा परितोषितो भगवान् शङ्करः

शक्रमुवाच - "पाकशासन ! पुरा स्वयमहमेव वृक्षमिममरोपयम् । तस्य मूले मन्त्रं जप । अहं तवेप्सितं वरं दास्यामि । इदानीं तस्मिन्नाम्रकानने देवानाहूय असुरैः साकं सङ्ग्रामं कुरुष्व तान् शत्रून् त्वमवश्यं जेष्यसि" इति । ततस्त्रिदशनाथो महेन्द्रस्तत् स्वीकृत्य दैत्यैः सह युद्ध्वा तान् जघान । ततः पुरुहूतस्य शिरसि आकाशात् पुष्पवृष्टिः पपात । तदनन्तरं सफलमनोरथा देवाः स्वं स्वं स्थानं गतवन्तः । एवमयं तिक्तशाको वृक्षः परमप्रसिद्धः । मन्त्रैरुपास्य स्वं स्वं मनोरथमवाप्तुं शक्यते ।

**प्रश्नाः**

(क) शक्रः प्रथमं कं प्रार्थयत् ?

(ख) शङ्करः केन तोषितः?

(ग) भगवान् शङ्करः शक्रं किमुवाच ?

(घ) कस्य शिरसि गगनात् पुष्पवृष्टिः पपात ?

(ङ) सफलमनोरथा देवाः कुत्र गतवन्तः?

(च) परमप्रसिद्धः कः?

(छ) पाकशासनशब्दस्य कोऽर्थः ?

६. **पुराणानामध्ययनेन को लाभः ? विवेचयत ।**

७. **इतिहासपुराणयोः साम्यं वैषम्यञ्च दर्शयत ।**

८. **सात्त्विकराजसतामसभेदेन पुराणानां वर्गीकरणस्य कारणं प्रतिपादयत ।**

द्वितीयः पाठः

# पुराणलक्षणम्

पुराणेषु पुरातनवृत्तान्तानां वर्णनं भवतीति वर्णितमेव। सम्प्रति पुराणस्य लक्षणं वर्ण्यते। पुराणानां प्रकृत्यनुसारेण विद्वांस इत्थं लक्षणं कुर्वन्ति-

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**

**वंशानुचरितं चेति पुराणं पञ्चलक्षणम्॥** (स्कन्दपुराणम् ५।३१।३१)

सर्गः, प्रतिसर्गः, वंशः, मन्वन्तराणि, वंशानुचरितञ्चेति विषयाणां यत्र विशदं वर्णनं लभ्यते तदेव पुराणम्।

तेषु पञ्चसु लक्षणेषु महत्तत्त्वस्य, अहङ्कारस्य, एकादशेन्द्रियाणाम्, पञ्चतन्मात्राणाम्, महाभूतानां च सृष्टिः सर्ग उच्यते। सत्त्वम्, रजः, तमश्चेति त्रयो गुणा भवन्ति। तेषां समष्टिरूपा त्रिगुणात्मिका प्रकृतिः। सा एव प्रकृतिः प्रधानम् इत्यपि उच्यते। साम्यावस्थापन्नायाः प्रकृतेर्गुणेषु यदा क्षोभो जायते तदा महत्तत्त्वमुत्पद्यते। ततश्च क्रमेण अहङ्कारः, पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्चतन्मात्राणि, पञ्चमहाभूतानि चोत्पद्यन्ते। एषा एव प्रथमा सृष्टिः सर्गपदेन व्यवह्रियते। तदुक्तं श्रीमद्भागवते -



**अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः ।**

**भूतमात्रेन्द्रियधियां सम्भवः सर्ग उच्यते** ॥ (भागवतपुराणम् १२।७।११)

प्रतिसर्गस्तु प्रलय एव । पुराणेषु प्रतिसर्गः, प्रलयः, प्रतिसञ्चरः, निरोधः, संस्था इत्यादिभिः शब्दैः प्रलयस्य वर्णनं विहितं लभ्यते । प्रायः सर्वेष्वेव पुराणेषु प्रतिसर्गस्य विवेचनं प्राप्यते । प्रलयश्च प्राकृतिकः, नैमित्तिकः, नित्यः, आत्यन्तिकश्चेति चतुर्विधो भवति ।

ब्रह्मणः सकाशात् सृष्टिर्जायते । ब्रह्मण उत्पन्नानां प्रजापतीनामृषीणां राज्ञाञ्च कुलपरम्पराया वर्णनं वंश उच्यते । पुराणेषु न केवलं तस्मिन् वंशे जातानां जायमानानां वा वर्णनमुपलभ्यते, अपि तु जनिष्यमाणानामपि वर्णनं लब्धुं शक्यते । सूर्य-चन्द्र-भृगु-वसिष्ठ-गौतम-कश्यपादीनां वंशस्य या त्रैकालिकी परम्परा सा एव वंशः । अत एवोक्तं भागवते-

**राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः** । इति ।

दैवराज्ये नानापरिवर्तनकारको विशेषः कालखण्ड एव मन्वन्तरमुच्यते । मनोः, मनुपुत्राणाम्, देवानाम्, इन्द्रस्य, ऋषीणाम्, अंशावताराणाञ्च वर्णनं मन्वन्तरवर्णने भवति । अतो मन्वन्तरं षड्विधमुच्यते -

**मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः ।**

**ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते** ॥ (भागवतपुराणम् १२।७।१५)

वंशवर्णनक्रमे अनेकेषु वंशेषु समुत्पन्नानां महापुरुषाणां चरितस्य विशदं वर्णनं वंशानुचरितमुच्यते । विशेषतोऽत्र मर्त्यलोके समुत्पन्नानामृषीणां राज्ञां च वंशजानां चरितं वर्ण्यते । सृष्टिशृङ्खलायाः, सदाचारादेर्विभागश्च पुराणेषु विधीयते । अत एवोक्तम् –

**वंशानुचरितं तेषां वृत्तं वंशधराश्च ये** । (भागवतपुराणम् १२।७।१६)

सर्वेष्वपि पुराणेषु पञ्चानां लक्षणानां तुल्यतया समावेशो न भवति, किन्तु न्यूनाधिक्येन एते पञ्च विषया अवश्यमेव वर्णिता भवन्ति । कस्मिंश्चन पुराणे वंशस्य, कस्मिंश्चन वंशानुचरितस्य, कस्मिंश्चन मन्वन्तरस्य वा विशेषतो वर्णनं लब्धुं शक्यते, किन्तु अन्येषां विषयाणां सामान्यवर्णनं तु तत्रापि भवत्येव ।

सर्गादिवर्णनस्य माध्यमेन सनातनसंस्कृतेर्महती परम्परा द्योतिता भवति । यद्यपि 'पुराणं पञ्चलक्षणम्' इत्युक्तम्, तथापि श्रीमद्भागवतमहापुराणस्य दश लक्षणानि तस्मिन्नेव ग्रन्थे वर्णितानि सन्ति । यथा-

**अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।**

**मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः** ॥ (भागवतपुराणम् २।१०।१)

| | | |
|---|---|---|
| १. | भूतमात्रेन्द्रियधियां जन्म | - सर्गः |
| २. | पौरुषो ब्रह्मसर्गः | - विसर्गः |
| ३. | वैकुण्ठप्राप्तिः | - स्थानम् |
| ४. | भगवदनुग्रहः | - पोषणम् |
| ५. | कर्मवासनाः | - ऊतयः |
| ६. | अवतारानुचरितम् | - मन्वन्तराणि |
| ७. | नानाख्यानोपबृंहणम् | - ईशानुकथा |
| ८. | आत्मनः शक्तिभिः सह तस्यानुशयनम् | - निरोधः |
| ९. | अन्यथा रूपं हित्वा स्वरूपेण व्यवस्थितिः | - मुक्तिः |
| १०. | परब्रह्म परमात्मा एव | - आश्रयः |

परं श्रीमद्भागवतमहापुराणस्यैव द्वादशस्कन्धे प्रोक्तानि दशलक्षणानां नामानि कतिपयलक्षणेभ्यो भिन्नानि दृश्यन्ते ।

**सर्गोऽस्याथ विसर्गश्च वृत्ती रक्षान्तराणि च ।**

**वंशो वंशानुचरितं संस्था हेतुरपाश्रयः ॥** (भागवतपुराणम् १२।७।९)

**सर्गः-** महत्तत्त्वादारभ्य पञ्चभूतानामुत्पत्तिपर्यन्ता सृष्टिः सर्गपदेन व्यवह्रियते ।

**विसर्गः-** विसर्गस्तु विशिष्टा सृष्टिः । प्रथमं ब्रह्मा परमात्मानुग्रहात् सृष्टिसामर्थ्यं लभते । ततः पूर्वकर्मानुसारेण सदसद्भावप्राधान्येन बीजाद् बीजमिव चराचरात्मकं जगत् सृजति । स एव जगत्प्रवाहो विसर्गः । उक्तं च -

**पुरुषानुगृहीतानामेतेषां वासनामयः ।**

**विसर्गोऽयं समाहारो बीजाद् बीजं चराचरम् ॥** (भागवतपुराणम् १२।७।१२)

**वृत्तिः -** वृत्तिः प्राणिनो जीवननिर्वाहसामग्री । जीवननिर्वाहार्थं चराणां प्राणिनामचराणि भूतानि वृत्तिः । मानवो जीवननिर्वाहार्थं येषां वस्तूनामुपयोगं विधत्ते तान्येव वस्तूनि वृत्तिपदेनाभिधेयानि । स्वभावतः स्वेच्छानुसारेण काश्चन वृत्तयो निश्चिताः काश्चनश्च शास्त्रादेशतो गृहीताः । उभयविधाया वृत्तेरुद्देश्यं मानवजीवनस्य संरक्षणमेवास्ति ।

**वृत्तिर्भूतानि भूतानां चराणामचराणि च ।**

**कृता स्वेन नृणां तत्र कामाच्चोदनयाऽपि वा ॥** (भागवतपुराणम् १२।७।१३)

**रक्षा** - प्रतियुगमीश्वरः पशुपक्षिमनुष्यर्षिदेवतादिरूपेणावतीर्य विविधां लीलां विदधाति। वेदद्विषो निहत्य च धर्मं स्थापयति, तस्यावतारलीला विश्वस्य रक्षार्थमेव भवति।

अतो भगवल्लीलेयं रक्षाशब्देन व्यपदिश्यते।

**रक्षा च्युताऽवतारेहा विश्वस्यानु युगे युगे।**
**तिर्यङ्मर्त्यर्षिदेवेषु हन्यन्ते यैस्त्रयीद्विषः॥** (भागवतपुराणम् १२।७।१४)

**मन्वन्तराणि** - मनुः मनुपुत्रा ऋषयो देवता इन्द्रो विष्णोरंशावतारश्चेत्येवं षड्भिर्विशेषताभिर्युक्तः कालो मन्वन्तरमुच्यते। उक्तञ्च -

**मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः।**
**ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते॥** (भागवतपुराणम् १२।७।१५)

**वंशः** - ब्रह्मणः सकाशादुत्पन्नानां भूतभविष्यद्वर्तमानानां राज्ञामृषीणाञ्च सन्तानपरम्परा वंशः।

**राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः॥** (भागवतपुराणम् १२।७।१६)

**वंशानुचरितम्** - ब्रह्मणः सकाशादुत्पन्नानां त्रैकालिकानां राज्ञामृषीणाञ्च सन्तानपरम्परा, तेषां वंशधराणां चरितचर्चा च वंशानुचरितं कथ्यते।

**वंशानुचरितं तेषां वृत्तं वंशधराश्च ये॥** (भागवतपुराणम् १२।७।१६)

**संस्था** - संस्थाः, प्रलयः, निरोधः, प्रतिसञ्चर एते एकार्थिन एव शब्दाः। नियमानुसारेण सृष्टेरनन्तरं जगतः प्रलयावस्थाऽपि समागच्छति। स्वभावादेव ब्रह्माण्डस्य प्रलयो जायते -

**नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः।**
**संस्थेति कविभिः प्रोक्ता चतुर्धास्य स्वभावतः॥** (भागवतपुराणम् १२।७।१७)

नैमित्तिकप्रलयः, प्राकृतिकप्रलयः, नित्यप्रलयः, आत्यन्तिकप्रलयश्चेति चतुर्विधः प्रलयः। तत्त्वविद्भिः प्रलय एव संस्थेति नाम्नाऽभिधीयते।

**हेतुः** - वस्तुनो जीव एवात्र हेतुशब्देन व्यवह्रियते। यतः स एवादृष्टद्वारा सर्गविसर्गादीनां कर्मणां भवति हेतुः कर्ता। अविद्याविवशो जीवो विविधकर्मकलास्वासक्तो भवति। य एनं च प्रधानतत्त्वदृष्ट्या पश्यन्ति ते तमेवमनुशायिनं प्रकृतौ शयनकर्तारं कथयन्ति। ये चोपाधिदृष्ट्याऽवलोकयन्ति ते तमव्याकृतप्रकृतिरूपं वदन्ति। उक्तञ्च -

**हेतुर्जीवोऽस्य सर्गादिरविद्याकर्मकारकः ।**

**यं चानुशयिनं प्राहुरव्याकृतमुतापरे ॥** (भागवतपुराणम् १२।७।१८)

**आश्रयः** - जाग्रत्स्वप्नसुषुप्त्यवस्थाभ्यः परं तुरीयतत्त्वरूपेण यल्लक्ष्यते, तदेव ब्रह्म अत्र अपाश्रयशब्देन प्रोच्यते । उक्तञ्च -

**व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु ।**

**मायामयेषु तद् ब्रह्म जीववृत्तिष्वपाश्रयः ॥** (भागवतपुराणम् १२।७।१९)

श्रीमद्भागवतमहापुराणस्य द्वितीयस्कन्धे द्वादशस्कन्धे च येषां लक्षणानामुल्लेखो विहितस्तेषां लक्षणानामन्तर्भाव इत्थं कर्तुं शक्यते -

सर्गविसर्गावुभयत्र समानौ स्तः। द्वादशस्कन्धे स्थानशब्दस्य स्थाने वृत्तिपदस्य, पोषणशब्दस्य स्थाने रक्षाशब्दस्य, ऊतिरित्यस्य स्थाने हेतुपदस्य, मन्वन्तरशब्दस्य स्थाने अन्तराणीति पदस्य, ईशानुकथा इत्यस्य स्थाने वंशो वंशानुचरितञ्चेति पदद्वयस्य, निरोध इत्यस्य स्थाने सङ्ख्याशब्दस्य, आश्रयशब्दस्य स्थानेऽपाश्रयशब्दस्य प्रयोगो विहितो विद्यते । तत्र शब्देषु पार्थक्ये सत्यपि अर्थे समानता एव विलोक्यते ।

भागवतस्य दशानां लक्षणानां पुराणानां पञ्चस्वेव लक्षणेष्वप्यन्तर्भावः सम्भवति । तत्र सर्ग-विसर्ग-ऊति-आश्रयापाश्रयाश्च सर्गपदेऽन्तर्भवन्ति । संस्था निरोधश्चेति लक्षणद्वयं प्रतिसर्गशब्देऽन्तर्भवति । अन्तराणि मन्वन्तरं चेति समानमेव । वृत्ति-स्थान-रक्षा-पोषण-ईशानुकथाश्चेति सर्वं वंशवंशानुचरितयोरन्तर्भवन्ति । एतावता 'पुराणं पञ्चलक्षणम्' इति सिद्ध्यति ।

प्राचीनेतिवृत्तानां ज्ञानाय पुराणानि अत्यन्तमावश्यकानि सन्ति । एतेषामध्ययनेन सदाचारस्य, भूगोलस्य, खगोलस्य, युगादीनां च ज्ञानं सम्यगुपजायते । पुराणानि स्वस्यानेकाभिः शैलीभिः वेदस्यार्थस्य सरलतया व्याख्यानं कुर्वन्ति । पुराणगतविषयाणामाधारेण विशेषतः पञ्च लक्षणानि पुराणानां प्रसिद्धानि । श्रीमद्भागवते तु दश लक्षणानि वर्णितानि सन्ति, किन्तु तान्यपि पञ्चस्वेवान्तर्भवन्ति ।

## अभ्यासः

१. **अतिसङ्क्षेपेण उत्तरयत**

(क) सामान्यतया पुराणेषु पुराणानां कति लक्षणानि प्राप्यन्ते ?

(ख) सर्गशब्दस्य कोऽर्थः ?

(ग) प्रलयः कतिविधः ?

(घ) प्रतिसर्गस्य पर्यायवाचिनौ शब्दौ लिखत ।

(ङ) भागवतानुसारेण पुराणलक्षणानि कति सन्ति ?

(च) 'अपाश्रयः' शब्दस्य अर्थं लिखत ।

(छ) भागवतस्य कस्मिन् कस्मिन् स्कन्धे पुराणानां लक्षणं वर्णितम् ?

२. **सङ्क्षेपेण उत्तराणि लिखत**

(क) पुराणलक्षणं किम् ?

(ख) पुराणलक्षणानुसारेण वंशशब्दस्य परिभाषा का ?

(ग) कतिविधानि मन्वन्तराणि ? कानि च तानि ?

(घ) पुराणेषु केषां लक्षणानां वर्णनं प्राप्यते ?

(ङ) श्रीमद्भागवतस्य द्वितीयस्कन्धे प्रोक्तानि दशलक्षणानां नामानि लिखत ।

(च) पञ्चलक्षणे दशलक्षणस्यान्तर्भावः कथं क्रियते ? स्पष्टयत ।

३. **पाठस्थमनुच्छेदं पठित्वा तदनुवर्तिनः प्रश्नान् उत्तरयत** ।

ब्रह्मणः सकाशादुत्पन्नानां नृपतीनामृषीणाञ्च भूत-वर्तमान-भविष्यत्सु कालेषु या कुलपरम्परा सैव वंशः कथ्यते । तथा चोक्तं भागवते - **राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः** । सूर्य-चन्द्र-भृगु-वसिष्ठ-गौतम-कश्यपादयोऽनेके वंशाः पुराणेषु वर्णिताः सन्ति । एतेषामेव वंशानां भूत-वर्तमान-भविष्यत्सु या कुलपरम्परा सैव वंशः । मन्वन्तरं नाम दैवराज्ये नानापरिवर्तनकारकः कालविशेषः । मनोः, मनुपुत्राणाम्, देवानामिन्द्रस्य, ऋषीणामंशावताराणाञ्च घटनाया उल्लेख इति षड्विधं मन्वन्तरं प्रोक्तमस्ति । यथा–

**मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः ।**

**ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते ॥**

तेषु तेषु वंशेषु समुत्पन्नानां विशिष्टानां महापुरुषाणां रुचिरं चरित्रवर्णनं वंशानुचरितमुच्यते । अत्र मर्त्यलोकप्रभवाणां राज्ञां च वंशजा वर्ण्यन्ते ।

**प्रश्नाः**

(क) कीदृशी कुलपरम्परा वंशः कथ्यते ?

(ख) कीदृशाः वंशाः पुराणेषु वर्णिताः ?

(ग) मन्वन्तरशब्दस्य कोऽर्थः ?

(घ) किं नाम वंशानुचरितम् ?

(ङ) वंशानुचरिते केषां वंशजा वर्ण्यन्ते ?

## ४. अधो लिखितमनुच्छेदं पठित्वा निर्दिष्टकार्याणि कुरुत

पुराणवाङ्मये देवतानां नानाविधा गाथा गीयन्ते । तत्र ऋषि-मुनि-देवर्षि-महर्षीणां चारु चरितं गीतमस्ति, पातिव्रत्यपरायणानां सतीनारीणामादर्शजनकं विचित्रमुपाख्यानमपि वर्णितमस्ति, पुण्यश्लोकानां लोकोत्तरचरितानां महापुरुषाणां जीवनचरितञ्च गीयते । तत्र क्रमबद्धप्राचीनेतिहास-काव्य-राजनीति- समाजनीत्याऽऽध्यात्मज्ञान-व्यवहारज्ञान-सामाजिकार्थिकधार्मिकादिव्यवस्थाः, सर्वविधविद्याश्च विद्यन्ते । पुराणसाहित्यमेतादृक् परिपूर्णं वाङ्मयमस्ति येन सामान्यप्राणिन आरभ्य परमोच्चतमान् आदर्शमहापुरुषान् यावत् सर्वेषां यथाधिकारं वास्तवो लाभो भवितुमर्हति । पुराणानां भाषा नितान्तं सुबोधा, सरला, मनोग्राहिणी, प्राञ्जलाऽतिमञ्जुला चास्ति । तत्र वर्णितं तत्त्वज्ञानं सातिशयं सुगमं मनोहारि च वर्तते । प्रसादगुणपूर्णं पुराणसाहित्यं पठतो मानवस्य न तत्र कदाचिद्विरसता जायते परमुत्तरोत्तरमभिरुचिर्जायत एव । नैकशः पठितेऽपि पुराणसाहित्ये उत्तरोत्तररुचिर्वर्धत एव । चिन्ताशीलैर्विचारकैर्निर्विवादं मन्यते यदन्येषां ग्रन्थानामेकवारं द्विवारं वा अध्ययनेन न पुनः पठितुं पाठकानां चित्तमुत्कण्ठते किन्तु न जाने पुराणसाहित्ये कीदृगलौकिकत्वं विद्यते यत् पौनः पुन्येन पुराणानामध्ययने कृतेऽपि माधुर्यमेधमानं सत् पाठकानां मनांसि समाकर्षत्येव । सहस्रवर्षेभ्यो जनाः पुराणपाठं प्रकुर्वते, अपि चैकव्यक्तिरेव बहुवारं पुराणजातमधीते शृणोति च । अथापि तस्य तत्र दैनन्दिनं नूतनत्वं प्रतीयत एव । सदा पल्लविता कल्पलतिकेव प्राचीनोऽपि पुराणराशिर्नवीन एव प्रतिभाति, नैव पुराणत्वमुपगच्छति । पुराणानां सर्वग्राहकत्वं सर्वव्यापकत्वं सकललोकोपकारकत्वञ्चानुपममेवास्ति । वैदिकसनातनधर्मे श्रुतिः स्मृतिः पुराणमिति त्रिविधं प्रमाणं स्वीक्रियेे । तत्र च सर्वे श्रद्दधते । यदि विश्वस्य सामाजिकं विज्ञानं परिशील्येत तर्हि पुराणे तद् यत्र

कुत्रापि व्यासकृपयाऽवश्यं प्राप्येत । आदर्शमयसामाजिकव्यवस्थार्थं पुराणेषु महान् प्रयासः कृतोऽस्ति । पुराणातिरिक्तं सर्वजनोपकारि विवेचनं दुर्लभमस्ति ।

**(क) उत्तराणि लिखत**

(अ) पुराणवाङ्मये केषां नानाविधा गाथाः गीयन्ते ?

(आ) पुराणेषु केषां चारु चरितं गीतमस्ति ?

(इ) पुराणसाहित्यं कीदृशं वाङ्मयमस्ति ?

(ई) पुराणानां भाषा कीदृशी ?

(उ) जनाः कियद्वर्षेभ्यः पुराणपाठं कुर्वाणाः सन्ति ?

**(ख) अनुच्छेदस्य सर्वाधिकं दीर्घं वाक्यं वदत ।**

**(ग) 'व्यासकृपा' इति पदं प्रयुज्य वाक्यमेकं रचयत ।**

**(घ) पुराणभाषाविषये द्वे वाक्ये लिखत ।**

**५. अधो लिखितं गद्यांशं पठित्वा प्रश्नानुत्तरयत**

कदाचिद् भगवान् हरिर्नीलाद्रौ दारुवपुः सन्त्यजेत्, परमेकाम्रकं न त्यजति, तत्र सदा पाषाणनीलया विराजते । शङ्खचक्रगदाधरो हरिः सर्वदा तत्र तिष्ठत्येव । ब्रह्मलोके पितामहो यदेव परमं ब्रह्म जपति तदेव च चतुर्षु शास्त्रेषु प्रसिद्धं तत्र शिलारूपेण तिष्ठति । तत्र यो बिन्दूद्भवे जले स्नात्वा देवस्य दर्शनं कुरुते स जीवन्नेव कृतार्थो भवति । ब्रह्मरूपिणस्तस्य देवस्य मुखपद्मं समालोक्य नरः परं निर्वाणमवाप्नोति । यो नरश्रेष्ठस्तस्याग्रे कृष्ण ! कृष्णेति गायति, भावनादिभक्तबन्धुः पुरुषोत्तमस्तस्मै मुक्तिं प्रयच्छति । यस्तु तच्चरणोदकं पिबति तदालेपनं च कुरुते तस्य बाह्यमाभ्यन्तरं च पापं प्रणश्यति । यो मर्त्यो जनार्दनं दण्डवत्प्रणामं कुरुते तस्याश्वमेधशतोद्भवं पुण्यं जायते । तस्य श्रीवासुदेवस्य लीलया प्रदक्षिणेन पदे पदे सहस्रशो ब्रह्महत्या विलीयन्ते । देवदेवो जनार्दन एकाम्रके वने वासुदेवसंज्ञया तिष्ठति । पाषाणवपुषा सुरनायको भुक्तिं मुक्तिं च ददाति । तस्याग्रे पुरुषोत्तमं ध्यायन् जपन् नरो मुक्तिं गच्छति । विष्णुपरायणः स नरो वैकुण्ठं व्रजति ।

(क) कुत्र पितामहः शिलारूपेण तिष्ठति ?

(ख) कस्य जीवनं कृतार्थो भवति ?

(ग) ब्रह्मरूपिणस्तस्य देवस्य मुखपद्मं समालोक्य नरः किमवाप्नोति ?

(घ) पुरुषोत्तमः कस्मै मुक्तिं प्रयच्छति ?

(ङ) कस्य बाह्याभ्यन्तरं पापं प्रणश्यति ?

(च) अश्वमेधशतोद्भवं पुण्यं कः प्राप्नोति?

(छ) केन कर्मणा सहस्रशो ब्रह्महत्या विलीयन्ते ?

(ज) वासुदेवसंज्ञया जनार्दनः कुत्र तिष्ठति ?

(झ) भगवद्भक्तेर्महत्त्वं वर्णयत ।

(ञ) ज्ञातस्य कस्यचन भगवद्भक्तस्य चरितं चित्रयत ।.

(ट) भगवन्नामसङ्कीर्तनाद् जायमानं वैलक्षण्यं प्रतिपादयत ।

**६. 'पुराणं पञ्चलक्षणम्' इत्यस्मिन् विषये निबन्धं लिखत ।**

**७. पुराणस्य महत्त्वं वर्णयत ।**

**८. पुराणानां पञ्चलक्षणत्वं दशलक्षणत्वं वेति विवेचयत ।**

**९. श्रीमद्भागवतमहापुराणस्य स्कन्धाध्यायश्लोकसङ्ख्यानां विवरणं सङ्कलय्य लघ्वनुच्छेदं लिखत ।**

तृतीयः पाठः

# सर्गप्रतिसर्गौ

जनानां कल्याणाय पुराणेषु नैकविधानां विषयाणामुल्लेखो विहितो विद्यते । किमिदं जगत् ? कुत इदं जगदुत्पद्यते ? कुत्र च विलीनं भविष्यति ? एतस्य सञ्चालनं केन प्रकारेण भवति ? प्रथमं तावत् कथं सृष्टिरारब्धा ? संसारचक्रं कथं निरन्तरं चलति ? इत्यादिविषयाः पुराणेषु वर्णिता विद्यन्ते । अत्र विशेषतः जगतः सृष्टेर्लयस्य च विषये यद् वर्णनमुपलभ्यते तदेव द्वयं सर्गप्रतिसर्गपदाभ्यां लक्ष्यते ।

वेदेषु निर्दिष्टानां सूत्रात्मकानां वाक्यानामर्थबोधः खलु सामान्यानां कृते दुःशकः । तेषां विस्तृतं ज्ञानं तु पुराणैरेव भवति । अतः सृष्ट्यादीनां ज्ञानद्वारा जनो धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु प्रवृत्तो भवति, ज्ञानेन परमपुरुषार्थरूपं मोक्षञ्च लभते इति तेषां ज्ञानं सर्वथा उचितमेव । अत्र च विशेषतः सर्गप्रतिसर्गयोः चर्चा विधीयते । पुराणानामनुसारेण सर्वप्रथमं त्रिगुणात्मिकायाः प्रकृतेर्गुणक्षोभान्महत्तत्त्वमुत्पद्यते । ततश्चाहङ्कार-पञ्चतन्मात्र-पञ्चमहाभूतानां सृष्टिः क्रमेण जायते । एतावती एव सृष्टिः सर्गपदेन व्यवह्रियते ।



श्रीमद्भागवतमहापुराणे प्राकृतसर्गः, वैकृतसर्गः, उभयात्मकसर्गश्चेति त्रिविधस्य सर्गस्य वर्णनं लभ्यते । त्रिविधेष्वपि सर्गेषु प्राकृतसर्गः षड्विधो वैकृतसर्गास्त्रिविध उभयात्मकसर्गश्चैकविधो भवति । एवं सङ्कलने सति सर्गो दशप्रकारको भवति ।

पुराणानामनुसारेण सृष्टेः कारणं खलु प्रकृतिरेव वर्तते । सा च त्रिगुणात्मिका भवति । प्रकृत्याः स्वभावेन स्वत एव यः सर्गो जायते स एव प्राकृतः । स च षड्विधो भवति ।

(क) भगवतः प्रेरणया प्रकृतिस्थेषु सत्त्वादिगुणत्रयेषु यदा क्षोभो जायते तदा महत्तत्त्वस्य सृष्टिर्जायते, स एव प्रथमः ।

(ख) पृथिव्यादीनां पञ्चमहाभूतानामिन्द्रियाणाञ्च सर्गस्य हेतुरहङ्कारः । तस्य सर्गो द्वितीयः ।

(ग) पृथिव्यादीनां पञ्चमहाभूतानां कारणरूपानां पृथिव्यादितन्मात्राणां सर्गस्तृतीयः ।

(घ) ज्ञानकर्मसाधनभूतानामिन्द्रियाणां श्रोत्रादीनां सर्गश्चतुर्थः ।

(ङ) सात्त्विकाहङ्काराद् इन्द्रियाधिष्ठातृदेवानां मनसश्च सर्गः पञ्चमः ।

(च) जीवानां बुद्धेरावरणविक्षेपकारकाणां तामिस्र-अन्धतामिस्र-तमो-मोह-महामोहाख्यानां पञ्चानां ग्रन्थीनां सर्गः षष्ठः ।

प्राकृतसर्गः खलु सकलजगतां कारणभूतो विद्यते । द्वितीयो वैकृतसर्गस्तु त्रिविधो भवति । स च यथा -

(क) षट्प्रकारकाणां वनस्पत्योषधि-लता-त्वक्सार-वीरुद्द्रुमादीनां सर्गः । वनस्पत्यादय एते स्थावरा भवन्ति । एते पृथिव्यामुपरि न सञ्चरन्ति । वनस्पत्यादिषु स्थावरेषु ज्ञानशक्तिः प्रस्फुटा न भवति । एते अन्तःस्पर्शस्यानुभवं कुर्वन्ति, केनचन विशेषगुणेन च सम्पन्ना भवन्ति ।

(ख) पशुपक्षिकीटपतङ्गादीनां तिर्यग्योनीनां सर्गोऽपि वैकारिकः । एते अष्टाविंशतिप्रकारका भवन्ति ।

(ग) मनुष्याणां सर्गोऽपि वैकारिकः । एष एकविध एव । एतेषामाहारप्रवाहः उपरिष्टादधो भवति । एते च मनुष्या विशेषतो रजोगुणप्रधानाः सुखलिप्सवः कर्मपरायणाश्च भवन्ति ।

**अर्वाक्स्रोतस्तु नवमः क्षत्तरेकविधो नृणाम् ।**

**रजोऽधिकाः कर्मपरा दुःखे च सुखमानिनः ॥** ((भागवतपुराणम् ३।१०।२५)

उभयात्मकसर्ग एकविध एव भवति । सनक-सनन्दन-सनातन-सनत्कुमाराणां सर्गः दशमसर्गो निगद्यते । स प्राकृतवैकृतोभयात्मको विद्यते । एतेषां सर्वेषां ज्ञानमधोनिर्दिष्टतालिकाद्वाराऽवगन्तुं शक्यते -




भागवतादन्येषु पुराणेषु तु सर्गस्य नव भेदा उक्ताः सन्ति। त्रयः प्राकृताः सर्गाः। पञ्च वैकृताः सर्गाः। एकः प्राकृत-वैकृतोभयात्मक : सर्गः। एषु प्राकृतसर्गः स्वाभाविकरूपेण भवति। तदर्थं ब्रह्मणः स्वबुद्धेर्व्यापारस्यावश्यकता न भवति अर्थात् प्राकृतसर्गोऽबुद्धिपूर्वको भवति। वैकृतसर्गो बुद्धिपूर्वको जायते। अत्र तु ब्रह्मणा विचारपूर्वकं स्वबुद्धेरुपयोगो विधीयते।

**प्राकृतसर्गस्य त्रयो भेदाः -**

**ब्राह्मसर्गः -** साङ्ख्याचार्यैर्महत्तत्त्वमेव प्रकृतिपुरुषयोः संयोगस्य प्रथमः परिणामः प्रतिपादितः।

श्रीमद्भगवद्गीतानुसारेण ब्रह्मशब्दो हि बुद्धितत्त्वस्यास्ति बोधकः।

**अतो बुद्धिसर्ग एवात्र ब्राह्मसर्गः प्रकीर्तितः** ॥

**भूतसर्गः** - पञ्चतन्मात्राणां सृष्टिर्भूतसर्गः कथ्यते। यतो हि पञ्चतन्मात्रा एव पृथ्वी-जल-तेज-वाय्वाकाशानां पञ्चमहाभूतानामतिसूक्ष्मावस्थाः सन्ति।

**वैकारिकसर्गः** - पञ्च कर्मेन्द्रियाणि, पञ्च ज्ञानेन्द्रियाणि, उभयात्मकं मनश्चेत्येकादशेन्द्रियाणां सृष्टिर्वैकारिकसृष्टिरैन्द्रियसृष्टिर्वा कथ्यते।

**पञ्चप्रकारको वैकृतसर्गः -**

**मुख्यसर्गः** - सृष्टिरचनायाश्चिन्तने क्रियमाणे प्रथमं पञ्चपर्वाऽविद्यारूपेण तमोमय्या सृष्टेराविर्भावो भवति । ततः पश्चाद् बाह्याभ्यन्तरज्ञानशून्यानां जडात्मकानां स्थावराणां सर्गो भवति । एष सर्गो मुख्यसर्गो मन्यते ।

**तिर्यक्सर्गः** - ब्रह्मणा परमात्मनो ध्यानपूर्वकं विहितं मुख्यसर्गं पुरुषार्थसाधकं मत्वा पुनर्ध्यानं कृतं तदा तिर्यग्योनिजीवानामुत्पत्तिर्जाता । अस्या योनेर्जीवा वायुवत् तिर्यग्गत्या चलन्ति । अत्र पशूनां पक्षिणां च समावेशोऽस्ति । अतस्तिर्यक्सर्ग उच्यते ।

**देवसर्गः** - देवानां सृष्टिर्देवसर्गः । अयमूर्ध्वलोकनिवासी सात्त्विकवर्गोऽस्ति । देवा विषयसुखप्रेमाणो बाह्याभ्यन्तरज्ञानसम्पन्ना भवन्ति ।

**मानवसर्गः** - यदा देवसर्गादपि ब्रह्मणस्तावत् सन्तोषो न जातः, यतो हि देववर्गो भोगविलासासक्तत्वात् पुरुषार्थसाधको न जातः । अतः सत्यसङ्कल्पेन ब्रह्मणा पुरुषार्थसाधकोत्तमसर्गार्थं मानववर्गस्य सर्जनं कृतम् ।

**अनुग्रहसर्गः** - प्रकृतेरनुग्रहेणोत्पन्नत्वादयमनुग्रहसर्गः कथ्यते । वायुमार्कण्डेयपुराणानुसारेणायमनुग्रह-सर्गश्चतुर्विधो भवति विपर्यय-शक्ति-शान्ति-तुष्टिभेदात् । तत्र स्थावरेषु विपर्यय, तिर्यग्योनौ शक्तिः, मानुषेषु सिद्धिर्देवेषु च तुष्टिर्विराजते ।

**३. एक एव उभयात्मकसर्गः -**

कौमारसर्गः- प्राकृत-वैकृतोभयात्मकोऽयं सर्गः । अस्मिन् सर्गे सनकादीनां चतुर्णां भ्रातॄणां सृष्टिर्जाता । एते चत्वारो भ्रातरः सृष्ट्यादौ यथोत्पन्नास्तथैवाद्यापि सन्तीत्यत एते कुमारा उच्यन्ते ।

**प्रतिसर्गः**

सर्वेष्वपि पुराणेषु प्रायः प्रतिसर्गस्य विवेचनं प्राप्यते । पुराणेषु प्रतिसर्गस्य स्थानेऽनेके पर्यायवाचिनः शब्दाः प्रयुक्ताः सन्ति । यथा - लयः, प्रलयः, अन्तरप्रलयः, प्रतिसञ्चरः, प्रतिसङ्क्रमः, प्रत्याहारः, सम्भवः, निरोधः, संस्था, एकार्णवावस्था, तत्त्वप्रतिसंयमश्च ।

सर्वेषु पुराणेषु प्रतिसर्गस्य वर्णनमस्त्येव, किन्तु गरुडपुराणे, विष्णुपुराणे, ब्रह्मपुराणे, वायुपुराणे श्रीमद्भागवते, मार्कण्डेयपुराणे, कूर्मपुराणस्योत्तरार्द्धे, ब्रह्माण्डपुराणस्योपसंहारपादे विशेषरूपेण प्रतिसर्गस्य वर्णनं विद्यते ।

वर्तमानसृष्टेः पूर्वसृष्टौ समुत्पन्नानां जीवानामवशिष्टवासनामयैः संस्कारैः पुनःसृष्टिरचनासमयेऽनेके पदार्थास्तद्भोक्तारो जीवाश्च समुत्पद्यन्ते, यथा वर्षर्तौ पृथिव्यामज्ञातरूपेण स्थितानि बीजानि बहुविधलतागुल्मतृणादिरूपेण स्वयं प्रादुर्भवन्ति। नियमानुसारेण सृष्टेरनन्तरं जगतः प्रलयावस्थाऽपि समागच्छति। य उत्पद्यते तस्यावश्यमन्तो भवतीति।

पुराणेषु महत्या वैज्ञानिकपद्धत्या प्रलयस्य (प्रतिसर्गस्य) वर्णनं कृतमस्ति। पुराणानुसारेण प्रलयस्य चत्वारो भेदा भवन्ति। यथा -

**नित्यो नैमित्तिकश्चैव तथा प्राकृतिको लयः।**

**आत्यन्तिकश्च कथितः कालस्य गतिरीदृशी॥** (भागवतपुराणम् १२।४।३८)

१. **नैमित्तिकप्रलयः** - ब्रह्मणो दिवसावसाने नैमित्तिकप्रलयो भवति। ब्रह्मणो दिनं निमित्तीकृत्य जायमानोऽयं प्रलयो नैमित्तिकप्रलयः प्रोच्यते।

२. **प्राकृतिकप्रलयः**- ब्रह्मणो द्विपरार्धस्यायुषः समाप्तौ सप्त प्रकृतयः (महत्तत्त्वमहङ्कारः पञ्चतन्मात्राश्च) स्वकारणेऽव्यक्ते प्रकृतौ सम्प्रलीयन्ते। अयं प्राकृतिकप्रलयः कथ्यते।

३. **नित्यप्रलयः** - प्रतिदिनं निद्रासमये यदा समस्ता सृष्टिरज्ञाने विलीना भवति तदा कस्यापि विशेषस्य भावस्यानुभवो न भवति। एष एव नित्यप्रलयो निगद्यते।

४. **आत्यन्तिकप्रलयः** - मोक्ष एवात्यन्तिकप्रलयः। आत्यन्तिकप्रलयस्य कश्चन कालो निश्चितो नास्ति। आत्यन्तिको दुःखनिवृत्तिरूपो मोक्षः। आत्मस्वरूपस्य साक्षात्कारे जाते आत्यन्तिकप्रलयो भवति।

प्रलयविषये विष्णुपुराणे चोक्तम् -

**ब्राह्मो नैमित्तिकस्तत्र शेतेऽयं जगतीपतिः।**
**प्रयाति प्राकृते चैव ब्रह्माण्डं प्रकृतौ लयम्॥**
**ज्ञानादात्यन्तिकः प्रोक्तो योगिनः परमात्मनि।**
**नित्यः सदैव भूतानां यो विनाशो दिवानिशम्॥** (विष्णुपुराणम् १।७४१-४२)

महापुराणेषु, उपपपुराणेषु, औपपुराणेषु च सर्वत्र प्रायः प्रलयस्य वर्णनं प्राप्यते। दर्शनशास्त्रेष्वपि प्रलयस्यास्तित्वं स्वीकृतमस्ति। प्राचीनैर्नैयायिकैर्द्विविधः प्रलयोऽङ्गीकृतोऽस्ति - खण्डप्रलयो महाप्रलयश्च। नव्यनैयायिकैस्तु केवलं खण्डप्रलयस्यैवास्तित्वं स्वीकृतं विद्यते। साङ्ख्यदृष्ट्याऽपि प्रलयो भवति। साङ्ख्यवादिनः प्रकृतौ द्विविधं परिणामं मन्वते – एकः स्वरूपपरिणामः, द्वितीयो विरूपपरिणामश्च। सत्त्वरजस्तमांसि यदा स्वस्वरूपेऽवस्थितानि भवन्ति तदा स्वरूपपरिणामप्रलयो भवति। तानि यदा विकृतानि भवन्ति तदा तेषु यद् वैषम्यमुपजायते तद् विरूपपरिणामः कथ्यते। विरूपपरिणामादेव सृष्टिर्जायते। एतेषां मतानुसारेण यद्यपि प्रलयस्य सम्यङ्निर्णयो न जायते, तथापि प्रलयस्यास्तित्वंतु स्वीकृतमेव। एषां

विविधरूपाणां प्रलयानां चिन्तनेन विश्वस्य नानानामरूपाणामभावस्य ज्ञानं जायते, पुनर्भावाभावयोराश्रयस्य परमात्मनश्च सम्यगुपलब्धिर्भवितुमर्हति ।

संक्षेपतः सर्गप्रतिसर्गयोर्भेदविषये कथयितुं शक्यते यत् सर्गः- सृष्टिः, प्रतिसर्गः - प्रलयः । सृष्टिप्रक्रिया सर्गः, समस्तविश्वब्रह्माण्डस्य विलयः प्रतिसर्गः प्रोच्यते । परमात्मनः शरीरे ब्रह्मादिसमस्तजगतो विलय एव प्रलयः, प्रतिसञ्चरः प्रतिसर्गो वा कथ्यते ।

## अभ्यासः

### १. अतिसङ्क्षेपेण उत्तरयत

(क) जनः केन परमपुरुषार्थरूपं मोक्षं लभते ?

(ख) पुराणानामनुसारेण महत्तत्त्वं कथमुत्पद्यते ?

(ग) पुराणानामनुसारेण प्राकृतसर्गः कतिविधः ?

(घ) पुराणानामनुसारेण उभयात्मकसर्गः कतिविधः ?

(ङ) भागवतानुसारेण समग्रतः सर्गः कतिविधो भवति ?

(च) भागवतातिरिक्तानामन्येषां पुराणानां मते सर्गस्य कति भेदाः ?

(छ) प्रलयस्य कति भेदा भवन्ति ?

(ज) उभयात्मकसर्गे केषां सृष्टिर्भवति ?

(झ) 'सर्जनम्' इति शब्दस्य कोऽर्थः ?

### २. सङ्क्षेपेण उत्तराणि लिखत

(क) श्रीमद्भागवतानुसारेण प्रथमसर्गस्य वर्णनं कुरुत ।

(ख) तृतीयसर्गः कः तद्वर्णनं विधत्त ।

(ग) मनुष्याणां सर्गः कतमः सर्गः ? स च कतिविधः ?

(घ) केषां सृष्टिः भूतसर्गः ?

(ङ) अनुग्रहसर्गः कतिविधः ?

(च) नित्यप्रलयस्य स्वरूपं किम् ?

(छ) प्राचीनैर्नैयायिकैः कतिविधः प्रलयोऽङ्गीकृतोऽस्ति ?

(ज) साङ्ख्यवादिनां मते प्रकृतेर्द्विविधः परिणामः कः ?

## ३. पाठस्थमनुच्छेदं पठित्वा तदनुवर्तिनः प्रश्नान् उत्तरयत

महापुराणेषु, उपपपुराणेषु, औपपुराणेषु च सर्वत्र प्रायः प्रलयस्य वर्णनं प्राप्यते । दर्शनशास्त्रेष्वपि प्रलयस्यास्तित्वं स्वीकृतमस्ति । प्राचीनैर्नैयायिकैर्द्विविधः प्रलयोऽङ्गीकृतोऽस्ति - खण्डप्रलयो महाप्रलयश्च । नव्यनैयायिकैस्तु केवलं खण्डप्रलयस्यैवास्तित्वं स्वीकृतं विद्यते । साङ्ख्यदृष्ट्याऽपि प्रलयो भवति । साङ्ख्यवादिनः प्रकृतौ द्विविधं परिणामं मन्यन्ते – एकः स्वरूपपरिणामः, द्वितीयो विरूपपरिणामश्च । सत्त्वरजस्तमांसि यदा स्वस्वरूपेऽवस्थितानि भवन्ति तदा स्वरूपपरिणामप्रलयो भवति । तानि यदा विकृतानि भवन्ति तदा तेषु यद् वैषम्यमुपजायते तद् विरूपपरिणामः कथ्यते । विरूपपरिणामादेव सृष्टिर्जायते । एतेषां मतानुसारेण यद्यपि प्रलयस्य सम्यङ्निर्णयो न जायते, तथापि प्रलयस्यास्तित्वं तु स्वीकृतमेव ।

**प्रश्नाः**

(क) प्रलयस्य वर्णनं कुत्र प्राप्यते ?

(ख) दर्शनशास्त्रेष्वपि किं स्वीकृतमस्ति ?

(ग) नव्यनैयायिकाः कीदृशस्य प्रलयस्यास्तित्वं स्वीकुर्वन्ति ?

(घ) विरूपपरिणामस्य परिभाषा का ?

(ङ) विरूपपरिणामात् किं जायते ?

## ४. अधो लिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानुत्तरयत

पुराणं मानवजातेर्हृदयान्धकारस्यापाकरणाय सर्वथा मणितुल्यं प्रकाशकमस्ति । परमतत्त्वदृष्ट्या पुराणं हि नूनमस्ति श्रद्धेयं शास्त्रम् । पुराणेषु विविधैर्भावैर्विभिन्नैर्नामभिर्विविधेभ्योऽधिकारिभ्यो विविधैः प्रकारैः परमपुरुषार्थमवगन्तुमुपायाः प्रदर्शिताः सन्ति । अद्यत्वे पुराणानां सम्यगध्ययनाभावादेव तत्र निर्मूला अनेके आक्षेपा भवन्ति । गभीरतया तदनुसन्धाने क्रियमाणे तेषामाक्षेपाणामनायासेन निराकरणं जायते ।

पुराणानामन्तस्तलं प्रविश्य समीक्षायां विहितायां स्फुटमवगम्यते यत् पुराणेषु देशकालस्थित्यनुसारेण सर्वानुकूलं कर्तव्यमुपदिष्टं वर्तते, येन मानवानां सर्वथा कल्याणमेव जायते। अतः पुराणपारायणशीलैर्विद्वभिरस्माकं महदुपकाराय राष्ट्रसमुन्नतये च पुराणज्ञानराशिर्नूनं प्रसारणीयः प्रचारणीयश्च ।

आर्याणां मार्गप्रदर्शनाय पुराणानि, महाभारतम्, रामायणञ्च सर्वतोऽधिकं साहाय्यं विधातुं शक्नुवन्ति । यतो हि पुराणादीनां भूमिः समस्तं भूमण्डलं वर्तते न च केवलं भारतवर्षमात्रमेव । पुराणव्यवस्थायां सर्वसुखित्वं विराजते । सर्वेषां प्राणिनां विश्वबन्धुत्वस्यादर्शो निहितोऽस्ति, येनान्ताराष्ट्रियसमस्यायाः

समाधानेऽपि पर्याप्तं साहाय्यं भवितुमर्हति । लौकिकविषयाणामिव पारलौकिकविषयाणामपि पुराणेषु पर्याप्तं विवेचनं कृतं विद्यते । यतो हि पुराणानां दृष्टौ न केवलं भारतवर्षस्यापि तु उपर्यधो वर्तमानानां चतुर्दशभुवनानामपि पदार्थाः सम्यग् विवेचिताः सन्ति । एवं सार्वजनीनं हितमुपदेष्टुं प्रवृत्तानां पुराणानां समीक्षा कस्य सचेतसो मानवस्य प्रियकरी कल्याणकरी च न स्यात् ।

**प्रश्नाः**

(क) मानवजातेर्हृदयान्धकारस्यापाकरणाय पुराणशास्त्रं कीदृशम् ?

(ख) परमतत्त्वदृष्ट्या नूनं श्रद्धेयं शास्त्रं किम् ?

(ग) पुराणेषु परमपुरुषार्थमवगन्तुं कीदृशा उपायाः प्रदर्शिताः सन्ति ?

(घ) आक्षेपाणां निराकरणं कथं जायते ?

(ङ) पुराणानामध्ययनेन मानवानां सर्वथा किं जायते ?

(च) अस्माकं पथप्रदर्शनाय कानि शास्त्राण्यधिकं साहाय्यं विधातुं शक्नुवन्ति ?

(छ) केषां विषयाणां पुराणेषु लौकिकविषयाणामिव पर्याप्तं विवेचनं कृतमस्ति ?

## ६. अधो लिखितं गद्यांशमाधृत्य पुराणान्तर्गतानां विषयाणां सूचीं निर्मात

पुराणद्वारा हि निजपूर्वजनानां निर्मलस्य ज्ञानस्य वृत्तमुपगम्यते । अतः पुराणसाहित्यमस्माकं परमं धनं वर्तते । पुराणानां ज्ञानेन विना संसारोऽन्धकारमय एवास्ति । पुराणं भक्तेः सर्वस्वम्, ज्ञानागारम्, मुक्तेर्द्वारम्, कर्मणः प्रदीपप्रज्वालकञ्चास्ति । वस्तुतः सनातनसंस्कृतेः स्वरूपं पुराणेष्वेव सुरक्षितं वर्तते । पुराणेषु कर्म-भक्ति-ज्ञानोपासनादिद्वारा मानवजन्मनः प्रधानलक्ष्यभूताया भगवत्प्राप्तेः साधनं वर्णितमस्ति । सृष्टेरादिकालतः पूर्वजानां विवरणं लोककल्याणनिरतानां मुनीनामृषीणाञ्च पवित्रतममाचरणं तथादर्शभूतानामुदारहृदयानां महापुरुषाणामुज्ज्वलं चरितं चित्रितमस्ति ।

## ७. अधो लिखितं गद्यांशं पठित्वा सारांशं लिखत

सिद्धिनाथस्य दक्षिणे भागे केदारेश्वरोऽस्ति । केदारेश्वरस्थलीं प्राप्य भक्तिपरायणो नरो महेशं पूजयित्वा स्वस्येप्सितं फलमवाप्नोति । सर्वसिद्धिप्रदायको दक्षिणामूर्तिनाम्नाऽयं प्रसिद्धः । अस्य दर्शनेन वाजपेयाश्वमेधयोः फलं भवति । अस्य लिङ्गस्य पश्चिमे उत्तरे च भूभागाः सदा स्रवन्ति, येऽन्तरिक्षं भूर्भुवःस्वर्लोकानि पुनन्ति । यो मानवः शिवपरायणः सन् शिरसि तज्जलं धारयति तस्य केदारेश्वरकृपया दुरितं नश्यति । तस्यां स्थल्यां साधकानां फलप्रदा त्रैलोक्यसुन्दरी देवी अस्ति । सा त्रयाणां जगतां माता गौरीरूपेण संस्थिताऽस्ति । तस्या दर्शनेन लोकनाथः प्रसीदति । मन्त्राणां फलदायिनीं तां देवीं मानवाः समाराधयन्ति, यामुपास्य महीतले नहुषो राजाऽभूत् । सा देवी पुरा

तत्रैव विविक्तं निर्मलजलं केशरसंज्ञकं कुण्डं चकार । बिन्दूद्भवे तनुत्यागात्, सूक्ष्मे पिण्डदानात्, केदारे उदकं पीत्वा च पुर्नजन्म न विद्यते । कृष्णपक्षस्य नवम्यां मूर्ध्नि जलप्रोक्षणेनामितं फलं प्रजायते । तस्मिन् ह्रदे स्नात्वा नरः सर्वं फलं लभते । तत्र दक्षिणदिग्भागे साधकानां फलप्रदं महत् पीठमस्ति । नक्तव्रतं समास्थाय संयतात्मा जितेन्द्रियो मन्त्रं सञ्जप्य त्रयोदशाहेन मन्त्रसिद्धिं प्राप्नोति ।

**८. अन्यपुराणानां मतानुसारेण नवसर्गाणां नामानि लिखत ।**

**९. 'मानवजीवने पुराणानामुपयोगिता' इति विषये निबन्धं लिखत ।**

**१०. शिक्षकस्य साहाय्येन सप्रमाणं सर्ग-प्रतिसर्गयोर्वैषम्यं विवेचयत ।**

चतुर्थः पाठः

# मन्वन्तरपरिचयः

चतुर्दशविद्यासु पुराणानां स्थानं विशेषं वर्तते । वैदिकसाहित्येषु वर्णिताः विषयाः ज्ञातुं दुःशकाः सन्ति, किन्तु पौराणिकसाहित्येषु ते एव विषयाः सुबोधशैल्या वर्णिता उपलभ्यन्ते । त्रिकालदर्शी महर्षिर्वेदव्यासः पुराणेषु सृष्टिप्रक्रियायाः, सृष्टेः, ज्ञानस्य, भक्तेः, वैराग्यस्य कर्मणाञ्च सम्यङ् निरूपणं विहितवान् । मानवानां कल्याणाय सर्वोपयोगिनो विषयाः पुराणेषु यथास्थानं सम्यग् वर्णिताः सन्ति । पुराणानां पञ्चसु लक्षणेषु मन्वन्तरस्याप्युल्लेखो विहितो वर्तते ।

दैवराज्ये नानापरिवर्तनकारकः कालविशेषो मन्वन्तरपदेन ज्ञायते । 'मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः' इति अमरकोशे उल्लेखो दृश्यते । एतेन देवमानेन एकसप्ततियुगानि मन्वन्तरात्मके कालेऽन्तर्भवन्ति । लिङ्गपुराणे चोक्तम् -



**एवं चतुर्युगाख्यानां साधिका ह्येकसप्ततिः ।**

**कृतत्रेतादियुक्तानां मनोरन्तरमुच्यते** ॥ इति ।

मनोः, मनुपुत्राणाम्, देवानाम्, इन्द्रस्य, ऋषीणाम्, अंशावताराणाञ्च परिचयः पुराणेषु वर्णितं भवति । तत्र कस्मिन् मन्वन्तरे को मनुः, के मनुपुत्राः, के देवाः, किन्नामा इन्द्रः, के ऋषयः, के च भगवतोंऽशावताराः ? इति पुराणस्य विविधेषु प्रसङ्गेषु वर्णनं प्राप्यते । अत एवोक्तं भागवते-

**मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः ।**

**ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते** ॥ (भागवतपुराणम् १२।७।१५)

मन्वन्तराणां सम्यग् ज्ञानं विना पुराणेषु वर्णितानां विषयाणां सम्यग् बोधो नैव जायते । पुराणे कतिपयेषु स्थानेषु वर्णितविषया विरुद्धा इव प्रतिभान्ति । तेषां सर्वेषां साधुता मन्वन्तरभेदेन निर्धार्यते । स्वायम्भुवः, स्वारोचिषः, उत्तमः, रैवतः, चाक्षुषः, वैवस्वतश्चेति मनवः सुप्रसिद्धाः सन्ति । पुराणेषु वर्णिता कथा कस्य मन्वन्तरस्येति ज्ञायते चेत् पुराणेषु विरोधो नैव भवति । ऋषीणां राज्ञां वा कालस्य वास्तविकज्ञानार्थं मन्वन्तरज्ञानमपेक्ष्यते ।

एकस्मिन् कल्पे चतुर्दश मनवो भवन्ति । तेषां पत्नीनां सन्ततीनां च सम्यग् वर्णनं पुराणेषु विहितं भवति । पुराणानामनुसारेण सृष्टेः प्रलयपर्यन्तं चतुरब्जादधिको समयावधिः भवति । एतावति महति समये का कथा कदा प्रसृता ? इति ज्ञातुं मन्वन्तरस्य ज्ञानं सर्वथाऽपेक्ष्यते । पुराणेषु या गाथाः, यानि चरितानि, याश्चैतिहासिकघटना वर्ण्यन्ते तासां सर्वासां स्वरूपं समाधियोगेन समधिगम्य त्रिकालदर्शी महर्षिर्व्यासो लोककल्याणाय मन्वन्तराणि वर्णितवान् । पुराणेषु प्रतिपादिता देवपदाधिकारिणां देवानां च गाथा सृष्टिसम्बन्धेनास्माकं कृते परमोपयोगिनी वर्तते ।

कस्यापि मन्वन्तरस्य शास्ता खलु मनुर्भवितुमर्हति । प्रतिमन्वन्तरं मनुः परिवर्तते । यथा कस्मिंश्चिद्देशे शासकानां परिवर्तने जाते बहुविधं परिवर्तनं दृश्यते, तथैव मनोः परिवर्तनेऽपि देवलोके मर्त्यलोके च परिवर्तनानि विलोक्यन्ते । कस्मिन् मन्वन्तरे को देवानां राजा इन्द्रो भवति, के च ऋषयः धर्मोपदेशका भवन्ति, के च पितरो भवन्ति इति निर्धारितं भवति । तेषामुत्तराधिकारिणश्च के इति पुराणानामध्ययनेनैव ज्ञातुं शक्यते ।

प्रतिमन्वन्तरं जीवानां सामर्थ्यम्, ज्ञानं च भिन्नं भवितुमर्हति । मन्वन्तरेषु देवाः कर्मव्यवस्थाम्, ऋषयो ज्ञानव्यवस्थां पितरश्च स्थूलभूतव्यवस्थां सञ्चालयन्ति । यथैकस्मिन् साम्राज्ये सम्राड् माण्डलिकादयश्च कार्यकारिणो भवन्ति, तथैव दैवराज्ये इन्द्रेण सहानेकेषां देवपदाधिकारिणां सम्बन्धो भवति । प्रतिमन्वन्तरं यदा दैवी शृङ्खला परिवर्तते, तदा सृष्टेर्बहवोंऽशाः, देवराजस्था अनेका व्यवस्था अपि परिवर्तनं प्राप्नुवन्ति । अत एव प्रतिमन्वन्तरं ज्ञानस्य, कर्मणश्च तारतम्यं लभ्यते ।

दैवराज्यस्य प्रमुखानि त्रीणि कार्याणि सन्ति, कालव्यवस्था, कर्मशृङ्खला, पदाधिकारिणां सुव्यवस्था चेति । तत्र कालव्यवस्थापको राजा मनुरभिधीयते । कर्मफलस्य व्यवस्थापनाय धर्मराजो नियुक्तो भवति । कर्मव्यवस्थायाः सुसञ्चालनार्थमनेकेषां देवानां नियोजनं विहितं भवति, तेषां सर्वेषां शास्ता देवराज इन्द्रो भवति । मन्वन्तरस्य परिवर्तने देवानां, पितृणाम्, ऋषीणां च सङ्घः परिवर्तते ।

ब्रह्मण एकदिवसात्मकः कालः कल्प उच्यते । एकस्मिन् कल्पे चतुर्दश मन्वन्तराणि, सहस्रतोऽधिकानि महायुगानि च भवन्ति । सत्यत्रेताद्वापरकलियुगानां चतुर्णां युगानामेकं महायुगं भवति । देवानां द्वादशसहस्रवर्षात्मकः कालो महायुगरूपो भवति ।

एकस्मिन् कल्पे चतुर्दश मनवो भवन्तीति सर्वेषु पुराणेषु स्वीकृतमेव । किन्तु मनूनां नाम्नो विषये पार्थक्यं विलोक्यते । विष्णुपुराणानुसारेण चतुर्दशमनूनां नामानि एवं निर्दिष्टानि सन्ति -

(१) स्वायम्भुवमनुः

(२) स्वारोचिषमनुः

(३) उत्तममनुः

(४) तामसमनुः

(५) रैवतमनुः

(६) चाक्षुषमनुः

(७) वैवस्वतमनुः

(८) सावर्णिमनुः,

(९) दक्षसावर्णिमनुः

(१०) ब्रह्मसावर्णिमनुः

(११) धर्मसावर्णिमनुः

(१२) रुद्रसावर्णिमनुः

(१३) रुचिर्मनुः (देवसावर्णिमनुः)

(१४) भौममनुः (इन्द्रसावर्णिमनुः)

सृष्टिकर्ता ब्रह्मा सृष्टेर्विस्ताराय प्रथमं मनसैव मरीच्यादीनां प्रजापतीनां सृष्टिं चकार । तैः सृष्टिचक्रविस्तारम् असम्भवं दृष्ट्वा ध्याननिरतस्य ब्रह्मणः शरीरात् स्त्रीपुरुषौ आविर्भूतौ । तत्र समुत्पन्नः पुरुषः स्वायम्भुवो मनुः, स्त्री च शतरूपा आसीत् । उक्तञ्च भागवते -

**कस्य रूपमभूद् द्वेधा यत् कायमभिचक्षते ।**

**ताभ्यां रूपविभागाभ्यां मिथुनं समपद्यत ॥**

**यस्तु तत्र पुमान् सोऽभून्मनुः स्वायम्भुवः स्वराट् ।**

**स्त्रीर्याऽऽसीच्छतरूपाख्या महिष्यस्य महात्मनः ॥** (भागवत्पुराणम् ३।१२।५२-५३)

मनोः सृष्ट्यनन्तरमेव मैथुनी सृष्टिरारब्धा बभूव । मनोः सन्ततय एव मानवा उच्यन्ते । चतुर्दशसु मनुषु वंशप्रतिष्ठापनदृष्ट्या प्रथमस्य स्वायम्भुवमनोः, सप्तमस्य वैवस्वतमनोश्च नाम विशेषेण उल्लिख्यते । स्वायम्भुवमनोः शतरूपायां पञ्च सन्ततयः समुत्पन्नाः, तासु प्रियव्रतोत्तानपादौ द्वौ पुत्रौ आस्तां तथा आकूतिः, देवहूतिः प्रसूतिश्चेति तिस्रः कन्या आसन् । आकूतेर्विवाहः प्रजापतिना रुचिना सह अभवत्, देवहूतिः कर्दमेन सह विवाहिता चेत् प्रसूतिश्च दक्षप्रजापतेः पत्नी बभूव । एताभिस्तिसृभिः सन्ततिभिः समस्तं जगद् व्याप्तं वर्तते । अग्निपुत्रः स्वारोचिषो द्वितीयो मनुरासीत् । तृतीयश्च उत्तानपादस्य पुत्र उत्तम आसीत् । उत्तमस्यैव भ्राता तामसश्चतुर्थो मनुर्बभूव । तस्य भ्रता रैवतः पञ्चमो मनुरासीत् । चक्षुषः पुत्रश्चाक्षुषः षष्ठो मनुर्बभूव । विवस्वतः (सूर्यस्य) पुत्रः श्राद्धदेव एव सप्तमो वैवस्वतमनुः कथ्यते । सम्प्रति वैवस्वतमन्वन्तरम् एव प्रचलद् वर्तते । अष्टमे सावर्णिके च मन्वन्तरे सूर्यात् छायायां समुत्पन्नः सावर्णिर्मनुर्भविष्यति । तदनु वरुणपुत्रो दक्षसावणिर्नवमो मनुर्भविष्यति । एवमेव उपश्लोकपुत्रो ब्रह्मसावणिर्दशमो मनुर्भविष्यति । एवं क्रमेण धर्मसावर्णिरेकादशः, रुद्रसावर्णिर्द्वादशः, देवसावर्णिस्त्रयोदशः, इन्द्रसावर्णिश्च चतुर्दशो मनुर्भविष्यति । चतुर्युगसहस्रात्मकस्य कालस्य एवमेव गणना विहिता विद्यते ।

मनवः खलु परमप्रभावशालिनो जीवानामधीश्वरा मन्यन्ते । एभिर्मनुभिः खलु सप्तद्वीपा वसुन्धरा रक्षिता भवति । स्वस्वमन्वन्तरेषु एते मनवः समग्रस्यापि लोकस्य पालनं कुर्वन्ति । स्वस्वाधिकारान्निर्गता एते महर्लोकं प्राप्नुवन्ति ।

## अभ्यासः

### १. अतिसङ्क्षेपेण उत्तरयत

(क) आर्याणामितिहासं ज्ञातुं पुराणानां ज्ञानमावश्यकं भवति न वा ?

(ख) एकस्मिन् कल्पे कति मनवो भवन्ति ?

(ग) दैवराज्यस्य प्रधानतया कति कार्याणि सन्ति ?

(घ) कालव्यवस्थापको राजा केन नाम्ना अभिधीयते ?

(ङ) कर्मफलदानेन सह जीवानां नियामकः कः ?

(च) ब्रह्मण एकस्मिन् दिने कति महायुगानि भवन्ति ?

(छ) पञ्चममनोर्नाम किम् ?

### २. सङ्क्षेपेण उत्तरं दत्त

(क) ब्रह्मणः शरीरतः कौ उत्पन्नौ ?

(ख) स्वायम्भुवमनोः शतरूपायां कति पुत्राः, कति पुत्र्यश्च समुत्पन्नाः ? तेषां नामानि लिखत ।

(ग) स्वायम्भुवकन्यानां विवाहः कैः सह जातः ?

(घ) मनुभिः कियत्समयपर्यन्तमियं वसुन्धरा पालिताः ?

(ङ) वैवस्वतमनुः, सावर्णिमनुश्च कस्य पुत्रौ ?

(च) अनेकविधानां देवपदाधिकारिणां प्रतिष्ठापकः कः ?

### ३. पाठस्थमनुच्छेदं पठित्वा प्रश्ननानामुत्तरं दीयताम्

कस्यापि मन्वन्तरस्य शास्ता खलु मनुर्भवितुमर्हति । प्रतिमन्वन्तरं मनुः परिवर्तते । यथा कस्मिश्चिद्देशे शासकानां परिवर्तने जाते बहुविधं परिवर्तनं दृश्यते, तथैव मनोः परिवर्तनेऽपि देवलोके मर्त्यलोके च परिवर्तनानि विलोक्यन्ते । कस्मिन् मन्वन्तरे को देवानां राजा इन्द्रो भवति, के च ऋषयः धर्मोपदेशका भवन्ति, के च पितरो भवन्ति इति निर्धारितं भवति । तेषामुत्तराधिकारिणश्च के इति पुराणानामध्ययनेनैव ज्ञातुं शक्यते ।

प्रतिमन्वन्तरं जीवानां सामर्थ्यम्, ज्ञानं च भिन्नं भवितुमर्हति । मन्वन्तरेषु देवाः कर्मव्यवस्थाम्, ऋषयो ज्ञानव्यवस्थां पितरश्च स्थूलभूतव्यवस्थां सञ्चालयन्ति । यथैकस्मिन् साम्राज्ये सम्राड् माण्डलिकादयश्च कार्यकारिणो भवन्ति, तथैव दैवराज्ये इन्द्रेण सहानेकेषां देवपदाधिकारिणां सम्बन्धो भवति । प्रतिमन्वन्तरं यदा दैवी शृङ्खला परिवर्तते, तदा सृष्टेर्बहवोंऽशाः, देवराजस्था अनेका व्यवस्था अपि परिवर्तनं प्राप्नुवन्ति । अत एव प्रतिमन्वन्तरं ज्ञानस्य, कर्मणश्च तारतम्यं लभ्यते ।

दैवराज्यस्य प्रमुखानि त्रीणि कार्याणि सन्ति, कालव्यवस्था, कर्मशृङ्खला, पदाधिकारिणां सुव्यवस्था चेति । तत्र कालव्यवस्थापको राजा मनुरभिधीयते । कर्मफलस्य व्यवस्थापनाय धर्मराजो नियुक्तो भवति । कर्मव्यवस्थायाः सुसञ्चालनार्थमनेकेषां देवानां नियोजनं विहितं भवति, तेषां सर्वेषां शास्ता देवराज इन्द्रो भवति । मन्वन्तरस्य परिवर्तने देवानां, पितृणाम्, ऋषीणां च सङ्घः परिवर्तते ।

**प्रश्नाः**

(क) प्रतिमन्वन्तरं कः परिवर्तते ?

(ख) प्रतिमन्वन्तरं जीवानां किं किं भिन्नं भवति ?

(ग) दैवराज्ये प्रयुक्तानि कार्याणि कानि ?

(घ) को मनुरभिधीयते ?

## ४. अनुच्छेदं पठित्वा निर्दिष्टकार्याणि कुरुत

यथा दिवसे संसारो भगवता भास्करेण प्रकाशितो भवति, रात्रौ चन्द्रमसा प्रकाशः जायते, गृहान्धकारो दीपेनापनीयते, तथैव परमात्मस्वरूपप्रदर्शनार्थं ज्ञानं तु पुराणवचनैरेव सम्भवितुमर्हति । विविधाभिर्वासनाभिर्भूयो भूयो भवाटव्यामस्यां बम्भ्रम्यमाणानां जीवानां कृते पुराणमस्ति सरल आलोकमार्गः । सर्वशास्त्राणां ज्ञातृत्वेऽपि पुराणज्ञानाभावात् कस्यापि पुरुषस्य विचक्षणत्वं न सम्भवति । धार्मिकसन्देहानां निवृत्तये प्रवृत्तये चाध्यात्मिकपरलोकमार्गे पुराणानामनुशीलनं नितान्तमस्त्यावश्यकम् । यथा वेदा ईश्वरानुग्रहेण पूर्वं ब्रह्मणो हृदि आविर्भूताः, ततो विभिन्नानां महर्षीणां हृदाकाशे प्रकाशिताः, तदनन्तरञ्च मानवसमाजे विस्तृतास्तथैव सर्वतः प्रथमं पुराणविद्या ब्रह्मद्वारैव स्मृता, तदनु देवर्षीणां हृदयेषु प्रस्फुरिता । पश्चात् कथनोपकथनद्वारा मानवेषु प्रसरन्ती महर्षिव्यासद्वारा ब्रह्म-पद्म-विष्णु-भागवतादिपुराणरूपेणोपनिबद्धा सती लोककल्याणं कुरुते । पुराणेतिहासयोर्यज्ञदानतीर्थव्रतोत्सवादीनां वर्णनप्रसङ्गे प्राचीनस्य आर्यसमाजस्य प्रत्यक्षं रूपं दृष्टिगतं भवति । आधुनिकभूगोलशिक्षार्थमपि पुराणानामनुशीलनमत्यावश्यकमस्ति ।

कस्या अपि जातेरुत्थानं पतनञ्च तज्जातीये साहित्येऽवलम्बितं भवति । यस्यां शिक्षायां धर्मस्य स्पर्शो न भवति, तया शिक्षया युवकेषु युवतीषु च सद्गुणानां प्रादुर्भावो न सम्भवति । सुशिक्षाद्वारैव विवेकशीलाया बुद्धेर्विकासो भवति, ज्ञानस्य वृद्धिर्जायते, कर्तव्यपालनस्य रुचिरुत्पद्यते,

ईश्वरीयालौकिकशक्तिषु विश्वासः सम्भवति, स्वधर्मपालने प्रवृत्तिर्भवति, मानवः सदा सत्कर्मसु प्रवर्तते । पुराणद्वारा प्राचीनेतिवृत्त-सृष्टि-प्रलय-वंश-वंशावली-युग-मन्वन्तर-कल्पादीनां सम्यग् ज्ञानमुपजायते । पुराणानामाख्यानोपाख्यानगाथाभिर्वेदानां वास्तवोऽर्थोऽवगन्तुं शक्यते ।

पुराणैः स्वपूर्वजानां निर्मलप्रचारो ज्ञायते । पुराणानुशीलनेनैव विभिन्नजातीनामुत्पत्तिः समस्तस्य विश्वस्य विभिन्नभागानां भिन्ना भिन्ना नियमाश्च ज्ञायन्ते । पुराणेषु विभिन्नाः कथा भिन्नभिन्नदेवतानामुपासका दृश्यन्ते, यतो हि सनातनधर्मिणां विभिन्ना देवता एकस्यैव परब्रह्मणो रूपान्तराणि सन्ति । पुराण-रामायण-महाभारत-तन्त्रशास्त्राणि विश्वकोशरूपाणि सन्ति ।

**(अ) प्रश्नान् उत्तरयत**

(क) दिवसे केन प्रकाशो भवति ?

(ख) गृहान्धकारो केनापनीयते ?

(ग) जीवानां कृते सरल आलोकमार्गः कः ?

(घ) विचक्षणत्वाय किं पठितव्यम् ?

(ङ) पुराणानुशीलनं किमर्थमत्यावश्यकम् ?

(च) प्रथमं वेदानामाविर्भावः कस्य हृदि जातः ?

(छ) आधुनिकभूगोलशिक्षार्थमपि केषां ज्ञानमावश्यकम् ?

(ज) विवेकशीलाया बुद्धेर्विकासः कथं सम्भवति ?

(झ) विभिन्नानां जातीनामुत्पत्तिज्ञानार्थं किं पठितव्यम् ?

**(आ) सन्धिविच्छेदं कुरुत**

अत्यावश्यकम् , दीपेनापनीयते , बुद्धेर्विकासः ,जातीनामुत्पत्तिः ।

**(इ) पञ्चभिर्वाक्यैरुपरि पठितस्यानुच्छेदस्य सारांशं कथयत ।**

## ५. अधो लिखितमनुच्छेदं पठित्वा निर्देशानुसारेण कार्याणि कुरुत

यदा दक्षस्य सत्रे प्रवृत्ते वासवाद्या देवता हविर्भागमभुञ्जन्, परं पूर्ववैरकारणाद् महेश्वरो न पूजितस्तदा पतिं विगर्हितं ज्ञात्वा भर्तुर्भक्तिपरायणा दाक्षायणी सती वह्नौ प्रविवेश । तच्छ्रुत्वा देवो महेश्वरो दक्षयज्ञं वीरभद्रद्वारा व्यनाशयत् । ततो रुद्रस्य भयाद् देवाः पलायन्त । कृत्तिवासा जगन्नाथो नगेश्वरे हिमालये तस्थौ । सापि साध्वी सती हिमवतो मेनायां पुनरुत्पन्ना । कमललोचना सा पार्वती पित्राऽनुमता सती महेश्वरं समाराधयामास । ततः कन्दर्पो ब्रह्मण्यस्य तपस्यतस्तस्य महादेवस्य सम्मुखे उपस्थितां पार्वतीं प्रति बाणान् चिक्षेप । कामेन धनुषि बाणे धृते भगवतः

कृत्तिवाससस्तृतीयनेत्रान्निर्गतो वह्निर्मदनोपरि पपात। इत्थं कामं दग्ध्वा जगद्गुरुर्महादेवस्तां पार्वतीमुपयेमे । ततो हिमालयपर्वते स्थित्वा देवदेवो महेश्वरः पार्वत्या सह यथासुखं विजहार । एवं तत्र हिमालये यथासुखं विहरतोस्तयोरेकदा हिमालयपत्नी मेना पुत्रीं पार्वतीं प्रति प्रोवाच - "उमे ! तव पत्युर्गृहं नास्ति किम् ? एतत्स्थानं युवयोः कृते सुखदं नास्ति । युवां स्वस्थानं गच्छतम् । स्त्रीणां पितृगहे निवासो निन्दनीयः । एतेन लोके निन्दा प्रजायते । अतः श्वसुरगृहे पितृगेहे वा वासो न समुचितः" इति ।

**(अ) प्रश्नान् अतिसङ्क्षेपेण उत्तरयत**

(क) वासवाद्या देवताः कुत्र हविर्भागमभुञ्जन् ?

(ख) किमर्थं सती वह्नौ प्रविवेश ?

(ग) रुद्रभयात् के पलायन्ते स्म ?

(घ) पार्वत्याः मातुर्नाम किम् ?

(ङ) केन मदनो भस्मीकृतः?

(च) बहुदिनपर्यन्तं श्वसुरगृहनिवसनात् किं भवति?

(छ) कृत्तिवाससस्तृतीयनेत्रात् को निर्गतः?

**(आ) अर्थं लिखत**

विगर्हितम्, पलायन्त, यथासुखम्, निन्दनीयः, समुचितः ।

**(इ) क्रियापदानि प्रयुज्य एकैकं मौलिकवाक्यं रचयत**

अभुञ्जन्, प्रविवेश, समाराधयामास, विजहार, गच्छतम्, प्रजायते ।

**(ई) अधो लिखितान् प्रश्नान् सङ्क्षेपेण उत्तरयत**

(क) स्त्रीणां पितृगृहे निवासः समुचितो न वेति तर्कानुपस्थापयत ।

(ख) स्वगिरा सतीदेव्याः प्राणत्यागप्रसङ्गं वर्णयत ।

(ग) दक्षयज्ञविध्वंसप्रसङ्गात् समाजः कीदृशीं शिक्षां लभते ? विवृणुत ।

**६. चतुर्दशमनूनां नामानि क्रमेण लिखत ।**

**७. मन्वन्तरज्ञानेन पुराणविषयस्य छात्रैः प्राप्तव्यं लाभं वर्णयत ।**

**८. निम्नाङ्कितौ श्लौकौ सस्वरं श्रावयत**

(क) कस्य रूपमभूद् द्वेधा यत् कायमभिचक्षते ।

तान्यां रूपविभागाभ्यां मिथुनं समपद्यत ॥

(ख) यस्तु तत्र पुमान् सोऽभून् मनुःस्वायम्भुवः स्वराट् ।

स्त्रीर्याऽऽसीच्छतरूपाख्या महिष्यस्य महात्मनः ॥

**९. श्लोकोऽयं पूरणीयः**

मन्वन्तरं मनुर्देवा................................................... ।

**१०. मन्वन्तरस्य ज्ञानस्य परमावश्यकत्वं सोदाहरणं विवेचयत ।**

**११. शिक्षकं परिचितं गुरुं विज्ञं वा सम्पृच्छ्यानुष्ठानादिषूच्चार्यमाणे सङ्कल्पवाक्ये मन्वन्तरस्याप्युच्चारणस्य कारणं लिखत ।**

पञ्चमः पाठः

# वंशार्थो वंशानुचरितञ्च

पुराणानि आर्यसंस्कृतेः शाश्वतानि स्रोतांसि सन्ति। वेदानन्तरमस्माकं संस्कृतेर्वास्तवं स्वरूपमस्माभिः पुराणैरेवागन्तुं शक्यते। पुराणानुसारेण पुराणानि हि धार्मिक-सामाजिक-सांस्कृतिक-राजनीतिकऽऽर्थिकादिषु क्षेत्रेषु लोकवर्गस्य विचाराणां कार्याणां च यथार्थं चित्रमुपस्थापयन्ति।

यावद् धर्मस्य धार्मिकसंस्काराणां च पूर्णज्ञानं न सम्भवेत् तावन्महापुरुषाणां जीवनवृत्तान्ताध्ययनं न भवेत्। एतस्मात् कारणात् पुराणेतिहासयोर्ज्ञानं परमावश्यकम्। पुराणमेव सर्वभूमण्डलजातस्य वस्तुनो मूलवृक्षरूपं वर्तते। प्राचीनतमपरम्पराया ज्ञानार्थमपि पुराणेतिहासौ पठितव्यावेव। पुराणेषु वर्णितेषु पञ्चलक्षणेषु वंशवंशानुचरितयोर्ज्ञानमावश्यकम्। वंशानुचरितमैतिहासिकानां कृते महत्त्वस्य विषयः। भविष्य-मत्स्य-वायु-ब्रह्माण्ड-विष्णु-भागवतपुराणेषु वंशानुचरितं वर्णितं समुपलभ्यते।



**वंशः**

ब्रह्मणः सकाशादुत्पन्नानां नृपतीनाम् ऋषीणाञ्च भूत-भविष्य-वर्तमान-कुलपरम्परा वंशः कथ्यते । तथा चोक्तं श्रीमद्भागवते -

**राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः ।** (भागवतपुराणम् १२।७।१६)

पुराणानि हि सनातनसंस्कृतेरितिहासस्य मूलस्रोतांसि सन्ति । यद्यपि रामायणे महाभारते च प्रधानतयेतिहासस्यैव वर्णनं विद्यते तथापि पुराणेष्वपीतिहासस्य विवेचनं सर्वोपकारकतयाऽतिसुगमतया च कृतमस्तीति बहवः समालोचकाः सोल्लासं समर्थयन्ति । सनातनसंस्कृतिरतिप्राचीनतमाऽस्ति । सृष्टिकालादिदानीं यावदियं स्वं स्वरूपं सम्यक् संरक्षन्ती तथैव तिष्ठति । बहुष्वाक्रमणेषु जातेष्वपि अस्या मूलं सुरक्षितमस्ति । यत्रान्यासां जातीनां वंशस्येतिहासो न सन्तोषजनक उपलभ्यते । तत्र हिन्दुजातेरितिहासस्य वर्णनमादिकालादेव व्यवस्थितं मिलति । हिन्दुजातौ सूर्यवंश-चन्द्रवंश-भृगुवंश-वसिष्ठवंश-गौतमवंश-कश्यपवंशादयोऽनेके वंशा वर्तन्ते । एषां वंशानामन्येषामृषीणां महर्षीणां राज्ञां च वंशवर्णनं पुराणेषु प्राप्यते । कतिपयस्थलेषु नामभेदः प्राप्यते । सृष्टेरादौ ब्रह्मणोऽष्टौ पुत्रा उत्पन्नाः । एतेषामष्टानामेव ऋषीणां वंशाः सङ्क्षिप्तरूपेण चर्चात्र क्रियते ।

१. **भृगुवंशः** – महर्षेर्भृगोस्तिस्रो भार्या आसन् - हिरण्यकशिपोः कन्या दिव्या, इन्द्रस्य पुत्री जयन्ती पुलोम्नः पुत्री पौलोमी च । दिव्यया भृगोः संयोगात् ज्ञानिनां श्रेष्ठोऽसुराणां गुरुः शुक्राचार्य उत्पादितो यस्योशनाः काव्यो वेति नामान्तरमस्ति । शुक्राचार्यस्य विवाहः पितृणां कन्यया गवा सहाजायत । तया शुक्राचार्यस्य संयोगाच्चत्वारस्तनया अजायन्त– त्वष्टा, वरुचिः, शण्डः अमर्कश्च । अन्या एका पत्नी इन्द्रपुत्री जयन्ती आसीत् । जयन्त्यां शुक्राचार्यस्य पुत्री देवयानी समुत्पन्ना, यस्या विवाहो राज्ञा ययातिना सह सम्पन्नः । भृगोः पुलोम्नः पुत्र्यां पौलोम्यां ब्रह्मनिष्ठो जितेन्द्रियः परमप्रभावशाली महर्षिश्च्यवन उत्पन्नः ।

२. **अङ्गिरोवंशः** –महर्षेरङ्गिरसः तिस्रः पत्न्य आसन् । एका मरीचिनन्दिनी सुरूपा, द्वितीया कर्दमपुत्री स्वराट्, तृतीया च मनुकन्या पथ्या । तत्राङ्गिरसः सुरूपायां देवगुरोर्बृहस्पतेर्जन्म जातम् । स्वराजो गौतमो जनितः । पथ्यायास्तु अवन्ध्यो वामदेव उशिज उतथ्यो धिष्णुश्चेति पञ्च पुत्रा अजायन्त ।

३. **मरीचिवंशः**– मरीचिवंशे समस्तानां स्थावरजङ्गमानामुत्पत्तिरजायत । एकदा मरीचिः पुत्रकामनया सहस्रवर्षपर्यन्तं ध्यानमग्नोऽतिष्ठत् । परिणामतः एकस्यानुपमस्यारिष्टनेमिनाम्नो मानसपुत्रस्य प्रादुर्भावोऽभवद्, यस्य द्वितीयं नाम कश्यपोऽभवत् । कश्यपस्तु सवितुर्जनकः । दक्षप्रजापतिनाऽऽत्मन अदित्यादयस्त्रयोदश कन्यकाः कश्यपाय समर्पिताः । समस्तदेवगन्धर्वकिन्नराप्सरोनागादयः कश्यपसन्ततिर्मरीचेर्वंशो वर्तते ।

४. **पुलस्त्यवंशः** – पुलस्त्यस्य भार्याया नाम इडविडा आसीत् । सा तृणविन्दोः पुत्री आसीत् । पुलस्त्यद्वारा इडविडायां विश्वश्रवोनामकः पुत्रो जनितः । विश्वश्रवसश्चतस्रो भार्या आसन् । प्रथमा

देवगुरोर्बृहस्पतेर्दुहिता देववर्णिनी। द्वितीया तृतीया च माल्यवतः कन्यके पुष्पोत्कटा वाका च, चतुर्थी कैकसीनाम्नी मालिनः पुत्री। तासु देववर्णिनी पुलस्त्यसंयोगात् कुबेरनामकं सुतमसूत। पुष्पोत्कटायाः प्रहस्त-महापांसु-खरनामानस्त्रयः पुत्रास्तथा कुम्भीनसीनाम्नी एका पुत्री च जाता। वाकायाः सन्ततिषु त्रिशिरा-दूषण-विद्युज्जिह्व-राक्षसनामधेयाश्चत्वारः पुत्रा असलिकानाम्नी एका कन्यका चाऽऽसन्। कैकसी रावणम्, कुम्भकर्णम्, विभीषणम्, शूर्पणखाञ्च जनयामास। एते पुलस्त्यवंश्याः क्रूरकर्माणः, देवैरपि दुर्दम्या, वेदाध्यायिनः, तपोनिष्ठाः, यज्ञकर्तारः, लब्धवरा असङ्ख्यपुत्रपौत्रसमन्विताश्चासन्।

५. **पुलहवंशः–** पुलहपत्न्या नाम क्षमा आसीत्। पुलहपत्नी क्षमा ब्रह्मतुल्यतेजस्विनः कीर्तिमन्तः कर्दम-अम्बरीष-सहिष्णुनामकान् त्रीन् तनयान् पीवरीनाम्नीमेकां पुत्रीञ्च प्रासूत। कर्दमपत्नी अलिपुत्री श्रुतिः शङ्खपादनामकमेकं पुत्रं काम्यानाम्नीमेकां पुत्रीञ्च प्रासूत। पुलहस्य तृतीयेन पुत्रेण सहिष्णुना यशोधरीनाम्न्यां भार्यायां कामदेवनामक एकः पुत्र उत्पादितः। सर्वप्रकारा मृगव्यालदंष्ट्रिणो जीवाः, भूतप्रेतपिशाचसर्पमयूरादयोऽनेके जीवाः, मायाविनः क्रोधवशा जीवसमूहाश्च पुलहसन्ततय आसन्।

६. **क्रतुवंशः–** क्रतोः पत्नी सन्नतिर्बालखिल्यान् अजनयत्। एषां न भार्या आसन् न च पुत्रादयो जाताः। इम ऊर्ध्वरेतसो नैष्ठिकब्रह्मचारिणः प्रलययर्पन्तं सूर्यरथस्याग्रे चलन्ति। महर्षिणा क्रतुना सन्तत्यभावाद् अगस्त्यस्य पुत्रो धर्मिष्ठ इध्मवाहः स्वपुत्ररूपेण स्वीकृतः।

७. **अत्रिवंशः–** विष्णुपुराणानुसारेण अत्रेः पत्नी अनसूया चन्द्रमसं दुर्वाससं दत्तञ्चाजनयत्। एते ब्रह्मविष्णुशिवानामंशैरुत्पन्ना आसन्। अन्यपुराणानामनुसारमत्रिमुनेर्दश स्त्रिय आसन् या परमसुन्दर्यः पतिव्रताश्चासन्। अत्रिस्तासु स्वसमानान् दश पुत्रानुत्पादयामास। ते तपोनिष्ठा वेदपारगामिनो योगिनश्च बभूवुः।

८. **वसिष्ठवंशः** - वसिष्ठादरुन्धत्यां शक्तिरुत्पन्नः। शक्तेरदृश्यन्त्यां पराशरमुनिर्बभूव। पराशरात् सत्यवत्यां कृष्णद्वैपायनः (व्यासः), व्यासादरण्यां शुको जातः। शुकात् पीवर्यां भूरिश्रवादयः षट् पुत्रा अभवन्। वसिष्ठस्य ऊर्जाया गर्भाद् सप्त पुत्रा अजायन्त तथा चैका पुत्री समुत्पन्ना। एवं वसिष्ठवंशेऽनेके गोत्रप्रवर्तका जाताः।

वंशवर्णनप्रसङ्गे महत्त्वपूर्णो वंशः कश्यपवंशः। कश्यपवंशस्य सामान्यचर्चात्र क्रियते। ब्रह्मणः पुत्रो मरीचिः, मरीचेः पुत्रः कश्यपः। प्रजापतिर्दक्षः परमसौभाग्यशालिनीः स्वकीयास्त्रयोदशकन्या मरीचिपुत्राय महर्षये कश्यपाय समर्पितवान्। कश्यपस्तु गोत्रप्रवर्तको मुनिः। कश्यपपत्नीनां सन्ततय एवं सन्ति–

१. **अदितिसन्ततयः –** अदितेर्गर्भाद् इन्द्रः, धाता, अर्यमा, मित्रः, वरुणः, अंशुः, भगः, विवस्वान्, पूषा, पर्जन्यः, त्वष्टा विष्णुश्चेति द्वादश तनया अजायन्त। अदितेरेते पुत्रा द्वादशादित्या उच्यन्ते। अतो देवतानां माता अदितिरस्ति।

२. **दितिसन्ततयः** – महर्षिकश्यपसंयोगाद् दितेर्द्वौ पुत्रौ जातौ। प्रथमो हिरण्यकशिपुः द्वितीयो हिरण्याक्षश्च । दितेरेव पुत्रा मरुद्गणा येषां सङ्ख्या एकोनपञ्चाशन्मिताऽऽसीत् ।

३. **दनुसन्ततयः** – दनुकश्यपयोः संयोगाद् विप्रचित्ति-मय-शम्बर-तारक-स्वर्भानु-वृषपर्वा-पुलोमादयः शतपुत्रा अभूवन् । दनोरुत्पन्नत्वात् ते दानवाः कथ्यन्ते । दितेर्दनोश्च पुत्रा असुराश्चोच्यन्ते ।

४. **अरिष्टासन्ततयः** – महर्षिकश्यपारिष्टासंयोगात् किन्नरगन्धर्वादयो देवयोनयः समुत्पन्नाः। एते देवलोके निवसन्तो गीतवाद्यादिभिर्देवान् सुखयन्ति ।

५. **सुरसासन्ततयः** – कश्यपसुरसासंयोगाद् एकानेकफणाः सहस्रं सर्पा जनिताः। तेषां वंशपरम्परा असङ्ख्याताः सन्ति ।

६. **सुरभिसन्ततयः** –महर्षिकश्यपसुरभिसंयोगाद् हरः, बहुरूपः, त्र्यम्बकः, अपराजितः, वृषाकपिः, शम्भुः, कपर्दी, रैवतः, मृगव्याधः, शर्वः, कपालिश्चेत्येते एकादश रुद्रा उत्पादिताः । नन्दी नामैको वृषभोऽपि सुरभेः पुत्रः । इन्द्रवाहनरूप उच्चैःश्रवोनामाऽश्वश्च सुरभेरेव सन्ततिः । ततो गावो महिष्योऽश्वाश्च सुरभित एव समुत्पन्नाः ।

७. **विनतासन्ततयः** – विनताकश्यपसंयोगाद् द्वौ अरुण-गरुडौ तनयौ समुत्पन्नौ । गरुडो विष्णोर्वाहनत्वे प्रतिष्ठितः । अरुणश्च सूर्यस्य रथसारथित्वेन स्थापितः । अनयोः षट्त्रिंशद् अनुजा भगिन्योऽप्यासन् यासु विद्युत्सौदामिन्यौ परमप्रसिद्धे स्तः । गायत्र्यादीनि छन्दांसि, पक्षिणः, हव्यवाहनगणश्च विनतात एव समुत्पन्नाः सन्ति ।

८. **ताम्रासन्ततयः** – कश्यपताम्रयोः संयोगाद् श्येनी-भासी-शुकी-क्रौञ्ची-भद्रा-गृध्रिका-धृतराष्ट्रीनामुत्पत्तिरभवत् । श्येनी अरुणस्य पत्नी । भासी, क्रौञ्ची, शुकी, धृतराष्ट्री, भद्रा च गरुडस्य पत्न्य अभवन् । ताम्राया वंशस्य गणना कर्तुं न शक्यते ।

९. **क्रोधवशासन्ततयः** – कश्यपक्रोधवशासंयोगाद् मृगीरावत्यादिसन्ततयो बभूवुः। अस्मिन्नेव वंशे गजराजो ऐरावतोऽभवत् । भूतप्रेतादयो रुद्रानुचराः क्रोधवशाया एव सन्ततयः सन्ति । मृगराजसहिता महिषवराहखड्गादयोऽनेके वन्यजन्तवः क्रोधवशात एव समुत्पन्नाः ।

१०. **इरासन्ततयः** –कश्यपेरासंयोगात् कमललोचना-लतावल्ली-वीरुधाख्याः तिस्रः कन्याः जाताः, याः क्रमशो वनस्पतीनां वृक्षाणां वीरुधाञ्च मातरो जाताः ।

११. **कद्रूसन्ततयः** – कश्यपसंयोगात् कद्रूः अनेकफणान् सहस्रसङ्ख्यकान् नागान् जनयामास । ते शेष-वासुकि-कालीय-पुण्डरीकादय आसन् । नागानां राजा वासुकिः सर्पाणाञ्च राजा तक्षकः ।

१२. **विश्वासन्ततयः** – कश्यपस्य संयोगाद् विश्वायां कोटिशो यक्ष-रक्षांसि समुत्पन्नानि ।

१३. **मुनिसन्ततयः** – गन्धर्वा अप्सरसश्चः मुनेः सन्ततयः। मुनेर्गर्भाद् यज्ञक्षेत्रे सुप्रसिद्धा गायका उत्पन्ना ये देवगन्धर्वाः प्रोच्यन्ते। यथा– चित्रसेनः, उग्रसेनः, सूर्यवर्चाः, युगपत्, अनघः, चित्ररथेत्यादयः।

एवं त्रयोदशसु दक्षसुतासु कश्यपभार्यासु देव-दानव-दैत्य-पशु-पक्षि-वृक्ष-लता-गुल्म-सर्प-नाग-यक्ष-राक्षस-किन्नर-गन्धर्वाप्सरसामुत्पत्तिरजायत। कश्यपवंशैः समस्तमपि भूमण्डलं व्याप्तम्। एतस्मात् कारणाद् येषां गोत्राणां ज्ञानं नास्ति तेषां सर्वेषां स्थलचरजलचरस्थावरादीनां मनुष्याणां च गोत्रनाम कश्यपपदेन व्यवह्रियते।

## वंशानुचरितम्

तत्तद्वंशेषु समुत्पन्नानां विशिष्टानां महापुरुषाणां रुचिरचरित्रवर्णनं वंशानुचरितमुच्यते। अत्र मर्त्यलोकप्रभवाणां पुण्यकर्मशालिनामृषीणां धर्मरक्षणतत्पराणां राज्ञां च वंशजा वर्ण्यन्ते। सृष्टिशृङ्खलायाः सदाचारादिविभागानाञ्च विस्तृतं वृत्तान्तमुपलभ्यते।

**वंशानुचरितं तेषां वृत्तं वंशधराश्च ये।** (भागवतपुराणम् १२।७।१६)

मनुष्याणां समये यदा घोराद्धोरतराऽपि आपदुपतिष्ठते तदा महतो महानपि धर्मवेत्ता किंकर्तव्यविमूढो भवति। तस्य मनसि च बहुविधो विचार उपतिष्ठते। ततस्तेषामपि अनवधानतया पतनं जायते। एवंविधायां विकटपरिस्थितौ पुण्यशालिनामुत्तमचरित्राणां स्वपूर्वजानां रुचिरं चरितं स्मृत्वा पतनात् संरक्षणाय पुराणेषु वंशानुचरितस्य समावेशः कृतोऽस्ति।

पुराणमाध्यमेनैव वंशानुचरितस्य ज्ञानं सम्यग्भवितुमर्हति। यदि जगति पुराणानि न स्युर्स्तार्हि कथमिदं ज्ञातुं शक्यते यद् महाराजो युधिष्ठिरो हरिश्चन्द्रो वा महान् सत्यवादी आसीत्। राजा जनको विशिष्टो ब्रह्मज्ञानी बभूव। राजा दिलीपश्चातिगोभक्तो जातः। अर्जुनोऽद्वितीयो धनुर्धरोऽभवत्। ध्रुवप्रह्लादादयो बालका अपि परमभगवद्भक्ता बभूवुः। भगवतो रामस्यादर्शमयं जीवनचरितं समस्तं विश्वं श्रद्धत्ते। अनसूया-सती-सीता-सावित्री-दमयन्तीप्रभृतीनां सतीशिरोमणीनामार्यभूमणीनां रमणीनां पवित्रतमं पातिव्रत्यमनुपममास्ते यच्छ्रुत्वा पापं दूरीभवति, सर्वेषां शिरश्च समुन्नतं जायते। यदि पुराणानि न स्युर्स्तार्हि क एतासां पवित्रं चरित्रं बोधयेत्? यदि पुराणेषु वंशानुचरितं न श्रूयेत तर्हि सनातनसंस्कृतेः समस्तं गौरवमादर्शश्च विलुप्येत। संस्कृतिसदाचाराऽऽस्तिकतावीरताब्रह्मचर्यपातिव्रत्यभगवद्भक्तिज्ञानकर्मणां समुज्ज्वल उपदेशश्च कथं प्राप्येत?

यद्यपि महाभारतसङ्ग्रामे तत्तद्देशान्तरादागतानामनेकेषां राज्ञाम्, पाण्डवानां दिग्विजये राजसूये च भारतादन्यदेशानामपि वर्णनं विद्यते तथापि पौराणिके वंशानुचरिते विशेषत आर्याणामेव राज्ञामादर्शमयं समुज्ज्वलं चारुचरित्रचित्रणं दृष्टिगोचरतामायाति येनार्याणां प्राचीनेतिहासः सुरक्षितोऽस्ति। त्रिकालदर्शिनो महर्षेर्व्यासस्य योगदृष्टौ स्थूलो मर्त्यलोकः, सूक्ष्मो वा देवलोकः समानरूपेणाक्षिगोचरतामापद्यते। अतो

वंशवर्णने दैवी सृष्टिः लौकिकी सृष्टिश्चोभयं वर्णितमस्ति । यथा दैवसृष्टित्वेन सूर्यादीनां देवानां वर्णनं, लौकिकसृष्टित्वेन इक्ष्वाकुप्रभृतीनां राज्ञां प्रादुर्भाववर्णनं पुराणेषु विहितमस्ति ।

## आर्याणां निवासस्थानम्

आर्याणामादिनिवासस्थानविषयेऽपि मतान्तराणि प्राप्यन्ते तथापि प्राचीनभारतवर्षीया विचारका विपश्चितस्त्वनादिकालत एकस्थानं मन्यन्ते । आर्याणामादिनिवासस्थानं भारतवर्षस्यैव विन्ध्य-हिमालययोः पूर्वपश्चिमसमुद्रयोश्च मध्यवर्ती सप्तसिन्धोः पवित्रतमो भूभागोऽस्ति, यत्र ब्रह्मावर्ताऽऽर्यावर्तप्रदेशौ समाविष्टौ स्तः । सृष्ट्यारम्भे ब्रह्मदेवेन समारब्धः सृष्टियज्ञः कस्यां वेद्यां सम्पन्न इति जिज्ञासायां शतपथब्राह्मणं स्पष्टं निर्दिशति यद् आदिसृष्टिः कुरुक्षेत्रे एवाजायत । अतः कुरुक्षेत्रं हि देवानां देवयजनम् (सृष्टिरूपयज्ञस्य सम्पादनस्थानम्) उच्यते । तस्मादाहुः कुरुक्षेत्रं देवानां देवयजनम् इति । महर्षिणा मनुनाऽपि मनुस्मृतौ कुरुक्षेत्रं मानवसभ्यताया आदिस्रोतः स्वीकुर्वताऽन्यदेशनिवासिभिरत्रोत्पन्नेभ्यो ब्राह्मणेभ्यः स्व-स्व-चरित्रस्य शिक्षां ग्रहीतुमादेशो दत्तोऽस्ति -

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।**

**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥** (मनुस्मृतिः २।२०)

कुरुक्षेत्रं ब्रह्मावर्तसमं पवित्रं मन्यमानेन मनुना वर्णाश्रमिणे द्विजवर्गायात्रैव निवासस्य निर्देशः कृतोऽस्ति । मनोर्दृष्टौ समस्तपृथिव्यपेक्षया आर्यावर्तस्तदपेक्षया मध्यप्रदेशस्तदपेक्षया च ब्रह्मावर्तः पवित्रतरो मन्यते । अतो भारतीयैर्वेद-स्मृति-पुराणपरम्पराविद्भिर्विद्वद्भिरार्याणामादिनिवासस्थानमेतद् भारतवर्षमेव मन्यते । पुराणेषु सृष्टेरादिपुरुषस्य स्वायम्भुवमनोरादिनिवासस्थानं सुपुनीते सरस्वतीतटसमीपे ब्रह्मावर्ते एवोक्तमस्ति । स्वायम्भुवो मनुर्हि आदित एव ब्रह्मावर्ते निवसन् सप्तसागरद्वीपायाः समस्ताया वसुन्धरायाः शासनं करोति स्म । स्वायम्भुवमनोः शतरूपायां द्वौ पुत्रौ समुत्पन्नौ - प्रियव्रतः उत्तानपादश्च । तावपि यथाधर्मं सप्तद्वीपवतीं महीं शशासतुः । अपि च ब्रह्मणा प्रजोत्पत्त्यर्थमादिष्टः कर्दम ऋषिः पवित्रे सरस्वतीनदीतटे सहस्रवर्षपर्यन्तं तपश्चचार । आदिराजस्य मनोरावासस्थाने ब्रह्मावर्ते यत्र सरस्वती प्रवहति तत्र राज्ञा पृथुना दीक्षापूर्वकं शतमश्वमेधयज्ञाः कृताः । महाराजात् पृथोः पूर्वमस्यां भूमौ नगरग्रामादिव्यवस्था नासीत् । तेन स्वधनुषा कोट्या पर्वतशिखराणि विदार्य सञ्चूर्ण्य च पृथ्वी निवासयोग्या कृषियोग्या च समतला कृता । प्रबलैरेभिः पौराणिकैः प्रमाणैरपि स्पष्टं ज्ञायते यद् मानवसृष्टेरादिपुरुषो भगवान् मनुस्तथा तात्कालिका ऋषयो महर्षयश्च भारतवर्षस्यैतेष्वेव पावनेषु स्थलेषु निवसन्तस्तपस्यन्तश्च मानवसृष्टिकार्ये सफला वभूवुः । अतो महाभारते पुराणेषु चैतस्य देशस्य महिम्नो महद् गुणगानं कृतमस्ति । कुरुक्षेत्रस्य वर्णनप्रसङ्गे महाभारते लिखितमस्ति यद् ये नरा सरस्वती-दृषद्वत्योर्मध्यवर्तिनि कुरुक्षेत्रे निवसन्ति ते स्वर्ग एव निवसन्ति । एतेन कुरुक्षेत्राय स्वर्गस्य मान्यता प्रदत्ताऽस्ति । त्रिषु लोकेषु भारतवर्षमेव सर्वश्रेष्ठं पुण्यप्रदं च कर्मक्षेत्रमभिमतं विद्यते ।

# अभ्यासः

## १. अतिसङ्क्षिप्तरूपेण उत्तरं दीयताम्

(क) अस्माकं संस्कृतेर्वास्तवं स्वरूपं कथं ज्ञातुं शक्यते ?

(ख) सर्वभूमण्डलजातस्य वस्तुनो मूलवृक्षः कः ?

(ग) वंशशब्दस्य कोऽर्थः ?

(घ) हिन्दुजातेरितिहासस्य मूलस्रोतांसि कानि ?

(ङ) केषामितिहासः सुव्यवस्थितो मन्यते ?

(च) सृष्टेरादौ उत्पन्ना ऋषयः कति आसन् ?

(छ) इन्द्रपुत्र्या नाम किमासीत् ?

(ज) च्यवनस्य मातुर्नाम किम् ?

(झ) महर्षेरङ्गिरसः कति पत्न्य आसन् ?

(ञ) कश्यपस्य पितुर्नाम किम् ?

(ट) सवितुर्जनकः कः ?

(ठ) नन्दिनामकस्य वृषभस्य मातुर्नाम किम् ?

(ड) अरुणगरुडयोः कति अनुजा भगिन्यश्चासन् ?

(ण) मरुद्गणानां मातापितरौ कौ ?

(त) देवलोके निवसन्तः के गीतवाद्यादिभिर्देवान् सुखयन्ति ?

(थ) नागानां सर्पाणाञ्च राजानौ कौ ?

## २. सङ्क्षिप्तोत्तरं दीयताम्

(क) विशेषरूपेण केषु केषु पुराणेषु वंशानुचरितं समुपलभ्यते ?

(ख) भागवतानुसारेण वंशशब्दस्य परिभाषा का ?

(ग) अङ्गिरोवंशस्य सङ्क्षिप्तपरिचयो देयः ।

(घ) किं नाम वंशानुचरितम् ?

(ङ) शुकदेवस्य जन्म कथमभूत् ?

(च) आर्याणामादिनिवासस्थानं कुत्र मन्यते ?

(छ) दक्षः कति पुत्रीः कश्यपाय समर्पितवान् ?

(ज) कश्यपपत्नीनां नामानि कानि ?

(झ) गरुडस्य पत्नीनां नामानि लिखत ।

## ३. अधोलिखितान् अनुच्छेदान् पठित्वा तदनुवर्तिनः प्रश्नान् उत्तरयत

मनुष्याणां समये यदा घोराद्घोरतराऽपि आपदुपतिष्ठते तदा महतो महानपि धर्मवेत्ता किंकर्तव्यविमूढो भवति । तस्य मनसि च बहुविधो विचार उपतिष्ठते । ततस्तेषामपि अनवधानतया पतनं जायते । एवंविधायां विकटपरिस्थितौ पुण्यशालिनामुत्तमचरित्राणां स्वपूर्वजानां रुचिरं चरितं स्मृत्वा पतनात् संरक्षणाय पुराणेषु वंशानुचरितस्य समावेशः कृतोऽस्ति ।

पुराणमाध्यमेनैव वंशानुचरितस्य ज्ञानं सम्यग्भवितुमर्हति । यदि जगति पुराणानि न स्युर्स्तर्हि कथमिदं ज्ञातुं शक्यते यद् महाराजो युधिष्ठिरो हरिश्चन्द्रो वा महान् सत्यवादी आसीत् । राजा जनको विशिष्टो ब्रह्मज्ञानी बभूव । राजा दिलीपश्चातिगोभक्तो जातः । अर्जुनोऽद्वितीयो धनुर्धरोऽभवत् । ध्रुवप्रह्लादादयो बालका अपि परमभगवद्भक्ता बभूवुः । भगवतो रामस्यादर्शमयं जीवनचरितं समस्तं विश्वं श्रद्धत्ते । अनसूया-सती-सीता-सावित्री-दमयन्तीप्रभृतीनां सतीशिरोमणीनामार्यभूमणीनां रमणीनां पवित्रतमं पातिव्रत्यमनुपममास्ते यच्छ्रुत्वा पापं दूरीभवति, सर्वेषां शिरश्च समुन्नतं जायते । यदि पुराणानि न स्युर्स्तर्हि क एतासां पवित्रं चरित्रं बोधयेत् ? यदि पुराणेषु वंशानुचरितं न श्रूयेत तर्हि सनातनसंस्कृतेः समस्तं गौरवमादर्शश्च विलुप्येत । संस्कृतिसदाचाराऽऽस्तिकतावीरताब्रह्मचर्यपातिव्रत्य-भगवद्भक्तिज्ञानकर्मणां समुज्ज्वल उपदेशश्च कथं प्राप्येत ?

यद्यपि महाभारतसङ्ग्रामे तत्तद्देशान्तरादागतानामनेकेषां राज्ञाम्, पाण्डवानां दिग्विजये राजसूये च भारतादन्यदेशानामपि वर्णनं विद्यते तथापि पौराणिके वंशानुचरिते विशेषत आर्याणामेव राज्ञामादर्शमयं समुज्ज्वलं चारुचरित्रचित्रणं दृष्टिगोचरतामायाति येनार्याणां प्राचीनेतिहासः सुरक्षितोऽस्ति । त्रिकालदर्शिनो महर्षेर्व्यासस्य योगदृष्टौ स्थूलो मर्त्यलोकः, सूक्ष्मो वा देवलोकः समानरूपेणाक्षिगोचरतामापद्यते । अतो वंशवर्णने दैवी सृष्टिः लौकिकी सृष्टिश्चोभयं वर्णितमस्ति । यथा दैवसृष्टित्वेन सूर्यादीनां देवानां वर्णनं, लौकिकसृष्टित्वेन इक्ष्वाकुप्रभृतीनां राज्ञां प्रादुर्भाववर्णनं पुराणेषु विहितमस्ति ।

**प्रश्नाः**

(क) कदा मनसि बहुविधो विचार उपतिष्ठते ?

(ख) किमर्थं पुराणेषु वंशानुचरितस्य समावेशः कृतोऽस्ति ?

(ग) पुराणेषु वंशानुचरितं यदि न स्यात् तर्हि कीदृशः परिणामो भवेत् ?

(घ) पौराणिके वंशानुचरिते विशेषतः केषां कीदृशं चरित्रचित्रणं दृष्टिगोचरमायाति ?

(ङ) दैवीसृष्टिलौकिकसृष्टिवर्णने किं पार्थक्यम् ?

**४. 'पुराणानुसारेण ......... कथं प्राप्यते' इत्यनुच्छेदस्य सारं लिखत ।**

**५. अधो निर्दिष्टगद्यांशं पठित्वा प्रश्नानामुत्तराणि दत्त**

यो जन्तुः कामं क्रोधं च परित्यज्य मामुपास्ते तस्मै परां मुक्तिं प्रयच्छामीत्यत्र न कश्चन सन्देहोऽस्ति । यदा मनुष्यः कामक्रोधौ परित्यजति तदास्य हृदि सुप्रकाशः समुदेति । पुत्रदारादिसमायुक्ता ये नरा आनन्दन्ति, परं हृदयस्थं नारायणं प्रभुं परं ज्योतिर्न जानन्ति, ये च नराधमा मदेन मोहिता अनर्थान् क्रीडन्ति तेषां निरये वासो भवतीति सत्यं वदामि । तस्मात् हे नन्दिकेश्वर ! त्वं कामं, क्रोधं, मदं, मोहं, मात्सर्यं, हिंसां, पैशुन्यं, अहङ्कारम्, लोभं च परित्यज । यो मनोवाक्कायकर्मभिः सङ्कल्पं करोति स हरिनामजपेन नूनं भवाब्धिं सन्तरति ।

यथा हरिर्जगन्नाथस्तथाहमपि जगतां नाथोऽस्मि । व्योम्नि वायोरिव आवयोः किमपि अन्तरं नास्ति । अतः सर्वदा हरिनाम सङ्कीर्तनीयम् –

हरिर्यथा जगन्नाथस्तथाहं जगतां पतिः ।
आवयोरन्तरं नास्ति आकाशे पवनं यथा ॥
हरेर्नाम हरेर्नाम कीर्तयस्व निरन्तरम् ।
ददाति परमां मुक्तिं सायुज्यां नात्र संशयः ॥

अतस्तस्मिन् त्रैलोक्यनायके हरौ विश्वासः क्रियताम् । यस्य मायासमाविष्टो ब्रह्मा सर्वदा भ्रमति, जगदतिक्रम्य वर्तमाने तस्मिन् वातस्वरूपिणि मयि गोविन्दे दृढां भक्तिं कुरु । हे पुत्रक ! एवं कृते दृढबन्धनाद् नूनं विमोक्ष्यसे ।

**प्रश्नाः**

(क) भगवान् शिवः कस्मै मुक्तिं प्रयच्छति ?

(ख) कस्य हृदि सुप्रकाशः समुदेति ?

(ग) कीदृशानां जनानां निरये वासो भवति?

(घ) भवाब्धिं सन्तर्तुं किं विधेयम् ?

(ङ) सर्वदा किं कर्तव्यम्?

(च) 'यथा हरिर्जगन्नाथस्तथाहमपि जगतां नाथोऽस्मि' इति कस्य वचनम् ?

(छ) सृष्टिपालनसंहारकर्तारः के ?

(ज) पञ्चदेवतानां नामानि कानि?

(झ) श्रीस्वस्थानीव्रतकथायां नवराजकृतं हरिहरयोरेकत्वप्रतिपादकं स्तुतिपद्यमन्विष्य समुपस्थापयत ।

(ञ) तीर्थस्थलानां नदीनां च संरक्षणाय अवलम्बनीयानुपायान् निर्दिशत ।

(ट) 'मुक्तिनाथक्षेत्रस्य महत्त्वम्' इति विषयकमनुच्छेदमेकं विलिखत ।

**६. शुकदेवस्य पितृपितामहप्रपितामहवृद्धप्रपितामहानां नामानि पाठाधारेण लिखत ।**

**७. पाठाधारेण अदिति-दिति-दनूनां सन्ततीनामन्तरं प्रदर्शयत ।**

**८. अस्य श्लोकस्य भावविस्तरं कुरुत**

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥

**९. अत्रिवंशे समुत्पन्नानामनसूयायाः पुत्राणां नामानि लिखत ।**

**१०. कासां सतीनां पातिव्रत्यं श्रुत्वा पापं दूरीभवति ? विवेचयत ।**

**११. वंशानुचरितं विज्ञाय प्राप्तव्यान् लाभान् वर्णयत ।**

**१२. परिवारस्य ज्येष्ठसदस्यं पृष्ट्वा आत्मन आरभ्य वृद्धप्रपितामहपार्यन्तिकं वंशवृक्षं निर्माय कक्षायां दर्शयत ।**

# आचारस्य महत्त्वम्



सतामाचारः सदाचार इति कथ्यते । आङ्-उपसर्गपूर्वकाद् गतिभक्षणार्थकाच्चर्धातोर्घञ्प्रत्यये आचारशब्दो निष्पद्यते । सज्जनार्थकसच्छब्देन सह तस्य षष्ठीतत्पुरुषसमासः । सज्जनानामाचारः सामान्यजनानां कृते किमर्थमिति जिज्ञासा समुदेत्येव ।

विश्वस्मिन् विश्वे स्वकर्मवशात् प्रादुर्भूताः सर्वेऽपि प्राणिनः सुखं मे भूयात्, दुःखं मे मनागपि मा भूदिति वाञ्छन्ति । समस्तप्राणिभिरभिलषितस्य सुखस्य कृते प्रवर्तमाना जना धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थेषु मोक्षसुखस्यैव परमत्वं मत्वा तस्य प्राप्तये प्रयतमाना दृश्यन्ते । मोक्षप्राप्तिमार्गश्च बहुविधो वर्तते यश्च बहुभिर्विद्वद्भिर्बहुशो विचारितश्चास्ति । तत्र केचन कर्म, केचिद् वैराग्यम्, इतरे भक्तिम्, अन्ये ज्ञानम्, अपरे च भक्तिसमन्वितं ज्ञानं मोक्षसाधनमिति मन्यन्ते ।

तत्र बहुशो मोक्षसाधनेष्वपि कर्तुः कायिकी वाचिकी मानसिकी सांसर्गिकी च शुद्धिरावश्यकी भवति । मानवजीवनं सफलयितुमशुद्धेन देहेनाशुद्धया वाण्या, दुर्भावभरितेन मनसा, दुष्प्रभावितेन संसर्गेण च न शक्यते, मोक्षसाधनं च तथा फलदायकं न भवति । अत उक्तम्-

**आचारहीनं न पुनन्ति वेदाः यदप्यधीताः सह षड्भिरङ्गैः ।**
**छन्दांस्येनं मृत्युकाले त्यजन्ति नीडं शकुन्ता इव जातपक्षाः ॥**

शिक्षाकल्पव्याकरणनिरुक्तज्योतिषच्छन्दांसि वेदस्य षडङ्गानि, तैः सहाधीता वेदा अपि आचारहीनं मानवं नैव पवित्रं कर्तुं प्रभवन्ति । आचारहीनं तं नरं वेदास्तथा त्यजन्ति यथा जातपक्षा विहङ्गमशिशवो नीडं त्यजन्ति ।)

अत एव मानवजीवनस्य सफलतायै परमपुरुषार्थरूपमोक्षसाधनप्राप्तये च बाह्याभ्यन्तरशुद्धिरत्यन्तावश्यकी भवति । एतदर्थमाचारः शास्त्रकारैः सर्वतः प्राथम्येन निर्दिष्टो वर्तते । अतो मानवेनागर्हितैरनिन्दितैः

कर्मभिर्नित्यनैमित्तिककाम्यकर्माणि सदाचारमूलानि कर्तव्यानि भवन्ति। यतो हि परलोके स्वात्मनः साहाय्यार्थं पिता माता पत्नीपुत्रबान्धवादयः केऽपि नैवोपलभ्यन्ते। तत्र इहलोके विहितस्य शुभाशुभकर्मणः फलरूपेण धर्माधर्माविवोपलभ्येते। आचाररूपशुभकर्मणः सत्कर्मणो वा फलं धर्मत्वेनोपतिष्ठते, अनाचाररूपाशुभकर्मणोऽसत्कर्मणो वा फलमधर्मत्वेनोपतिष्ठते। धर्मेण कर्मणा स्वर्गसुखादिकमुपलभ्यते चेदधर्मेण कर्मणा दुःखं नरकयातनाश्च प्राप्यन्ते। अत एवात्मकल्याणाय सर्वतोभावेन सर्वाभिरेव सामग्रीभिर्धर्मसञ्चयः कर्तव्यः। आचारमूलकधर्मस्य सहयोगेनैव मानवो दुष्पारमपि अन्धतमसः साम्राज्यं विजित्य स्वस्योद्धारं कर्तुं प्रभवति।

धर्मस्यानेकानि रूपाणि सन्ति। मानवजीवनं च स्वल्पतरं वर्तते। कीदृशो धर्मो व्यवहर्तव्यः, कीदृशश्च हेय इति विजिज्ञासा मानवमनसि समुदेत्येव। अतो मुख्यतया व्यवहर्तव्यो धर्मः क इत्यवस्थायां जिज्ञासायां धर्मस्य मुख्यं वास्तवं च रूपं श्रुतिभिर्निर्दिष्टं स्मृतिभिश्च सिद्धं महत्त्वपूर्णं तथ्यं 'आचारः प्रथमो धर्मः' इतिरूपं वर्तते। अत एव मानवेनात्मकल्याणाय सर्वथा सदाचारनिरतेन भवितव्यम्। आचाराद् दीर्घायुष्यं प्राप्यते। आचारादेव सन्ततीनामुपलब्धिस्तेषामुन्नतिश्च भवति। आचारादेव मानवसमाजे श्रेष्ठता प्राप्यते। आचारेणैव एव सत्यं शिवं च सन्निहितं भवति। आचारादेव शुभकर्मणि प्रवृत्तिर्जायते। शुभे कर्मणि प्रवृत्त्यनन्तरं तत्त्वबोधश्च भवति। आचार एव उत्तमो धर्मः परमं तपः प्रतीकात्मकं ज्ञानं च कथितं भवति। आचाराल्लक्ष्यसिद्धिर्विधातुं शक्यते। सदाचारनिरता जना इहलोके परलोके च सुखिनो भवन्ति। यो मानव आचारहीनो भवति स सर्वथा सामाजिकबहिष्कृतियोग्यो जायते। दुराचारी मानवः सर्वथा निन्दितो दुःखभाक् च भवति।

आचारोऽपि शास्त्रीयाचारो लौकिकाचारश्चेति भेदेन द्विप्रकारको भवति। आत्मकल्याणेच्छुना मानवेन आचारस्य प्रकारद्वयमपि परिपालनीयं भवति। सदाचरणशीलेन जनेन ग्रामधर्माः जातिधर्माः देशधर्माः कुलधर्माश्च परिपालनीया भवन्ति। लोकाचारश्च नैवोल्लङ्घनीयः। धर्मस्य स्रोतोभूते श्रुतिस्मृती ईश्वरस्य उभे नेत्रे स्तः। पुराणवाङ्मयं तस्य हृदयं वर्तते। श्रुतिर्वेदः स्मृतिश्च धर्मशास्त्रमिति लोके प्रसिद्धं वर्तते। अतः श्रुतिस्मृतिनयनाभ्यां पुराणरूपहृदयेन च यत्सत्यं समीक्ष्यते तदेव धर्म इति ज्ञायते। तदेव सदाचार इति च विज्ञायते। अतोऽस्माभिरपि सदाचारस्य पालना कर्तव्या भवति। पुराणेषु सदाचारपरिपालनाय मानवानां कृते प्रातर्जागरणादारभ्य रात्रौ शयनपर्यन्तं प्रत्येकं कालस्य कृते सदाचारसम्मतकार्याणां विभागो विहितो वर्तते। मानवेन परिपालनीयानि कतिपयसदाचारसूत्राणि वर्तन्ते येषां जीवनेऽनुपालनेन मानव इह लोके सुखी भूत्वा परलोके च मोदते।

सदाचार एव मानवजीवनस्य सम्पत्तिरस्ति। सदाचारादेव भगवत्तोषो भवति। ततः स्वर्गप्राप्तिश्च सम्भवति। सदाचारी जनः परापवादं न वदेत्, पैशुन्यं न कुर्यात्, असत्यं न वदेत्, नान्योद्वेगकरं वदेत्, परदारपरद्रव्येषु लोभं न कुर्यात्, शरीरेण वाचा मनसा परहिंसानिवृत्तिः स्यात्, सर्वभूतेषु हितकाम आत्मवत् पुत्रवच्च व्यवहरेत्, अनिष्टदर्शनतश्चेतसो रागादिदोषान् युक्त्या परिहरेत्, अनापदि स्वस्ववर्णाश्रमधर्मान् अनुतिष्ठेत्। आश्रितभृतये परिग्रहः, भूतदया, तितिक्षा (सहनशीलता), अमानित्वम्, सत्यम्, शौचम्, अतिश्रमपरिहारः,

मङ्गलवेषधारणम्, प्रियवादित्वम्, भूतेषु मैत्री, परद्रव्येऽस्पृहा, अदैन्यम्, अनसूया एतादृशाः साधारणसदाचाराः शास्त्रेषु वर्णिताः सन्ति ।

स्वस्थो ब्राह्मे मुहूर्ते उत्तिष्ठेदेव। तत्रोत्थितो धर्ममर्थं कामञ्च तदविरोधिनं चिन्तयेत्। ततो धनस्य त्रिवर्गमूलत्वाद् धनार्जनाय मध्याह्नात् प्रागेव यतेत। प्रातरुत्थाय नैर्ऋत्यामावसथाद् दूरं गत्वा मूत्रपुरीषे कुर्यात्। न कृष्टे, न सस्यमध्ये, न गोगोष्ठे, न जनसंसदि, न मार्गे, न नद्यादितीर्थेषु, नाप्सु, न तीरे, न श्मशाने मूत्रपुरीष उत्सृजेत्। अनापदि दिवा उदङ्मुखो रात्रौ दक्षिणामुखो मूत्रपुरीष उत्सृजेत्। हस्तौ पादौ च प्रक्षाल्य अन्तःशुद्ध्यर्थं पञ्चगण्डूषान् प्रास्य त्रिः सलिलं पिबेत्, द्विश्च मुखं परिमार्जयेत्। ततः स्वाचान्तः सुस्नातः केशप्रसाधनम्, आदर्शे दर्शनम्, चक्षुषो रञ्जनम्, गोष्ठदूर्वाद्यालम्भनानि मङ्गलानि कुर्यात्, स्नातो देवर्षिपितृतर्पणं च कुर्यात्।

ततो मध्याह्ने पुनः स्नातः स्वल्पशौचेन वा शुचिर्देवपित्रतिथिभूतेभ्यः श्वश्वपचवायसेभ्यो गुर्वादिभ्यः संश्रितेभ्यश्चान्नं दत्त्वा गृहे बालवृद्धगर्भिणीः भोजनादिना सन्तोष्य चरमं विघसं भुञ्जीत। नैकवस्त्रधरो नानार्द्रपाणिपादो न विदिङ्मुखे नान्यमनाः प्राङ्मुख उदङ्मुखो वा अकुपितः प्रशस्तं पथ्यञ्च प्रोक्षितमन्नं प्रशस्ते शुद्धे पात्रे च भुञ्जीत। न आसनाश्रिते पात्रे, न कुदेशे, नाकाले, नानावृते देशे, नातिजनसङ्कीर्णे भुञ्जीत। न अप्रशस्तम्, न पर्युषितम्, अन्यत्र फलमूलेभ्यः शुष्कशाकादिभ्यः, अपक्वलेह्यादिभ्यो गुडनिर्मितभक्ष्येभ्यश्च न हृतसारं पयोदध्यादि भुञ्जीत। मध्वम्बुदधिसर्पिःसक्तुभ्योऽन्यत्र भुक्तशेषमनुच्छिष्टमपि न भुञ्जीत। पूर्वं मधुरं रसम्, मध्ये लवणाम्लौ, अन्ते कटुतिक्तादिकान् रसान् अश्नीयात्। बलारोग्यकामः पुरुषः प्राग् द्रवम्, मध्ये कठिनम्, अन्ते पुनर्द्रवमश्नीयात्। अन्नमकुत्सयन् मौनी सन् भुञ्जीत। भुक्त्वाऽऽचम्य पाणिपादौ प्रक्षालयेत्। भुक्त्वान्नपरिपाकाय स्वस्थः प्रशान्तचित्तः कृतासनपरिग्रहोऽभीष्टदेवताः स्मरेत्। भुक्त्वाऽऽयासकर्माणि वर्जयेत्। अनातुरः सन्ध्ययोर्न स्वपेत्। नाज्ञातकुलशीलाय गृहे वासो देयः। तस्यापरिच्छदबहिर्वासः। सायं भुक्त्वा अस्फुटितां दारुमयीं विशालामभुग्नां समाममलिनामजन्तुमयीमास्तृतां शय्यामधितिष्ठेत्। प्राच्यां याम्यायां वा दिशि शिरः कुर्यात्।

परस्वं नापहरेत्। अल्पमप्यप्रियं न ब्रूयात्। प्रियं च नानृतं ब्रूयात्। नान्यदोषानुदीरयेत्। अन्यस्त्रियं वैरञ्च न रोचयेत्। विद्विष्टैः पतितैरुन्मत्तैर्बहुवैरकृद्भिः कीटवत्पीडकैर्वर्धकीभिः बन्धकीभिः भर्तृक्षुद्रकथाकृद्भिरनृतकथाकृद्भिरतिव्ययशीलैः परपरिवादरतैः शठैश्च सह मैत्रीं न कुर्यात्। नखान् न खादेत्। न नखान् तृणान् वा छिन्द्यात्। न महीं पादाङ्गुष्ठेन लिखेत्। रात्रौ चतुष्पथम्, चैत्यवृक्षम्, श्मशानोपवनानि दुष्टस्त्रीसन्निकर्षञ्च वर्जयेत्। अत्यन्तं जागरस्वप्नौ, स्थानासने, शय्याम्, व्यायामञ्च न सेवेत। नग्नो न स्नायात्, न स्वपेत्, नाचामेत्। मुक्तशिखो नाचामेद् न देवादीनर्चयेत्। दुर्जनसंसर्गं परिहरेत्। सतां सङ्गं समाश्रयेत्। नोत्तमैरधमैर्वा विवादं कुर्यात्। शुष्कवैरं विवर्जयेत्। अल्पहानिं सोढ्वापि वैरं न कुर्यात्। स्नात्वा जलापनोदाय केशान् न निर्धूनयेत्। उत्थितो नाचामेत्। पादं पादेन नाक्रामेत्। गुरोरग्रे नोच्चासनं भजेत्। देवागारचतुष्पथान् माङ्गल्यानि नापसव्यं गच्छेत्। न उत्थाय न पथिषु मूत्रयेत्। श्लेश्मविण्मूत्ररक्तानि न लङ्घयेत्। श्लेश्मशिङ्घाणिके भोजनकाले नोत्सृजेत्। योषितो नावमन्येत नेर्ष्येत

न धिक्कुर्यात् न च विश्वसेत् नाविश्वासं लक्षयेत् । पूज्यान् अनभिवाद्य गृहान् न निःसरेत् । दीनान् साधून् अभ्युद्धरेत् । बहुश्रुतानुपासीत । हितं मितं कालेऽभिभाषेत । धीमान् ह्रीमान् क्षान्त आस्तिको विनीतः स्यात् । सर्वबन्धुरमत्सरी भीताश्वासनकृत् क्रुद्धान् सान्त्वयेत् । वर्षातपादिषु छत्री, रात्र्यटवीषु दण्डी सोपानत्को व्रजेत् । सत्यं प्रियञ्च ब्रूयात् । अप्रियञ्च सत्यमपि न ब्रूयात् । प्रियञ्च नानृतं ब्रूयात् । यद्धितं श्रेयश्च तदत्यन्तमप्रियमपि ब्रूयात् । अपृष्टोऽपि हितं ब्रूयात् यस्य नेच्छेत् पराभवम् ।

इत्थमस्माकं पौराणिकवाङ्मयानि कर्तव्याकर्तव्यविषये बहुषु स्थलेषु कथोपकथामाध्यमेन सरलतमभाषया मानवीयजीवनं सदाऽभिव्यञ्जयन्ति । पापपुण्यादिकं स्वर्गनरकादिकं च प्रदर्श्य मानवीयकर्तव्यादिकं नैतिकताञ्चावबोधयन्ति । दानं दयां सेवां निष्ठादिकं च वर्णयित्वा पुराणेषु मानवानां नैतिकगुणरूपेणैतानि प्रदर्शितानि वर्तन्ते ।

## अभ्यासः

### १. अतिसङ्क्षेपेण उत्तरयत

(क) चतुर्विधाः पुरुषार्थाः के ?

(ख) शुभकर्मणः फलं किम् ?

(ग) धर्मस्य वास्तवं रूपं किम् ?

(घ) कस्मै वासो न देयः ?

(ङ) कस्य सङ्गं न कुर्यात् ?

### २. सङ्क्षिप्तोत्तरं लिखत

(क) आचारः कीदृशो धर्मोऽस्ति ?

(ख) सदाचारिजनेन कीदृशमन्नं कथं वा भोक्तव्यम् ?

(ग) कीदृशानि मित्राणि त्याज्यानि ?

(घ) भुक्तशेषानि कानि वस्तूनि नाश्नीयात् ?

(ङ) विद्यार्थिभिः कीदृशः सदाचारो ग्रहीतव्यः ?

(च) **आचारहीनं न पुनन्ति वेदाः यदप्यधीताः सह षड्भिरङ्गैः ।**

**छन्दांस्येनं मृत्युकाले त्यजन्ति नीडं शकुन्ता इव जातपक्षाः ॥**

अस्य श्लोकस्याशयं सरलया गिरा लिखत ।

## ३. अधोलिखितानुच्छेदं पठित्वा तदनुवर्तिप्रश्ननानामुत्तरं लिखत

कस्मिँश्चिद् गुरुकुले आचार्यः प्रवचनं प्रारब्धवान् - सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम् । उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत । कथं व्यवहर्तव्यम् - ईश्वरः सर्वत्र सर्वदैव वर्तते इति मनसि कृत्वा सर्वेषां चराचराणां कल्याणं विधातव्यम् । स भगवान् सर्वेषां पिता । भगवान् सर्वेषामात्मा एव । कस्यचित् प्राणिनोऽनादरस्तु भगवतोऽनादर एव । सर्वैः प्राणिभिः सह तादात्म्यमनुभवनीयम् । युष्माकं मनसि कदापि सफलत्वे हर्षः, विफलत्वे विषादो वा मा भवतु । कामना हि सर्वगुणापहारिणी । सकामस्य मनोबलम्, इन्द्रियबलम्, तेजः, सत्यं च सर्वाणि विनश्यन्ति । शतहस्त समाहर सहस्रहस्त सङ्किर । केवलाघो भवति केवलादी । लोककल्याणवृत्तिर्हि भगवतः श्रेष्ठाराधना । सत्यमेव जयते नानृतम् ।

### ३.१. सङ्क्षेपेणोत्तरं दीयताम्

(क) कस्य कल्याणं विधातव्यम् ?

(ख) भगवतोऽनादरः कथं भवति ?

(ग) सकामजनस्य किं किं नश्यति ?

(घ) भगवत उत्तमा आराधना का ?

(ङ) कथं जनः केवलं पापी भवति ?

### ३.२. अधस्तनवाक्यानामर्थं लिखत

(क) सर्वैः प्राणिभिः सह तादात्म्यमनुभवनीयम् ।

(ख) शतहस्त समाहर सहस्रहस्त सङ्किर ।

(ग) केवलाघो भवति केवलादी ।

### ३.३. अनुच्छेदस्य रेखाङ्कितपदानामर्थं लिखत ।

### ३.४. रेखाङ्कितपदानां स्वकीयवाक्येषु प्रयोगं कुरुत ।

## ४. अनुच्छेदं पठित्वा सारांशं लिखत

अहो प्रभावो ब्रह्मचर्यस्य । आश्रमेऽस्मिन् न भवति भोगविलासादीनां कृते सामग्रीणां सङ्ग्रहस्य अपेक्षा । भोजनवस्त्रावासा अपि सरलतयोपलभ्यन्ते । तथा हि वनप्रदेशे कृषिमुपवनं च पालयन्त एव विद्यार्थिनः स्वास्थ्यप्रदानामन्नमूलफलशाकादीनामुपार्जनं कुर्वन्ति । वस्त्रार्थं कार्पासस्योत्पादनं

भवति । मुहूर्त्तमपि प्रतिदिनं तर्कुटचालनेन विद्यार्थिनो न केवलं स्वकीयवस्त्रार्थं सूत्रमुत्पादयन्ति अपि तु गुरूणां कृतेऽपि तैर्वस्त्रं निर्मीयते । वनवृक्षेभ्यो वल्कलानि प्राचुर्येण प्राप्यन्ते । वृक्षाणां शाखापत्रादिभिस्तेषामधस्ताद् रचिताः सुशरणाः पर्णशाला न केवलं विद्यार्थिनां वर्षाशीतोष्णादिबाधा हरन्ति अपि तु तत्रत्याः पशुपक्षिणोऽपि तासु सुसुखं वसन्ति । आश्रमस्थैर्जनैः पालिता रमणीयस्थलीषु विचरन्त्यो गावो द्विगुणं पयः संवर्द्धयन्ति । सत्यं हि तत्र गावः पयस्विन्यः । तासां दुग्धं तु जलादपि अधिकतरं पीयते आश्रमवासिभिः । सर्वत्र स्वच्छताविधानेन नद्या जलं समधिकं सुस्वादु वर्तते । तत्र सर्वाणि वन्यानि अहमहमिकयेवाश्रमवासिनां सुसेवां कर्तुमुद्यतानि प्रतिभान्ति । तत्र मयूराणां नर्तनस्य, कीराङ्गनानां सङ्गीतस्य, मृगाणां धावनस्य शाखामृगाणां प्लवनस्य च स्पर्धासु ब्रह्मचारिणामाचार्याणां च मनोरञ्जनं भवति । लतावृक्षवनस्पतिगुल्मकुञ्जादीनामधिकाधिकपुष्पफलवैपुल्यस्य स्पर्धा आश्रमवासिनां प्रकामसुखलाभाय सञ्जायते ।

## ५. अधोलिखितगद्यभागं पठित्वा सन्देशं लिखत

कस्मिँश्चिन्नगरे विपश्चिन्नामको महान् धार्मिको राजा राज्यं करोति स्म । कदाचिद् एष राजा किञ्चिल्लघुतमं पापमकरोत् । कालक्रमेण राजा विपश्चिद् एकस्मिन् दिने मृत्युं प्राप्य यमालयं सम्प्राप्तवान् । विपश्चिन्नामकं राजानं यमालयं सम्प्राप्तं दृष्ट्वा यमराजो भद्रमुखनामकं स्वदूतं सम्बोध्य उक्तवान्- “इमं विपश्चिन्नामकं राजानं नरकान् दर्शयित्वा स्वर्गं प्रति प्रेषय” इति । स भद्रमुखनामको यमदूतश्च क्रमशः सर्वान् नरकान् राजानं प्रादर्शयत् । राज्ञो जिज्ञासायां यमदूतश्चाशुभकर्मणां फलरूपेण नरकयातना प्राप्यत इति वर्णितवान् । एतस्मिन्नेव काले तत्र नरके एकमाश्चर्यमभवत् । यत्रापि नरके राजा गच्छति तत्रत्या नारकीया यातना अवरुद्धा भवन्ति स्म । कुम्भीपाकस्थं क्वथ्यमानमपि तैलं शीतलमभवत् । असिपत्रवनस्थानि पत्राणि वृक्षात् पतितानि । नरकस्थानि शस्त्रास्त्राणि चावगुण्ठितानि जातानि । तत्रत्याः पापिनश्च यत्किञ्चित् सुखमन्वभवन् । एतद् दृष्ट्वा राजा भद्रमुखं यमदूतमपृच्छत् “एतत् सर्वं किमस्ति ?” इति । स प्रत्युवाच- “हे राजन् ! तव पुण्यमयशरीरात् स्पर्शं कृत्वा यो वायुः प्रवहति तस्यैव पुण्यप्रतापेन सर्वा नारकीया यातना अवरुद्धा जाताः । अतो हे राजन् ! भवान् अग्रे चलतु । एते पापिनः स्वकर्मफलं भोक्ष्यन्ति” इति ।

यदा ततो राजा गन्तुमुद्यतस्तदा सर्वे नरकवासिनो जीवास्तारस्वरेण दीनभावनया चाकथयन्- “भो महाराज ! भवान् किञ्चित् कालमत्रैव तिष्ठतु । वयं भवतां शरणागताः स्मः । अस्मान् अस्मान्नरकात् त्रायस्व । भवतां दर्शनेन इदानीं वयं सुखमन्वभवाम । अतोऽस्मासु कृपां कुरु महाराज” इति । इत्थं दीनवचः श्रुत्वा राजा यमदूतं भद्रमुखमकथयत्- “भद्रमुख ! एते नारकीया जीवा मां दृष्ट्वाऽऽर्तनादं कुर्वाणाः सन्ति । अत एतान् दुःखितान् जीवान् परित्यज्येदानीमहं स्वर्गं नैव गमिष्यामि” इति । इत्थं परस्परं सम्भाषमाणौ विपश्चिद्भद्रमुखौ निकषा तस्मिन्नेव समये धर्मराजो देवेन्द्रश्च समुपस्थितौ अभूताम् । धर्मराज उक्तवान्- “महाराज ! भवता अहं भृशं सेवितोऽस्मि । भवान् नरके निवासं कर्तुं नार्हसि । भवान् मया सह स्वर्गं प्रति चलतु” इति । देवेन्द्रेणापि राजा स्वर्गायानुरुद्धः ।

तदा राजा उक्तवान्- “देवराज ! एतान् स्वकर्मफलभुञ्जानानप्यार्ताञ्जीवान् पश्यतो मे हृदयो विदीर्यते । एतान् शरणागताञ्जीवान् परित्यज्यैकाकी स्वर्गं न जिगमिषामि । भवान् मम पुण्यराशिं कियदस्तीत्येतन्मां कथयतु” इति ।

धर्मराज उक्तवान्- “राजन् ! यावन्तः समुद्रे जलविन्दवः, यावन्तो दिवि तारकाः, यावत्यो वृष्टेर्धाराः, यावन्तो बालुकाकणास्तावत्यो भवतां पुण्यपुञ्जस्य गणना न सन्ति । अपरश्च विषयो वर्तते यद् इदानीमेव नारकीयजीवानामुपरि या दया भवता प्रदर्शिता तया च भवतां पुण्यपुञ्जो लक्षगुणितः सञ्जातः” इति । तदा राजा उक्तवान् - “भगवन् ! इदमित्थञ्चेदस्मदीयेन पुण्यप्रभावेण एते सर्वे नारकीया जीवा यातनाभिर्मुक्ताः सन्तः पुण्यलोकान् गच्छेयुः” इति । इति तयोः सम्भाषमाणयोः सतोरेव आकाशे दुन्दुभिनादः सञ्जातः । सर्वे देवगणाश्च राज्ञो जयजयकारध्वनिं कुर्वाणाः पुष्पवृष्टिं कर्तुमारब्धाः । नारकीया जीवाश्च विविधविमानान्यारुह्य स्वर्गलोकं प्रति प्रस्थिताः । राजानं विपश्चितं च विष्णुपार्षदा विमाने संस्थाप्य विष्णोर्धाम वैकुण्ठलोकं नीतवन्तः ।

६. **सदाचारपरिपालनेन मानवजीवने प्राप्तव्यान् लाभान् विवेचयत ।**

७. **सदाचारप्रतिपादने पुराणानां भूमिकां वर्णयत ।**

८. **विद्यार्थिभिः कर्तव्यानि सदाचारपरकाणि कार्याणि दर्शयत ।**

# ब्रह्मचिन्तनस्योपलब्धिः



मानवसमाजस्य सुव्यवस्थायै अस्माकं शास्त्रकाराः परम्पराप्राप्तानां धर्मानुकूलनियमाचाराणामथ च मानवकर्तव्यानां मानवशास्त्ररूपेण मानवधर्मशास्त्ररूपेण च लोके प्रवर्तनं कृतवन्तो येन सामाजिकव्यवहारसञ्चालनं भवेत् । विहितेऽविहिते वा कर्मणि अथवा कार्याकार्याव्यवस्थायां सन्देहे सति निर्णायकं प्रामाणिकं शास्त्रं धर्मशास्त्रमेव ।

यथा श्रुतिशब्देन वेदानां निर्देशो भवति तथैव स्मृतिशब्देन च धर्मशास्त्राणि विज्ञायन्ते ।स्मृतयश्च बह्व्यः सन्ति । शास्त्रकारैर्मानवसमाजस्याभ्युन्नतये यो धर्मः प्रणिहितः स वेदमूलक एव वर्तते । तत्र खलु मानवजीवनस्य धर्मार्थकाममोक्षरूपाणि चत्वारि लक्ष्याणि निर्धारितानि सन्ति ।एतानि एव पुरुषार्थचतुष्टयपदेन व्यवह्रियन्ते । श्रुतिषु स्मृतिषु च चतुर्णां पुरुषार्थानां प्रतिपादनं विहितं वर्तते । पुरुषार्थचतुष्टयप्राप्तये समुपयुक्तानां मार्गाणां च निर्देशोऽपि तत्तच्छास्त्रेषु वर्तते । तत्र वर्णितमार्गनिर्देशानुसारेण विहितैः कर्मभिः पुरुषार्थचतुष्टयस्योपलब्धिश्च भवतीति वर्णितं विद्यते, येन सामाजिकी सुव्यवस्था च प्रचलन्ती अस्ति । नियमविरुद्धव्यवहारे क्रियमाणे समाजेऽव्यवस्था जनसमुदायेऽसुरक्षा भयञ्च वर्द्धते ।

पुरुषार्थचतुष्टये प्रथमपुरुषार्थो धर्म इति वर्तते । श्रुतिस्मृतिभिः प्रतिपादित आचारः परमो धर्मो निगद्यते । आत्मनो हितेच्छुना सर्वप्राणिमात्रस्य च हितेच्छुना सदाचारधर्मस्यानुपालनं सर्वदा अवश्यमेव कर्तव्यं भवति । धैर्यं क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः शास्त्राणां तत्त्वज्ञानरूपा धीरात्मज्ञानरूपा विद्या सत्यमक्रोधश्चेति सामान्यधर्मरूपेण सामाजिकसुव्यवस्थायै नितरां प्रवर्तन्ते । एतान् सामान्यधर्मान् सर्वेऽपि विवेकिनो जनाः सम्यग् विजानन्ति पालयन्ति च ।

अद्यत्वे जगति जना आधिव्याधिपरिपीडिता जराजन्ममरणादिदुःखदावाग्निदग्धाश्च दृश्यन्ते । अस्य कारणं खलु सदाचाररहितं जीवनमेव वर्तते । अज्ञानान्धतमसि निमीलितनयनो जनो भौतिकविषयेषु एव

रममाणस्त्रिविधतापैः सन्तप्तो वर्तते, मोहग्रस्तश्च दृश्यते । तापविनाशपूर्वकं मोहापहाराय आनन्दावाप्तये मोक्षाधिगमाय च प्रयत्नशीलो मानवो दुर्लभ एव । परन्तु सदाचारधर्मपरिपालनरतो मानवस्त्रिविधतापविनाशाय मोहापहाराय मोक्षाधिगमाय च जगच्छरण्यं शुद्धबुद्धमुक्तस्वभावं जगदीश्वरमाश्रयते । स एव जगदीश्वरो वेदान्तदर्शनानुसारेण ब्रह्म इति पदेनाख्यायते । ब्रह्मणः स्वरूपम् उपनिषत्सु बहुधा प्रतिपादितं वर्तते । उपनिषदनुसारेण स परमात्माद्वितीयः सर्वव्यापकः सर्वान्तर्यामी साक्षी चैतन्यस्वरूपो निर्गुणश्च वर्तते । तत्समो न कश्चिदस्ति न ततोऽभ्यधिकश्च कश्चन वर्तते । अस्य शक्तिरपूर्वा विविधगुणमयी चास्ति । स ऊर्णनाभिरिव स्वकीयया माययेदं सकलं जगत् सृजति अवति अन्ते संहरति च । अस्यैव परब्रह्मणस्तेजसा निखिलं जगत् प्रकाशते । स एव प्रकाशानामपि प्रकाशस्तेजसां तेजश्च वर्तते ।

जगति किं सत्यम् ? किमसत्यं मिथ्या वेति जिज्ञासा भवति । सत्यमिति पदेन यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति, तत्सत्यमिति ज्ञायते । अथवा यद् वस्तु शाश्वतिकं परिवर्तनरहितमविनश्वरं च तत्सत्यम्, अतोऽन्यदसत्यं मिथ्या वा । एतेन सिद्ध्यति यज्जगतः परिवर्तनशीलत्वेन जगदसत्यम्, शाश्वतिकमपरिवर्तनशीलञ्च ब्रह्म सत्यम् । अतस्तस्य सत्ता सत्यता वा न केनापि रूपेणापलपितुं शक्यते । अस्यैव सर्वशक्तिमतः सत्यवतो ब्रह्मणश्चिन्तनेन दशविधधर्मानुपालनपराः सदाचारिणो जनाः परमगतिं मोक्षञ्च लभन्ते । ब्रह्मचिन्तनस्योपलब्धिरपि मोक्षप्राप्तिरेव वर्तते ।

ब्रह्मचिन्तनपरो मानवः प्रवृत्तिधर्मस्य त्यागेन निवृत्तिमार्गस्य सेवनेन च पञ्चभूतान्यतिक्रामति । सर्वप्राणिषु आत्मानम्, स्वात्मनि च समग्रं चराचरं जगत् पश्यन् आत्मयाजी स्वाराज्यं ब्रह्मत्वमधिगच्छति । अथवा आत्मानमात्मना पश्यन् सर्वसमतामधिगम्य ब्रह्मरूपं परमं पदं प्राप्नोति ।

## अभ्यासः

### १. अतिसङ्क्षेपेण उत्तरयत

(क) कार्याकार्याव्यवस्थितेः को निर्णायको भवति ?

(ख) मानवसमाजस्य व्यवस्थायै धर्मस्य मूलं किमस्ति ?

(ग) आत्मनो हितेच्छुना किं कर्तव्यम् ?

(घ) वर्तमाने जगति कीदृशा मानवा दृश्यन्ते ?

(ङ) ब्रह्मणो वास्तवं स्वरूपं कुत्र निर्दिष्टं वर्तते ?

### २. सङ्क्षिप्तोत्तरं लिखत

(क) सामान्यधर्मरूपेण के प्रवर्तन्ते ?

(ख) जगदीश्वरस्य स्वरूपं किमस्ति ?

(ग) सत्यं नाम किम् ?

(घ) प्रवृत्तिमार्गस्य त्यागेन निवृत्तिमार्गस्यानुसरणेन किं भवति ?

(ङ) ब्रह्मचिन्तनस्योपलब्धिः का ?

## ३. अधोलिखितमनुच्छेदं पठित्वा तदनुवर्तिप्रश्नानामुत्तरं लिखत

बाल्येऽपि सुदामा ब्रह्मर्षिर्भवितुमियेष । स ब्रह्मार्पणमेवात्मनोऽद्वितीयं स्वार्थं मन्यमानः साफल्यमभजत । तदर्थं तस्य दूरदर्शिता प्रसिद्धैव । स्वभोजनात् स कृष्णाय किञ्चिदपि न ददाति, विचारयति च । कृष्णाय यः किञ्चिदपि ददाति स कृष्णेन धनी क्रियते । धनं तु ब्रह्मविनाशाय भवति । अतः कृष्णाय किञ्चिदपि न देयम् । सुदामा आचार्याज्ञापालनाय स्वकीयं नैष्ठिकब्रह्मचर्यव्रतस्य निश्चयं त्यजति । स सर्वथा ग्रामोपासको वर्तते । विवाहानन्तरं स समृद्धमपि श्वसुरधनं न स्वीकरोति, स्पष्टं वदति च - “नाहं ग्रामरीतिं कुरीतिं वा परित्यज्य नागररीतिं ग्रहीतुकामः” इति । सुदाम्नो दृढविचारस्तु प्रकाशित एव । स एव कृष्णेन साधु पर्यालोचितः- “नायं सुदामा तर्केण पराजितो भविष्यति, अस्माकं मतं स्वापतेयं वा स्वीकरिष्यति” इति । अनेन सुदाम्नोऽपरिग्रहः सत्याग्रहश्च प्रतिफलतः । सुदामा नागरिकसभ्यतायां कष्टं समीक्षते । तस्य मतेन नगरधूलिर्महामुनीनामपि साधुत्वमपाकरोति । कृष्णो मम मित्रं सदपि सदैव मम हितचिन्तको नास्तीति तस्याभिमतमासीत् । यदा कदा स कृष्णस्याग्रहं न मन्यते, विशेषत आध्यात्मिकवृत्तिपरेषु जीवनादर्शेषु कुत्रापि स कृष्णस्य सहयात्रां नैव सहते । सुदाम्नो वचनेषु तस्य चरितं प्रतिफलति । यथा- “न हि कश्चिद् दरिद्रो धनिकादवरः । आजीवनं नित्यमेव ब्रह्मविद्याया निःशुल्कमध्यापनं करिष्यामि । परिग्रहो हि नाम मानवं सत्पथाद् दूरमपसारयति । नाहं गृह्णामि काकिणीमपि श्वशुरात् । उच्चेषु नियोगेषु सिद्ध्यर्थमपरिग्रहवृत्तेस्तपसः साधनायाश्चापेक्षा भवति । गृहाश्रमेण मया सर्वेषां गृहस्थानां चारित्रिकाभ्युत्थानाय प्रयतनीयम् । अहं तु सर्वथा धनपरित्यागमात्मकल्याणाय मन्ये । अहं खलु स्वयं सेवकः सुदामा” इति । पेशलमेव सुदाम्नः कृतित्वम् । तस्य ब्रह्मशक्तिः सर्वेषु पराक्रमेषु प्रतिफलति । स्वकीये आश्रमेऽसङ्ख्यानां ब्रह्मचारिणामध्ययनाध्यापनयोस्तेषां सम्भरणस्य व्यक्तित्वविकासस्य च कृतेऽनिशं तस्य महान् परिश्रमः प्रशस्य एव ।

**प्रश्नाः**

(क) सुदामा कृष्णाय किमर्थं किञ्चिदपि न ददाति ?

(ख) सुदामा कस्य धनं किञ्चिदपि न स्वीकरोति ?

(ग) कृष्णस्य विषये सुदाम्नः कीदृशो विचारोऽस्ति ?

(घ) अनुच्छेदमाश्रित्य सुदाम्नश्चरित्रं चित्रयत ।

## ४. अनुच्छेदं पठित्वा सारांशं लिखत

साम्प्रतिके युगे विज्ञानस्य महत्त्वमधिकं प्रतीयते । अद्य विज्ञानं प्राकृतिकानि वस्तून्यपि आत्मसात् कर्तुं प्रयतमानं वर्तते । यत्र यत्र दृष्टिर्दीयते तत्र तत्र विज्ञानस्यैव चमत्कारा दृश्यन्ते आकर्ण्यन्ते च । अद्य विज्ञानमन्तरेण शयनं भक्षणं भ्रमणं नर्तनं सम्भाषणं प्रेक्षणं श्रवणं श्वसनं गमनं सर्वमेवास्वाभाविकमेव प्रतीयते । सम्प्रति न कोऽपि देश एतादृशोऽस्ति यत्र विज्ञानिनो यस्मिन् कस्मिन्नपि नवीनविषयस्य गवेषणायां दत्तचित्ता न स्युः । अधुना विज्ञानस्य प्रभावेण असम्भवोऽपि सम्भवो जातः । यात्रायां चिकित्सायां सम्भाषणव्यवहारे च आश्चर्यजनका आविष्काराः पुरस्कृता वैज्ञानिकैः । विज्ञानं प्रतिदिनं प्रतिक्षणं वा उन्नतिमार्गाश्रितं वर्तते । विज्ञानेन यात्रायां यत्सौकर्यं सम्पादितं तदाशातीतमेव । को जानाति स्म, मासमात्रगम्येऽध्वनि घण्टात्रयं पर्याप्तम् । विविधयात्रासाधनमाध्यमेन गेहे स्थित एव मानवः गणनया निश्चयं करोति- "एतस्मिन् समये यद्यहं गृहाद् गमिष्यामि, तदनु इयता कालेन तत्र नूनं प्राप्स्यामि" इति । वयं पुराणेषु साश्चर्यं पुष्पकादिविमानानां वार्ता अपठाम, तानि विमानानि देवेभ्य एव सुलभानि आसन् । अद्य तु यः कोऽपि धनवान् कामयते स विमानवरमारूढो जायते । एवमेव सूचनाप्रविधिक्षेत्रे तु विज्ञानं सर्वातिशायि वर्तते । पुरा कपोतहंसादिपक्षिणां माध्यमेन जङ्घालपुरुषद्वारा संवादप्रेषणेन अन्योऽन्यसमाचारैर्बहुकालानन्तरमभिज्ञा भवन्ति स्म जनाः । किन्त्वद्य परस्परमन्योऽन्यमुखसमीक्षणेन वार्तां कर्तुं शक्नोति । इमेल-इन्टरनेटादिमाध्यमेन च यत्र तत्र निमेषाभ्यन्तर एव सूचनां प्रेषयितुं शक्यते । एवमेव विद्युत्क्षेत्रे, मुद्रणक्षेत्रे, चित्रक्षेत्रे, चिकित्साक्षेत्रे, मनोविनोदक्षेत्रे यस्मिन् कस्मिन्नपि क्षेत्रे वदामः सर्वत्रापि जीवनसारल्याय विज्ञानस्य प्रभावो वर्तते । अस्य सदुपयोगः क्रियते चेन्मानवस्य कृते इदं बहुकल्याणकारि वर्तते, अस्य दुरुपयोगो भवेच्चेदिदं सर्वक्षयायापि भविष्यति । विचारशीलमानवमनसि समायाति यद्-

**विज्ञा विज्ञानदृष्ट्या यद् यत् कुर्वन्ति नवं नवम् ।**
**आश्चर्यं सुखशान्त्यर्थं भविता तत् क्षयाय च ॥**

## ५. अधोलिखितगद्यभागं पठित्वा प्रश्नान् उत्तरयत

एकस्मिन् समये देवर्षिर्नारदस्तपस्तप्तुं हिमालयस्यातिरमणीयगुहामगच्छत् । तत्र स तपस्तप्त्वा चिरकालं व्यतीयाय । तदानीं नारदस्य तपस्यां दृष्ट्वा देवराज इन्द्रो महतीं चिन्तामवाप । सन्तप्तेन देवेन्द्रेण तत्तपः भङ्गयितुं कामदेवोऽन्वरोधि । कामदेवोऽपि स्वकीयसमस्ताभिः कलाभिर्नारदस्य तपसि विघ्नं कर्तुं प्रयत्नमकरोत्, परन्तु स साफल्यं नैवावाप । महादेवस्यानुग्रहेण कामदेवस्य गर्वश्चूर्णोऽभवत् । वस्तुतस्तु महादेवस्य कृपया नारदे कामदेवस्य प्रभावो नैव जातः । प्राक्काले एतस्मिनेवाश्रमे भगवता शिवेनापि महत्तरं तपोऽनुष्ठितमासीत्, अत्रैव च कामदेवोऽपि भस्मसात्कृत आसीत् । तदानीं तत्पत्न्या रत्याः प्रार्थनायां देवानां च याचनायां भगवता शङ्करेण कतिचित्कालानन्तरं कामदेवस्य जीवनाय वरदानं दत्तमासीत् । परन्तु नारदे "मया कामदेवोपरि विजयः प्राप्तः" इति

महान् भ्रमः सञ्जातः। शिवमायामोहितत्वेन नारदस्य वास्तविकं ज्ञानं नाभवत्। नारदो झटित्येव शिवधाम कैलाशमगच्छत्। तत्र स भगवन्तं सदाशिवं प्रणम्य तं कामदेवविजयवृत्तान्तं गर्वभरितवचसा श्रावितवान्। तद् वृत्तान्तं श्रुत्वा भगवान् शिवो नारदं प्रशंसमानस्तस्मै "इमं वृत्तान्तं भगवान विष्णुः कदाचिदपि नैव श्रावयितव्यः" इति निरदिशत्। परन्तु नारदमनसि मदाङ्कुरं पल्लवितमासीत्। अतो देवर्षिर्नारदो विष्णुलोकं गत्वा तत्र विष्णुना सह स्वकीयकामदेवविजयवृत्तान्तं साभिमानं श्रावितवान्। नारदस्य मदगर्वितं वचनं श्रुत्वा भगवान् विष्णुरपि मनसा यथार्थमजानात्। ततश्च नारदं प्रशंसमानो विष्णुरुक्तवान्- "हे नारद ! त्वं खलु नैष्ठिको ब्रह्मचारी, सदा ज्ञानेन वैराग्येण च युक्तोऽसि। अतस्त्वयि कामविकारः कथं जायेत" इति। भगवतो विष्णोः प्रशंसापरकाणि वचनानि श्रुत्वा प्रसन्नो नारदस्ततः प्रस्थितवान्।

ततो नारदस्य प्रस्थानमार्गे भगवता श्रीहरिणा कञ्चिदतिसुन्दरं मनोहरं विष्णुलोकवैकुण्ठादपि देदीप्यमानं नगरं परिकल्पितम्। तस्मिन्नगरे कश्चिच्छीलनिधिनामको राजा राज्यं करोति स्म। तस्य देवकन्या इव प्रतीयमाना एका कन्या विवाहवयस्का आसीत्। देवर्षिर्नारदस्तन्नगरं दृष्ट्वाऽतीव सम्मुह्य राजप्रासादं गतवान्। राजा शीलनिधिः श्रीमतीनामिकां तां कन्यां नारदस्य चरणयोः प्रणामाय आदिष्टवान्। ततो नारदं च राजा उक्तवान् - "महर्षे नारद ! इयं मदीया पुत्री स्वस्य विवाहं कर्तुं स्वयंवराय जिगमिषति। अस्या दैवं निर्दिश्यताम्" इति। नारदोऽपि कन्यायाः शुभलक्षणानि दृष्ट्वा अत्यन्तप्रभावभावितस्तस्याः सुखसौभाग्यादिकं गुणाँश्च प्रशंस्य ततो निर्गतवान्।

नारदस्य मनसि 'कन्येयं कथं मदीया भवेत्' इति विचार उत्पन्नः। 'कथं वा अनया मदीयो विवाहः सम्पद्येत' इति विचिन्तयन् स विष्णोर्धाम वैकुण्ठं गतवान्। विष्णुना साकं रहसि स स्वाभिप्रायं निवेद्य 'स्वकीयं स्वरूपं मह्यं ददातु, येन स्वरूपेण सा मां वृणुयात्' इति प्रार्थितवान्। विष्णुरपि नारदम् 'अहं तव हितसाधनं करिष्ये' इत्युक्त्वा सान्त्वयामास। तदनन्तरं विष्णुरपि नारदाय मुखं तु वानरस्य परन्तु शेषाङ्गानि स्वकीयाभिरूपाणि दत्त्वा ततोऽन्तर्धानमगात्। रहस्यमिदमविज्ञायैव नारदः स्वयम्वरस्थलं प्राप्तवान्। सुलक्षणा राजकुमारी स्वयंवरस्थलमध्ये उपस्थाय स्वमनोऽनुरूपं वरमन्वेष्टुं प्रारब्धवती। नारदस्य वानरमुखं दृष्ट्वा कुपिता सती सा मनोवाञ्छितं वरं द्रष्टुमन्यत्र दृष्टिं प्रसारितवती। तदानीं राज्ञः सुवेषं धृत्वा भगवान् विष्णुरपि तत्रैवागमत्। तदनन्तरं भगवतो विष्णोः कण्ठे स्वयंवरमालां समर्प्य राजकुमारी ततोऽन्तर्धानमगात्।

नारदस्य वानरमुखाकृतिरियं स्वयंवरस्थले शिवपार्षदद्वयं विहायान्येन केनापि नैवादृश्यत। स्वयंवरे तां स्थितिं विलोक्य तत्र स्थिताभ्यां शिवपार्षदाभ्यां नारद उपहसितः, स्वमुखबिम्बं द्रष्टुं च कथितः। तदनन्तरमेव नारदो वास्तविकतां परिज्ञाय क्रोधेन च व्याकुलो जातः। नारदः शिवपार्षदाभ्यां राक्षसत्वे शापमदात्। तदनन्तरं नारदो विष्णुलोकं गत्वा शिवमायामोहितः सन् विष्णुमकथयत्- "त्वया स्त्रियै अहं व्याकुलीकृतः। विष्णो ! त्वमपि मनुष्ययोनिं गच्छ, स्त्रीवियोगेन च तत्र त्वमपि धक्ष्यसि। त्वया मह्यं वानरसदृशं मुखं प्रदत्तम्, तादृशा वानरा एव तव सहायका भविष्यन्ति" इति।

एवमुक्त्वा नारदस्ततो निर्गतवान् । तदानीमेव भगवता शङ्करेण स्वकीया विश्वमोहिनी शिवमाया समाकृष्टा । सा शिवमाया यदा तिरोहिता तदा नारदोऽपि शुद्धबुद्ध्याऽलङ्कृतः । सर्वा अपि व्याकुलता नष्टा जाता । तदनन्तरं प्रत्यावर्त्य नारदो भगवतो विष्णोश्चरणयोर्निपत्य पश्चात्तापमकरोत् । श्रीविष्णुः नारदाय शिवतत्त्वमुपदिदेश ।

(क) देवराज इन्द्रः किमर्थं महतीं चिन्तां प्रापत् ?

(ख) नारदस्य मनसि किमर्थं मदः समुत्पन्नः ?

(ग) नारदः किमर्थं विष्णुलोकं वैकुण्ठं गतवान् ?

(घ) विष्णुना किमर्थमतिसुन्दरं नगरं निर्मितम् ?

(ङ) सुलक्षणा राजकुमारी किमर्थं कुपितवती ?

(च) नारदः किमर्थमुपहसितः ?

**६. ब्रह्मचिन्तनस्य लाभं वर्णयत ।**

**७. मानवजीवने सामाजिकव्यवस्थानिर्वहणाय कीदृशी आवश्यकता वर्तते ? तर्कान् उपस्थापयत ।**

**८. ब्रह्मचिन्तनं विद्यार्थिनां स्वाध्ययनाय कीदृशं साहाय्यं करोति ? विवेचयत ।**

**९. नेपाले ब्रह्मचिन्तने कीदृशा जनाः प्रवृत्ता दृश्यन्ते ? शिक्षकाद् विज्ञाय सङ्क्षिप्तानुच्छेदं रचयत ।**

# शौचाचारः



मानवजीवनस्य मुख्याधारस्तस्याचार एव विद्यते । अस्यार्थो भवति- आचरणम्, व्यवहारः, जीवनस्य नियमा वा । आचरणमिति पदं सद्व्यवहारो नैतिकाचारो वेत्यर्थे प्रयुज्यते । अनेन धर्मशास्त्रेषु निर्दिष्टाः कर्तव्यनियमाः, जीवनशैली पद्धतिर्वेत्यवगम्यते । अस्य प्रयोजनं प्रायशो मानवशास्त्रेषु धर्मशास्त्रेषु दर्शनशास्त्रेषु च विशेषरूपेण गृह्यते । धर्मशास्त्रेषु मानवशास्त्रेषु चाचारो धर्मस्य प्रथममङ्गमित्युक्तम् । अत आचरणमेव धर्मस्य मूलं वर्तते ।

शौचाचार इत्यस्यार्थो भवति- स्वच्छता, शुद्धतासम्बन्धिनो नियमा व्यवहारा वेति । शौचशब्देन च स्वच्छता पवित्रता चेति विज्ञायते चेदाचारशब्देन च नियमाचरणमावगम्यते । तेन शौचाचार इति विषये शरीरस्य स्वच्छता शारीरिकं शौचम्, परिधानानां स्वच्छता वस्त्रशौचम्, मानसिकतायाः पवित्रता मनःशौचम्, भोज्यपदार्थेषु शुद्धता आहारशौचम्, धार्मिकव्यवहारेषु शुद्धाचारो धार्मिकशौचम्, मूत्रपुरीषोत्सर्गसम्बन्धिनी शुद्धता वायुमलादिशौचमित्यादयो विषयाः समागच्छन्ति । अत एवोक्तं वर्तते- 'शौचं हि महान् धर्मः' इति । 'शौचाचार' इति पदेन न केवलं शारीरिकी शुद्धिर्विचार्यते अपि त्वात्मिकी मानसिकी च पवित्रता विज्ञायते । शौचाचारेण च शारीरिकं मानसिकं सामाजिकमाध्यात्मिकं च जीवनं पवित्रयितुं शक्यते ।

मानवजन्मनो मूलं शौचाचार एव, अतो मानवैः शौचाचारविषये सदा प्रयत्नशीलैर्भवितव्यम् । शौचाचाराकरणे मानवैर्विहिताः सर्वा अपि क्रिया निष्फला भवन्ति । शरीरस्य शुद्धये नित्यस्नानम्, भोजनात् पूर्वं पश्चाच्च हस्तपादयोः प्रक्षालनम्, मुखस्य स्वच्छतायै दुर्गन्धनाशाय च नित्यं दन्तधावनम्, नखानां नियमितच्छेदनं नियमितकेशसम्भारः, मलमूत्रादित्यागनियमाश्च शारीरिकशौचान्तरागच्छन्ति । मलिनवस्त्राणां यथाकालं प्रक्षालनेन नित्यं स्वच्छवस्त्राणां धारणेन च वस्त्रशुद्धिर्भवति । धार्मिकक्रियासु च विशिष्टं पवित्रं वस्त्रं धारणीयं भवति ।

मनोवृत्तिर्यदि अशुद्धा भवति तर्हि मानवव्यवहारोऽपि कलुषित एव भवति। तस्मान्मानसिकी शुद्धिरपेक्षिता भवति। मानसिकमलजनकानामीर्ष्याद्वेषासूयाक्रोधादीनां त्यागेन अशुभविचारपरित्यागपूर्वकमहिंसा-करुणा-सत्य-शान्त्यादीनां मनसि सन्धारणेन सद्विचाराणां पालनेन च मनःशौचं भवति। शुद्धस्य स्वच्छस्य स्वस्थस्य च भोजनस्य सेवनेन, पर्युषितदूषितभावदुष्टादि-भोजनत्यागेन, पाकशालायाः पाकक्रियायाश्च शुद्धतायै दत्तावधानेन चाहारशौचं भवति। आत्मनः शुद्धिं प्राप्तुं ध्यान-जप-पूजा-स्वाध्यायादयः कर्तव्याः। धार्मिकक्रियासु मनसो वाण्याः शरीरस्य च शुद्धिरपेक्ष्यते। धर्मस्याङ्गत्वेन च सदाचारपालनंमात्मिकशौचाचारो निगद्यते। असद्व्यवहारस्य परित्यागः कर्तव्यः। असत्सङ्गो दुर्व्यसनं च सर्वथा त्याज्यम्। समाजे परस्परं समादरः स्नेहश्च पालनीयो भवति। अयमेव सामाजिकशौचाचारः कथ्यते। एते शौचाचारा मानवजीवनं स्वच्छं स्वास्थ्यकरञ्च विधातुमाध्यात्मिकमार्गे उन्नेतुं च परमावश्यकाः। शुद्धता मानवस्य आभ्यन्तरिकं बाह्यं च जीवनं सन्तुलितं पवित्रं सुदृढं च कर्तुं सहायिका भवति। एष शौचाचारो न केवलं धर्मस्याङ्गमेव, अपि तु स्वस्थजीवनस्य मार्गोऽप्यस्ति।

प्रातरुत्थाय नैर्ऋत्यामावसथाद् दूरं गत्वा यत्नेन ष्ठीवनोच्छ्वासवर्जितो मौनी सन् गृहस्थो यज्ञोपवीतं पृष्ठतः कण्ठलम्बितं कृत्वा ब्रह्मचारी च कर्णे निधाय समुचिते स्थाने मूत्रपुरीषे उत्सृजेत्। कृष्टक्षेत्रे, सस्यमध्ये, गोष्ठे, जनसंसदि, मार्गे, नद्यादितीर्थेषु, अप्सु, तीरे, श्मशाने च मुत्रपुरीषे नोत्सृजेत्। ग्रामे नगरे च यत्रतत्र मलत्यागः सर्वथा वर्जनीयः। जलाशयानां समीपे मलादीनां त्यागेन जलप्रदूषणं भवति रोगाणां सङ्क्रमणञ्च जायते। अनापदि दिवा उदङ्मुखो रात्रौ दक्षिणामुखो मुत्रपुरीषे उत्सृजेत्। मल-मूत्र-वायूनां दीर्घकालपर्यन्तमवरोधनं स्वास्थ्याय हानिकारकं जायते। मलमूत्रत्यागसमये उक्थाशनं (उत्कटुकासनं) स्वास्थ्याय सुकरं भवति। प्रतिदिनं पञ्चनिमेषपर्यन्तमुक्थाशनं पाचनतन्त्राय च लाभदायकं भवतीति आयुर्वेदशास्त्रे वर्ण्यते।

शरीरशुद्धये जलाशयस्य तीराच्छ्वेतां मृत्तिकां प्रत्येकवारमार्द्रामलकप्रमाणां गृह्णीयात्। अन्तर्जलात्, देवालयात्, वल्मीकात्, मूषकोत्कराच्च मृत्तिका नैव ग्राह्या। सर्वतो यावद्गन्धक्षयः स्यात् तावन्मलद्वारं हस्तौ पादौ च प्रक्षालयेत्। वामहस्तेन नाभेरधोभागे दक्षिणहस्तेन नाभेरूर्ध्वभागे च प्रक्षालनं विधेयम्। अन्तःशुद्ध्यर्थं शनैः शनैः पञ्चगण्डूषान् कुर्यात्, त्रिवारं सलिलं पिबेत्, द्विश्च मुखं परिमार्जयेत्। ततो दत्तावधानो दन्तधावनं कुर्यात्। ततः स्वाचान्तः सुस्नातः केशप्रसाधनम्, आदर्शे दर्शनम्, चक्षुषो रञ्जनम्, गोष्ठदूर्वाद्यालम्भनानि मङ्गलानि कुर्यात्। स्नातो देवर्षिपितृतर्पणं कुर्यात्।

प्रातःसायंसन्ध्ययोर्जपः, दन्तधावनम्, भोजनम्, देवकार्यम्, पितृकार्यञ्च मौनमाचर्य विधातव्यम्। अत्युत्साहे, मैथुनसमये, गुरुजनादिमान्यजनानां समीपे, यज्ञसम्पादनसमये, दानसमये, स्वाध्यायकाले च मौनमाचरणीयम्।

आचारस्य पालनं धर्माचरणम्, आचारस्य भ्रष्टताऽधर्मस्याचरणमिति विज्ञायते। यस्याचारभ्रष्टता भवति तज्जन्यदोषशोधनाय विभिन्ना उपायाः शास्त्रेषु निर्दिष्टाः सन्ति। आचारभ्रष्टस्य शुद्ध्यै प्रायश्चित्तानि

निर्दिष्टानि सन्ति । दोषविशेषानुसारेण प्रायश्चित्तार्थं तपः, व्रतानि, दानानि, हवनानि, जपा वा अनुशंस्यन्ते । यद्याचारभ्रष्टता अज्ञानतो विहिता वर्तते चेद् गङ्गास्नानादिकम्, मन्त्रजपः, गोदानादिकञ्च शास्त्रेषु निर्दिष्टं वर्तते । ज्ञानेऽपि प्रमादेनानाचारो विधीयते चेदितोऽप्यधिकं द्विगुणं चतुर्गुणं वेति प्रायश्चित्तमावश्यकमिति शास्त्रेषु व्यवस्था वर्तते । कठोरं तपोऽनुष्ठायात्मशुद्धिश्च कर्तव्या भवति कतिपयेष्वनाचारेषु । इयं प्रायश्चित्तव्यवस्था विशेषत आत्मनिग्रहं संयमं च लक्ष्यीकरोति । दोषनिवारणाय सुवर्णदानमन्नदानं भूमिदानं वस्त्रदानादिकं महत्त्वपूर्णं मन्यते । भगवन्नामस्मरणमाचारभ्रष्टस्य मनःशुद्धिं करोति । सत्कर्माणि अनाथसेवा विद्यासम्वर्द्धनं समाजोपकारकं कार्यं च दोषपरिहारायानुशंस्यन्ते । दुष्टसङ्गं परित्यज्य सत्पुरुषसङ्गे वर्त्तनमपि महत्त्वपूर्णं भवति । प्रायश्चित्तं दोषावबोधपुरस्सरमेव निर्णीयते । धर्मशास्त्रानुसारमाचारभ्रष्टस्य शुद्धये तस्यापराधस्य प्रकृतिं गाम्भीर्यं चित्तवृत्तिं चावलोक्य गुरुभिर्यन्निर्धार्यते तदनुसर्तव्यं भवति । मलमूत्रोत्सर्जनकाले बुद्धिमता नरेण जलपात्रस्पर्शो न कर्तव्यः । अज्ञानेन स्पर्शे सति प्रायश्चित्तं कर्तव्यम् । मोहेन प्रमादेन च स्पर्शे सति प्रायश्चित्तार्थं त्रिरात्रं जलाहारमात्रं कृत्वा गायत्रीमन्त्रजपाच्च शुद्धिर्भवति ।

मलमूत्राशौचाचारो मानवजीवनस्य अतीव महत्त्वपूर्णो विषयो वर्तते । अस्योद्देश्यं मलमूत्रत्यागसन्दर्भे शारीरिक-मानसिक-सामाजिकशुद्धीकरणमारोग्यसंरक्षणञ्च वर्तते । यस्य पालनं न केवलं वैयक्तिकस्वच्छतामेव, अपि तु समाजस्य स्वच्छतामपि संरक्षति । धर्मशास्त्रेषु आयुर्वेदे पर्यावरणीयशास्त्रे च मलमूत्रोत्सर्जनविषये निश्चिता आचारा निर्दिष्टाः सन्ति । एषां पालनेन स्वस्थता पवित्रता च सुनिश्चिता भवति । मलस्य मूत्रस्य चाव्यवस्थितत्यागेन भूमिर्जलं वायुश्च प्रदूषिता भवन्ति । अतो मलमूत्रत्यागे शास्त्रीयो वैज्ञानिकश्च निर्देशोऽवलम्बनीयः । शास्त्रेषु एष नियमो धर्मस्य दिनचर्यायाश्चाङ्गरूपेण निर्दिष्टो वर्तते ।

## अभ्यासः

### १. अतिसङ्क्षेपेण उत्तरयत

(क) आचरणमिति पदं कस्मिन्नर्थे प्रयुज्यते ?

(ख) शौचाचारशब्दस्य कोऽर्थः?

(ग) भोजनाचारः कथं भवति ?

(घ) शारीरिकशौचे कीदृशं शौचमायाति ?

(ङ) मलमूत्रत्यागार्थं कस्यां दिशि गन्तव्यम् ?

### २. सङ्क्षिप्तोत्तरं लिखत

(क) मलमूत्रत्यागः कुत्र कुत्र नैव कर्तव्यः ?

(ख) मलमूत्रत्यागान्ते हस्तप्रक्षालने कियन्मिता मृत्तिका ग्रहीतव्या ?

(ग) कदा कदा मौनिना भाव्यम् ?

(घ) आचारभ्रष्टता कथं भवति ?

(ङ) शौचाचारस्य उपलब्धिः का ?

## ३. अधोलिखितानुच्छेदं पठित्वा प्रदत्तप्रश्नानामुत्तरं लिखत

माता मातृभूमिश्च सर्वविधसुखसम्पन्नं स्वर्गमपि अतिशयाते इत्याशयो जननी जन्मभूमिश्च स्वर्गादपि गरीयसीत्याभाणकस्य । विचारणीयमिदिमवशिष्यते यदस्माकं मातुः मातृभूमेश्च किं स्थानम् ? अथवा कीदृशः स सम्बन्धो वरीवर्त्ति येन ते स्वर्गादपि अतिरिच्येते । अत्र एष एव विचारविषयः । जन्मदानात् सा माता जननी कथ्यते । यदि वयं गर्भधारणादारभ्य पालनपोषणपर्यन्तं मातुः स्नेहपूर्णां सद्व्यवहारपरम्परां स्मरामः, तर्हि अस्माकं हृदि महान् श्रद्धासञ्चारो मातुश्चरणयोराविर्भवति । तद्यथा- गर्भधारणादारभ्य दशमासपर्यन्तं विषमाद् विषमाणि देहकार्श्यकराणि कष्टानि यथाकथञ्चित् सोढ्वापि प्रसवकाले महत्कष्टमनुभवति जननी । ततः प्रभृति बालकस्य मलमूत्रादिदूषिते शयने शयाना, रात्रीरतिवाहयन्ती, बालकं सुखेन बिभ्राणा, लालनपालनादिभिः संवर्द्धयन्ती चात्मानं सा धन्यां मनुते । अहो ! एतादृशीं मातुः सहनशक्तिं स्मारं स्मारं कस्य सचेतसः स्वान्तं द्रवीभूतं न भवेत् । ततः स्वकीयमेतादृक् कष्टभारमविगणय्य बालकस्य स्वल्पेऽपि कष्टे व्याकुलितान्तःकरणा सा तस्य प्रतीकाराय प्रयतते । अतोऽवितथमेतद्यत् “न मातुर्दैवतं परम्” इति । मातापित्रोर्ऋणात् कथमपि मानवस्य निस्तारो न भवति । तेन उक्तमुपनिषदि ‘मातृदेवो भव’ इति । जनाः यथा सुखे दुःखे च समभावेन मातरं स्मरन्ति न तथा कमप्यन्यं बान्धवम् । मातापि आत्मजैः सह येन स्नेहेन व्यवहरति तस्य तुलनां कर्तुं न कोऽपि प्राणी पारयति । जन्मभूमिरेव मातृभूमिरिति तु निश्चप्रचम् । मातुर्यावन्तो गुणाः समुपलभ्यन्ते ततोऽप्यधिकगुणाः मातृभूमौ परिलक्ष्यन्ते । यदा वयं मातुर्गर्भगह्वराद् बहिरागच्छामस्तदानीं मातरं बालकञ्च जन्मभूमिरेव क्रोडीकरोति । भूमातुः क्रोडे वयं क्रीडामस्तया एव प्रदत्तमन्नं फलं, मूलं जलादिकञ्च स्वीकुर्मः । धन्यतमा इयं जन्मभूमिर्या अस्माकं मात्रा सह अस्मानपि लालयति पालयति पोषयति वर्धयति च । ये जना जन्मभूमिं परित्यज्यान्यदीयां भूमिं सेवन्ते ते नराः सुरभिं निराकृत्य रासभीं भजन्ते ।

**प्रश्नाः**

(क) माता किमर्थं जननीत्युच्यते ?

(ख) कयोर्ऋणान्मानवस्य कथमपि निस्तारो न ?

(ग) अनुच्छेदस्यान्तिमवाक्यस्य तात्पर्यः कः ?

(घ) ‘मातृदेवो भव’ इति पदावलिं प्रयुज्य मौलिकं वाक्यमेकं लिखत ।

## ४. अनुच्छेदं पठित्वा सारांशं लिखत

कृषकः परिश्रमी जनः। स आदिवसं परोपकाराय कृषिकर्मणि व्यापृतो भूत्वा सर्वेषां प्राणपोषकमन्नफलादिकमुत्पादयति । स उष्णस्य शीतस्य हिमस्य वर्षाणामपि चिन्तां विहाय सर्वाणि कष्टानि सोढ्वापि निरन्तरं तत्र संलग्नो दृश्यते। अनेन परोपकारस्तु भवत्येव स्वास्थ्यलाभोऽपि सहैव जायते। ते वणिजो ये कार्पासस्फीतायामासन्दिकायामुपविश्य बहूपधानैः प्रावृता आदिवसम् एकासनेनोपविशन्ति तेषामपेक्षया कृषकस्य स्वास्थ्यं सर्वथा समीचीनं भवति। कृषिः स्वाधीनतमो व्यवसायः। अत्र न कापि पराधीनता नापि बन्धनव्यसनिता च। स स्वयमेव यथावसरं स्वकर्मणि प्रवृत्तो भवति, भूमिं कर्षति, बीजं वपति, यथासमयं सिञ्चति, समये समये तस्याः सुरक्षायाः व्यवस्थां विदधाति, अन्यत् किमपि तृणादिकं समुत्पन्नं चेत् तन्निवारयति। तदुत्पन्नैरन्नादिभिः पारिवारिकान् जनान् पालयति, तृणादिभिः पशून् पोषयति। सम्पन्नः कृषको लवणादतिरिक्तं सर्वं वस्तु कृषेः साहाय्येन उत्पादयति। स धान्यकं, गोधूमं, चणकं, शालिम्, मसूरं, माषं, मुद्गं, विविधानि शाकानि, शतपुष्पा, जीरकं, कार्पासञ्च उत्पादयति। कार्पासेन वस्त्राणि निर्मीयन्ते। गोमहिष्यादिपालनेन दुग्धं, दधि, नवनीतम्, घृतम्, तक्रं च प्राप्यते। पशुधनानां मलमूत्रादिभिः कृषिरुर्वरा भवति। एतेषां चर्मणा उपानहादिकं निर्मीयते। बलीयसां बलीवर्दानां साहाय्येन कृषकः क्षेत्रं कर्षति। उद्यानरक्षणेन आम्र-कदली-नागरङ्गप्रभृतिफलसम्पदापि स परिपूरितो भवति। धन्यतमं परोपकारमयं स्वास्थ्यसम्पत्सम्पन्नञ्च कृषकस्य जीवनम्। कृषकस्य परिश्रमस्य फलमेवास्ति यदियं वसुन्धरा सर्वेषां मनांसि आनन्दनिर्भराणि करोति।

## ५. मानवजीवने अधस्तन्याः कथायाः को निर्देशः ? इति विलिख्यताम्

पुरा शतघ्नुनामकः कश्चित् प्रसिद्धो राजा आसीत्। तस्य शैव्यानाम्नी पत्नी च आसीत्। शैव्या धर्मशास्त्राणि श्रुत्वा धर्मशास्त्रोक्तनियमान् स्वकीयजीवने परिपालयति स्म। एकस्मिन् दिने कार्तिकशुक्लपूर्णिमामुपोष्य दम्पतिभ्यां गङ्गास्नानं विहितम्। गङ्गास्नानान्तरं कश्चन पाखण्डी पुरुषो दृष्टः। स हि पाखण्डी पुरुषो राज्ञो गुरुभ्राता आसीत्। यस्माद् गुरो राज्ञा धनुर्वेदं पठितम्, तस्मादेवानेन पाखण्डिनाप्यधीतमासीत्। तीर्थस्नानान्तरं पाखण्डिना सह वार्तालापकरणे पापेनैव लिप्यते इति महाराज्ञी शैव्या जानाति स्म। अतस्तं पाखण्डिनमनादृत्य सा अग्रे गतवती। सूर्यनारायणं च नमस्कृतवती। परन्तु धर्मशास्त्रीयव्यवस्थां ज्ञात्वापि राजा तेन पाखण्डिना सह वार्तालापमकरोत्। तेन वार्तालापेन राजनि तस्य पाखण्डिनः पापस्य सङ्क्रमणमभवत्।

कालक्रमेण आयुःक्षयवशाद् राज्ञो मृत्युरभूत्। महाराज्ञी शैव्यापि पतिमनुसृतवती। अपरेऽस्मिन् जन्मनि शैव्या काशीनरेशस्य कन्याभूत्। धर्मशास्त्रपालनस्य पुण्येन सा पूर्वजन्मनो वृत्तान्तं जानाति स्म। काशीनरेशः कन्याया विवाहं कर्तुमियेष परन्तु तस्याः पूर्वजन्मनः पतिस्तु पापसङ्क्रमणकारणेन कुक्कुरयोनिं प्राप्तः। स कुक्कुर इदानीं विदिशायामासीत्। सा तस्य पार्श्वे प्राप्तवती। पतिं प्रणम्य

सा तस्मै कुक्कुराय स्वादुभोजनमकारयत् । स्वादुकरभोजनोपलब्ध्या स कुक्कुरोऽपि मुदितमना अभवत् । पाखण्डिना सह वार्तालापकरणजन्यपापेन भवत इयं कुत्सितयोनिः सम्प्राप्ता वर्तत इति तस्मै स्मारयामास सा । पूर्वजन्मनो वृत्तान्तं राजाप्यवगतवान् । स शीघ्रमेवानशनव्रतमास्थाय कुक्कुरकलेवरं परित्यक्तवान् । पापशेषवशात् स पुनः शृगालयोनिं प्राप्तवान् । तत्रापि पूर्वजन्मवृत्तान्तं तस्मै सा स्मारितवती । राज्ञा शतघ्नुना निराहारव्रतमास्थाय तच्छृगालकलेवरमपि परित्यक्तम् । स भूयोऽपि व्यालयोनिं गृध्रयोनिं काकयोनिं मयूरयोनिं च क्रमशः प्राप्तवान् । काशीराजकन्या सुभोजनादिकं दत्त्वा तस्य सेवां कृतवती । तदानीमेव मिथिलाधिपोऽश्वमेधयज्ञमनुष्ठाय यज्ञान्तस्नानमवभृथाख्यं करोति स्म । राजकन्यापि तत्र स्नानं विधाय तं मयूरं च संस्नाप्य पाखण्डिना सह वार्तालापकरणजन्यपापेन विविधयोनिषु जन्मलाभोऽभवदिति स्मारितवती । तदन्ते च पुना राजा शतघ्नुर्मिथिलाधिपस्य जनकस्य पुत्रोऽभवत् । काशीराजकन्यया दृष्टं यत् तस्य पतिर्जनककुमाररूपेण विवाहयोग्यो जातस्तदा सा स्वपित्रा सह मन्त्रणां विधाय तेनैव राजकुमारेण सह स्वस्य स्वयंवरं कृत्वा तं पतिभावेन वृतवती । इदानीं जनककुमारो यदा राजाभवत् तदा स धर्मशास्त्रनियमानां सम्यक् पालनं कृतवान् । अन्ते धर्मयुद्धे स्वप्राणपरित्यागं विहितवान् । काशीराजकन्यापि पतिमनुसृतवती । धर्मशास्त्रस्य यथावत्पालनजन्यपुण्यप्रतापेन इन्द्रादिलोकेभ्योऽप्युत्तमलोका दम्पतिभ्यां प्राप्ताः । इत्थं केवलं वार्तालापकरणेनैव पापस्य सङ्क्रमणम्, तस्य दुष्परिणामं च मानवेन भोक्तव्यं भवतीति देवलस्मृतौ वर्णितं विद्यते । कस्यचन पापिनः कलुषितमनोवृत्तेः कलुषता पापं वा निष्कलङ्के पापरहिते मनुष्येऽपि सङ्क्रामति । तत्र वार्तालापादयोऽनेके हेतवो भवन्ति । तानि कारणान्यत्र श्लोके दीयन्ते-

**संल्लापस्पर्शनिःश्वाससहयानासनाशनात् ।**

**याजनादध्यापनाद्यौनात् पापं सङ्क्रमते नृणाम् ॥** इति

६. **शौचाचारपालनेन मानवजीवने कीदृशो लाभो भविष्यति ? विवेचयत ।**

७. **मानवजीवने आचारभ्रष्टस्य शुद्ध्युपायः कीदृशो वर्तते ? व्याख्यात ।**

८. **स्वास्थ्यसंरक्षणाय भोजनाचारस्य भूमिकां वर्णयत ।**

९. **आत्मना केषु केषु कार्येषु मौनमवलम्ब्यते ? विवरणं निर्माय कक्षायां प्रस्तुत्य विमृशत ।**

# दन्तधावनम्

दन्तधावनं नाम दन्तानां शोधनक्रिया। तेनास्यार्थो भवति- दन्तानां दन्तपङ्क्तीनां मलिनतामपास्य शुद्धीकरणम्। एषा दन्तधावनक्रिया प्रायशः प्रभाते तथा रात्रौ शयनकालतः पूर्वं क्रियते। दन्तधावनं यदि सम्यक् क्रियते तर्हि दन्ताः स्वस्था भवन्ति, तथा च दन्तरोगाणां कतिपयमुखरोगाणां च सम्भावना न्यूनायते।

साम्प्रतिके काले दन्तधावनाय विविधानि साधनानि प्रयुज्यन्ते। तत्र परम्परागतं साधनं दन्तधावनकाष्ठमद्यतनकालेऽप्यतीवोपयोगि वर्तते। वर्तमानकाले च जनैः दन्तफेनकं प्रायेणोपयुज्यते। एतदर्थं दन्तानां मार्जनाय दन्तकूर्चं दन्तफेनकेन सह प्रयुज्यते। केचन तर्जन्यङ्गुलिमाध्यमेन च दन्तधावनं कुर्वन्ति। पुराकाले दन्तानां धावनाय सामान्यतस्त्रिकटुः, त्रिफला लवणानि च उपयुज्यन्ते स्म, परन्त्वाधुनिकसमये दन्तफेनके विविधानि रसायनद्रव्याणि दन्तरोगनिवारणार्थं सम्मिलितानि विधीयन्ते। शुण्ठी मरीचं पिप्पली चेति वस्तुत्रयस्य संज्ञा त्रिकटुरिति वर्तते। तथैव आमलकी, हरीतकी, विभीतकश्चेति वस्तुत्रयस्य नाम त्रिफला इति वर्तते। धर्मशास्त्रेषु दन्तधावनाय कण्टकीवृक्षोत्थं क्षीरोत्थं च काष्ठं सुकरं भवतीति व्यवस्था वर्तते। तत्र क्षीरवृक्षोत्थकाष्ठेष्वपि अश्वत्थोदुम्बरप्लक्षवटादीनां काष्ठं ग्राह्यमिति व्यवस्था वर्तते। स्वहस्ताङ्गुलप्रमाणेन द्वादशाङ्गुलप्रमाणं छिद्ररहितं स्वकनिष्ठाङ्गुलवत्स्थूलमर्धभागपर्यन्तं कृतकूर्चकं च काष्ठं दन्तधावनाय ग्राह्यमिति पुराणेषूल्लिखितमस्ति। करञ्जोदुम्बराम्र-कदम्ब-लोध्र-चम्पक-बदरीवृक्षसम्भूतकाष्ठानि दन्तधावनाय प्रशस्तानि मन्यन्ते।

वनस्पतिं देवं सोमं चानेन मन्त्रेण प्रार्थयित्वा दन्तधावनं कर्तव्यम्-

**अन्नाद्याय व्यूहध्वंसे सोमो राजायमागमत्।**
**स मे मुखं च प्रक्षाल्य तेजसा च भगेन च॥**
**आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च।**
**ब्रह्मप्रज्ञां च मेधाञ्च त्वन्नो देहि वनस्पते॥**

अन्नादिकं सुपाच्यं कर्तुम्, विघ्नं ध्वंसयितुं च स्वयं वनस्पतीनां राजा सोमोऽत्रागतोऽस्ति । स स्वस्य तेजसा ऐश्वर्येण च मम मुखं प्रक्षालयति । हे वनस्पते ! भवान् मह्यम् आयुष्यं बलं यशस्तेजः सन्ततिं पशुं धनं ब्रह्मज्ञानं मेधां तीक्ष्णां बुद्धिं च प्रददातु इति ।

आयुर्वेदशास्त्रेऽपि स्वास्थ्यमुद्दिश्य दन्तधावनं विशेषेण प्रोत्साह्यते । तत्र विविधं वनस्पतिजन्यं काष्ठं विविधानि द्रव्याणि च निर्दिष्टानि सन्ति, यानि दन्तरोगनिवारणाय मुखस्वास्थ्यस्य सुरक्षणाय च प्रशस्यन्ते । आयुर्वेदशास्त्रे दन्तधावनाय निम्बकाष्ठम्, खदिरकाष्ठम्, करञ्जकाष्ठम्, जम्बूकाष्ठम्, अपामार्ग, वटकाष्ठञ्च बहूपयोगित्वेन गृह्यन्ते । अतिकठोरं काष्ठं दन्तधावनाय निषिद्धं वर्तते यतो हि तद्दन्तेषु हानिं करोति । धर्मशास्त्रेण साकमायुर्वेदशास्त्रमपि दन्तधावनं नित्यं कर्तव्यमिति निर्दिशति परन्तु कतिपयविशेषदिनेषु अवस्थासु वा दन्तधावनं निषिद्ध वर्तते । नगरेषु दन्तधावनकाष्ठाभावे दन्तधावननिषिद्धदिनेषु च जलेन द्वादशगण्डूषैश्च दन्तधावनं विधातुं शक्यते ।

धर्मशास्त्रेषु दन्तधावनाय कानिचन दिनानि निषिद्धानि च वर्तन्ते । बारेषु रविवासरः, तिथिषु च प्रतिपदा, अमावास्या, षष्ठी, नवम्येकादशीतिथयश्च दन्तधावनेनिषिद्धानि सन्ति । रविवासरे काष्ठेन दन्तधावनं क्रियते चेत्तस्य वंशनाशो भवति । प्रतिपदादिनिषिद्धतिथिषु दन्तधावनाय यो हि दन्तकाष्ठसंयोगं कारयति तस्य वंशः सप्तकुलपर्यन्तं सीदतीति धर्मशास्त्रेषु निर्दिष्टं वर्तते । दन्तधावनानन्तरं हस्तौ पादौ च प्रक्षाल्याचमनं कर्तव्यं भवति ।

धर्मशास्त्रेषु नित्यनैमित्तिकादिकर्मणां सम्पादनाय दिग्विचारो विहितो वर्तते । दिग्विचारेण विना विहितानि सर्वाणि कर्माणि न केवलं निष्फलानि प्रत्युत हानिकराणि च भवन्ति । दन्तधावनाय च दिग्विचारो विहितो दृश्यते । प्राङ्मुखतया दन्तधावनेन धैर्यम्, सुखमारोग्यञ्च प्राप्यन्ते । दक्षिणाभिमुखो भूत्वा यो दन्तधावनं करोति स कष्टमाप्नोति । पश्चिमाभिमुखः सन्नपि कार्यमिदं न कुर्यात् । पश्चिमाभिमुखतया दन्तधावनेन पराजयमाप्नुयात् । दन्तधावनाय उत्तरदिगपि निषिद्धा वर्तते । य उत्तराभिमुखो भूत्वा दन्तधावनं कुरुते तस्य गावः, बान्धवा गृहस्त्रियश्च विनश्यन्ति । य ईशानाभिमुखो भूत्वा दन्तधावनं करोति, स जनः सर्वान् कामान् लभते ।

शास्त्रेषु दन्तधावनस्य प्रयोजनं निर्दिष्टं वर्तते । मुखे पर्युषितमन्नं वर्तते चेद् जनोऽशुद्धो भवति । अशुद्धो हि किमपि कर्म कर्तुं नार्हति । कर्मसम्पादनावधौ मनोवाक्कायानां शुद्धिः परमावश्यकी भवति । दन्तधावनम्, मुखप्रक्षालनम् जिह्वासम्मार्जनञ्च कायशोधकानि कर्माणि सन्ति । दन्तधावने मौनधारणं कर्तव्यं भवति । दन्तधावने मौनाचारी स्वर्गं लभते इति अङ्गिरोवचनमुपलभ्यते ।

# अभ्यासः

## १. अतिसङ्क्षेपेण उत्तरयत

(क) दन्तधावनमित्यस्य शब्दस्य कोऽर्थः ?

(ख) दन्तधावनं प्रायशः कदा क्रियते ?

(ग) त्रिकटुः इत्यत्र केषां वस्तूनां योगः ?

(घ) दन्तधावनकाष्ठं कियत्स्थूलं भवति ?

(ङ) दन्तकाष्ठसंयोगः कस्मिन् दिने निषिद्धो वर्तते ?

(च) दन्तधावने कस्यां दिशि अभिमुखेन भाव्यम् ?

(छ) गो-बन्धु-स्त्रीणां विनाशः कथं भवति ?

(ज) सर्वे कामाः कथं लभ्यन्ते ?

## २. सङ्क्षिप्तोत्तरं लिखत

(क) दन्तधावनाय उपयुक्तानि काष्ठानि कानि ?

(ख) अन्नाद्याय .... इति श्लोकस्य कोऽर्थः ?

(ग) दन्तधावनाय आयुर्वेदशास्त्रसम्मतानां केषां काष्ठानामुपयोगः कर्तुं शक्यते ?

(घ) दन्तधावननिषिद्धदिने किं कर्तव्यम् ?

(ङ) दन्तरोगविनाशाय प्रतिदिनं किं किं कर्तव्यम् ?

(च) दन्तधावनस्य प्रयोजनं किम् ?

(छ) कायशोधकानि कर्माणि कानि ?

## ३. अधोलिखितमनुच्छेदं पठित्वा तदनुवर्तिप्रश्नानामुत्तरं लिखत

वनस्य समीपे एको ग्रामो आसीत्। चरणाय गावो ग्रामाद् वनं गच्छन्ति स्म। वने एको मूर्खः सिंहो निवसति स्म। स प्रतिदिनं एकां गां हत्वा खादति स्म। एवमेव बहूनि दिनानि व्यतीतानि। गावस्तस्माद् बिभ्यति स्म। एकदा सर्वा गावोऽमिलन्। एका वृद्धा गौरवदत्- “शृण्वन्तु ! वनगमन-समये वयमेकाकिन्यो भ्रमामः। एतस्मात् कारणात् स सिंहोऽस्मासु एकैकां सुलभतया हरति। अद्य आरभ्य वयं मिलित्वा गच्छामः” इति। तदा आरभ्य सर्वा गावः सम्मिलिता वनं गच्छन्ति स्म। यदा ताः सिंहस्य स्वरं शृण्वन्ति स्म उत वा सिंहं पश्यन्ति स्म तदा सर्वा अपि सहैव शब्दं

कृत्वा सिंहमनुद्रवन्ति स्म । सिंहोऽपि पलायते स्म । अत एवोच्यते एकत्वमेव बलमस्ति । यतो हि अल्पानामपि वस्तूनां संहतिः महती कार्यसाधिका भवति । एकत्वगुणमापन्नैस्तृणैरपि मत्तदन्तिनो गजादयो बध्यन्ते ।

**प्रश्नाः**

(क) गावः कुत्र गच्छन्ति स्म ?

(ख) गावः कस्माद् बिभ्यति स्म ?

(ग) वृद्धा गौः किमुक्तवती ?

(घ) का महती कार्यसाधिका भवति ?

## ४. अधस्तनमनुच्छेदं पठित्वा निर्दिष्टकार्याणि कुरुत

नेपाले बह्व्यः पवित्रनद्यः प्रवहन्ति। तासु कृष्णगण्डकी महिमशालिनी वर्तते। नदीयं दामोदरकुण्डान्निस्सरति । कृष्णगण्डकीप्रवहणक्षेत्रे बहूनि तीर्थस्थलानि सन्ति । मुक्तिक्षेत्रम्, रुरुक्षेत्रम् हरिहरक्षेत्रञ्च कृष्णगण्डकीमधितिष्ठन्ति । अस्याः शिरोभागो मुक्तिक्षेत्रमस्ति । मुक्तिक्षेत्रं हि ब्रह्म-विष्णु-महेश्वराणां स्थलं वर्तते । मुक्तिनाथो मुक्तिक्षेत्रे विराजते । कृष्णागण्डकी-रुरुगङ्गयोः पूर्वभागे रुरुक्षेत्रमस्ति । रुरुक्षेत्रं गुल्मी-पाल्पा-स्याङ्जाजनपदानां सीमक्षेत्रे वर्तते । रुरुक्षेत्रे विविधानां देवतानां मनोहारीणि मन्दिराणि सन्ति । एतत्क्षेत्रवर्तिनि रिडीस्थाने भगवान् हृषीकेशो विराजते । तन्निकषा पुण्यसलिला कृष्णागण्डकी प्रवहति । हरिहरक्षेत्रं तनहुँ-चितवन-नवलपुरजनपदानां मध्यभागे विद्यते । हरिहरक्षेत्रं देवघट्टधामनाम्नापि प्रसिद्धं वर्तते। देवघट्टस्थाने एव कृष्णगण्डकी-त्रिशूलीनद्योः सङ्गमो भवति । अत्र पुरा देवा अपि सस्नुरिति पौराणिकवृत्तमुपलभ्यते । हरिहरक्षेत्रे मन्दिराणि, गुरुकुलानि सत्सङ्गस्थलानि च सन्ति । मकरसङ्क्रान्तिप्रभृतिपर्वसु देवघट्टसङ्गमे सहस्रशः श्रद्धालवः स्नान्ति । महती मेला च तत्र भवति । सम्प्रति धर्म-संस्कृतिपरायणैर्हरिहरक्षेत्रं केन्द्रं विधाय गण्डकीपरिक्रमायोजना पुरस्कृता वर्तते। कृष्णागण्डकी तादृशी एकाकिनी नदी वर्तते या शालग्रामशिलां निर्माति। शालग्रामशिला भगवतो विष्णोः स्वरूपं मन्यते । शिलामिमामुट्टङ्क्य प्रस्नाय च प्रवहन्ती कृष्णगण्डकी मुक्तिदायिनी स्रोतस्विनी निगद्यते। प्राचीनकाले चक्रवर्तिनीनाम्ना विख्याता गण्डकीयं नेपालस्य धार्मिक-सांस्कृतिक-प्राकृतिकैतिहासिकगौरवमावहति ।

### (अ) प्रश्नानुत्तरयत

(क) कृष्णागण्डकी केषु क्षेत्रेषु प्रवहति ?

(ख) मुक्तिक्षेत्रस्य महत्त्वं किम् ?

(ग) रुरुक्षेत्रं कुत्र वर्तते ?

(घ) देवाः पुरा कुत्र सस्नुः ?

(ङ) शालग्रामशिला का ?

**(अ) अर्थं लिखत**

महिमशालिनी, निकषा, सङ्गमः, परायणैः, आवहति ।

**(इ) अनुच्छेदात् त्रीणि समस्तपदानि अन्विष्य स्वरचितेषु वाक्येषु तेषां प्रयोगं दर्शयत ।**

**(ई) पञ्चभिर्वाक्यैर्देवघट्टस्य महत्त्वं प्रकाशयत ।**

**५. अधो लिखितस्य कथांशस्याधारेण सञ्जयस्य चरितं वर्णयत**

युद्धस्य निश्चयनानन्तरं धृतराष्ट्रमुपसङ्गम्य व्यासः पप्रच्छ, "राजन् ! किमिच्छसि ?" राजा युद्धं यथातथं श्रोतुमियेष । व्यासस्तुभ्यं दिव्यदृष्टिं ददामीति जगाद । चिन्ताकुलो धृतराष्ट्रः स्वपुत्राणां युद्धं हननं च द्रष्टुं नैच्छत् । स जगाद- "प्रभो ! अहं महाविनाशं द्रष्टुं समर्थो नास्मि । दिव्यदृष्टिं सञ्जयाय दातुमर्हसि । तन्मुखात् सर्वं श्रोष्यामि" इति । धृतराष्ट्रस्य निवेदनमनुमत्य व्यासोऽवदत्, "राजन् ! सञ्जयो युद्धस्य सर्वं वृत्तान्तं त्वां श्रावयिष्यति । स सङ्ग्रामस्य सर्वा घटना ज्ञास्यति । अहर्निशं रणे यद् भविष्यति स तत् सर्वं द्रक्ष्यति । युद्धे आगतानां वीराणां मनोभावमपि ज्ञातुं समर्थोऽसौ त्वां युद्धघटनाः कथयिष्यति । गवल्गणपुत्रः सञ्जयः शस्त्रास्त्रेण हन्तुं न शक्यते । असौ न कदापि क्लान्तो भविष्यति । युद्धानन्तरमपि सञ्जयो जीवित एव स्थास्यति ।" तदाशीर्वादेन धृतराष्ट्रस्य मन्त्री सञ्जयो हस्तिनापुरमुपोष्यैव कुरुक्षेत्रस्य वृत्तान्तं धृतराष्ट्रं श्रावयति स्म । धृतराष्ट्रो यदपृच्छत् सञ्जयस्तस्योत्तरं तत्क्षणमेवादात् । श्रीमद्भगवद्गीतायाः प्रथमाध्यायस्य प्रथमश्लोके एव धृतराष्ट्रः सञ्जयं सम्बोध्य कुरुक्षेत्रे समवेतानां कौरवपाण्डवानां कार्याणि ज्ञातुमिच्छति । सञ्जयश्च तत्रत्या सकलघटना यथावद् वर्णयति ।

**६. अधोलिखितां कथां पठित्वा मानवेभ्यः द्यूतक्रीडा कीदृशी भवतीति विलिखत ।**

राजा नलो महान् धर्मात्मा प्रजावत्सलः प्रजापालकश्चासीत् । अस्य राज्ये धर्मस्य सर्वत्र प्रचार आसीत् । कलियुगस्य कृते कुत्रापि स्थानं नासीत् । सर्वस्मिन् युगे यत्किञ्चिन्न्यूनाधिकरूपेण चत्वारोऽपि युगा भवन्त्येव । परन्तु राज्ञा नलेन च कलिं सर्वथा बहिष्कृत्य स्वराज्यात् निष्कासितवानासीत् । एतेन कलिः क्रुद्धः सन् बहिर्गत्वा प्रत्युपकृतये प्रतिज्ञां कृतवानासीत् ।

कदाचिद् राजा नलो वनमार्गेण कुत्रचिद् गच्छन्नासीत् । तत्रैको हंसः प्राप्तः । यथाकथञ्चिद् राज्ञा नलेन स हंसो गृहीतः । हंसेन उक्तम्- "महाराज ! मां मोचय । अहं तव हितं विधास्ये" इति । राज्ञा हंसस्त्यक्तः । हंसश्च विदर्भदेशं गत्वा तन्नरेशस्य पुत्रीं दमयन्तीमुपागच्छत् । तदानीं समग्रसंसारवर्तिराजकुमारीषु सुन्दरी दमयन्ती आसीत् याञ्च देवता अपि लिप्सव आसन् । हंसस्तत्र

गत्वा राज्ञो नलस्य गुणानां भूरि प्रशंसां कृतवान्। दमयन्ती च मनसा राजानं नलं वृतवती। देवताभिर्विविधोपायैस्तन्निश्चयं भेत्तुं प्रयत्नः कृतः परन्तु दमयन्ती स्वनिर्णये दृढाऽभवत्। तस्या निर्णयः सखिभिस्तस्याः पितुः समक्षं प्रापितः। पित्रा स्वयंवराय उपक्रमो विहितः। स्वयंवरे दमयन्ती नलं वृतवती। नलस्य दमयन्त्या सह विवाहोऽभवत्। दमयन्ती पतिव्रतधर्मपरायणा आसीत्। पत्युराज्ञां विना सा किमपि न विदधाति स्म। महाराजो नलोऽपि तया सहात्यन्तं प्रेमपरायण आसीत्। दमयन्त्या गर्भत एका कन्या एकः पुत्रश्चाभवताम्।

कलियुगश्च नलेन सह प्रत्यपकृतये प्रतिबद्ध आसीदेव। एकस्मिन् दिने राजा नलः स्वभ्रातृभिः सह द्यूतक्रीडारतोऽभवत्। द्यूते कलियुगस्य निवासोऽस्तीति तस्य मनस्येव नासीत्। कलिना समुचितोऽवसरो लब्धः। नलः पौनःपुन्येन द्यूते पराजितः। स धनधान्यादिकम्, राजप्रासादम्, वाहनानि, राज्यं च द्यूते हुत्वा पराजितोऽभवत्। स तस्मै पत्न्यै दमयन्त्यै च एकमेकं वस्त्रं दत्त्वा राजभवनाद् बहिष्कृतः। राजा नलः स्वपुत्रं पुत्रीं च विदर्भदेशं प्रेषितवान्। दमयन्त्या सह नलो वनेषु बुभुक्षापीडितः सन् अभ्रमत्। राज्ञी दमयन्ती बुभुक्षया पिपासया च पीडिता सती कस्यचन वृक्षस्याधस्तात् सुप्तवती। महाराजो नलः खिन्नमना अभवत्। तदानीमेव कलिरपि तमनुसरन् तत्रागत्य सुवर्णमयपक्षिरूपेण इतस्ततो भ्रमति स्म। तं पक्षिरूपिणं कलिं ग्रहीतुकामो नलः स्वीयमुत्तरीयवस्त्रं तदुपरि प्राक्षिपत् परन्तु तदेव वस्त्रं गृहीत्वा पक्षी उड्डीय गतवान्। नलस्ततो विभ्रान्तो जातः। स सुप्तायाः पत्न्या अर्धशाटिकां विस्फाट्य राज्ञीं दमयन्तीमेकाकिनीं निर्जनारण्ये परित्यज्याग्रे गतवान्। ततोऽग्रे अग्निना वनं भस्मासात् क्रियमाणमदृश्यत। तत्र कस्यचनाजगरस्य संरक्षणसमये तेनैवाजगरेण दष्टो राजा नलो विषदग्धः कृष्णो विरूपश्च सञ्जातः। सोऽजगरः कर्कोटकनाग आसीत्। तस्मिन् स्वरूपे तं कोऽपि न परिचिनोति स्म। तेन कर्कोटकेन नलायैकं वस्त्रमपि प्रदत्तम् उक्तञ्च- "भवान् यदा वस्त्रमिदं परिदधाति तदा स्वकीयं वास्तविकं सुरूपं परिलप्स्यसे" इति। तदनन्तरं राजा नलोऽयोध्यानरेशस्य ऋतुपर्णस्य समीपं प्राप्य तत्र रथवाहकरूपेण राजसेवां कुर्वाण आसीत्।

तत्र राज्ञी दमयन्ती यथाकथञ्चिद् भ्रममाणा सत्यत्यन्तदुःखेन पितुर्गृहं सम्प्राप्तवती। तस्याः पित्रा देशान् प्रति दूतान् सम्प्रेष्य नलस्य वृत्तान्तं ज्ञातुं प्रयत्नो विहितः। केनचनैकेन दूतेन अयोध्यानरेशस्य रथवाहकरूपेण नलोऽस्तीति सूचितः। तस्य रूपं विकृतमासीत्। परीक्षार्थं दमयन्त्याः पित्रा तस्याः पुनः स्वयंवरस्यायोजना विहिता। तत्र अयोध्यानरेशः ऋतुपर्णोऽप्याहूतः। नलस्तु अश्वविद्यायां पारङ्गत एव आसीत्, तेन निर्धारितसमयतः पूर्वमेव विदर्भदेशे स्वयंवरस्थले राजा प्रापितः। दमयन्ती अपि बहुभिरुपायै पत्यू राज्ञो नलस्य परीक्षां विधाय अयमेव नलोऽस्तीति स्वपितरं विज्ञापितवती। तदनन्तरं विदर्भाधिपोऽपि राज्ञो नलस्य विधिवत् पूजामकरोत्। अयोध्याधिपतिना राज्ञा ऋतुपर्णेनापि अयं महाराजो नल इति विज्ञाय सत्कृतः। नलादश्वविद्यां ऋतुपर्णाच्च द्यूतविद्यां परस्परं विज्ञापितवन्तौ। तस्मादेव ऋतुपर्णात् शिक्षिततया द्यूतविद्यया भ्रातरं विजित्य राजा नलः समग्रं राज्यं पुनरुपलभ्य सुखेन निष्कण्टकं राज्यं सञ्चालयामास।

अत एवोच्यते -

**कर्कोटकस्य नागस्य दमयन्त्या नलस्य च ।**

**ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम् ॥**

७. **अधः प्रदत्तायाः कथायाः सारं लिखत ।**

पुरा मथुरानगर्यां महान् सम्राट् चित्रकेतुरासीत् । तस्य बह्व्यः पत्न्य आसन् । सोऽत्यन्तमैश्वर्यशाली प्रजावत्सलश्चासीत् परन्तु सन्ततेरभावात् स दुःखित आसीत् । सोऽनेकानां यज्ञानां, पूजादीनाञ्चानुष्ठानं विहितवान् तथापि तस्य सन्ततिर्नैवाजायत । तया पीडया राजा पीडित आसीत् । एकदा कुतश्चिद् भ्रममाणोऽङ्गिरा ऋषिस्तस्य राजभवनमागच्छत् । राजा तस्मै स्वदुःखं निवेदितवान् । करुणार्द्रहृदय ऋषिस्तस्मै हर्षशोकप्रदायकपुत्रस्य प्राप्तिरूपं वरमददात् । तदनु चित्रकेतुस्तस्य ज्येष्ठपत्न्या गर्भतः पुत्रं प्राप्तवान् । तेन राजपरिवारजनाः प्रजाश्च अत्यन्तं हर्षिता अभवन् । नवजातशिशोर्जातकर्मादिसंस्कारान् राजा समये एव समपादयत् । राजा विविधदानादिकं विधाय प्रसन्नो जातः । राज्ये सर्वत्र हर्षसञ्चारः प्रसृतः । नवजातशिशौ राज्ञो ममताया वृद्धिः सञ्जाता । पुत्रवत्या राज्ञो ज्येष्ठपत्न्याः कृतद्युत्याः प्रशंसा राज्ये सर्वत्र प्रसृता । एतेन अन्या राजमहिष्यः स्वात्मनः क्रमश उपेक्षिता अन्वभूवन् । राजा प्रजाः सर्वेऽपि पुत्रवत्या राजमहिष्या एव चर्चामकुर्वन् । राज्ञश्चित्रकेतोरन्याः पत्न्य ईर्ष्यावशात् विषं दत्त्वा तं शिशुं मारितवत्यः । राजा पुत्रशोकादत्यन्तं दुःखितोऽभवत् । तदा पुनः अङ्गिरा ऋषिर्नारदमुनिश्च तत्र आगत्य तं उपदिष्टवन्तौ– हे राजन् ! एष तव पुत्रः कस्मिँश्चिज्जन्मनि कस्यचित् पिता आसीत्, पुनः अन्यस्मिञ्जन्मनि पुत्रो भविष्यति । अस्मिन् संसारे बन्धुः, पुत्रः, माता, पिता इत्यादयः केवलं मायया बद्धाः सन्ति । अतो मोहं त्यक्त्वा भगवत्सेवायामेव मनो योजय ।

एवमुपदेशं श्रुत्वा राजा वैराग्यमापन्नः, तथा च भगवतः सङ्कर्षणस्य उपासनां कर्तुमगच्छत् । ततः स राजा चित्रकेतुर्गन्धर्वलोकं प्राप्तवान् तथा भगवतः सङ्कर्षणस्य कृपया विद्याधरः (कश्चन विद्यासिद्धयोगी) अभवत् । एकदा स कैलासं गत्वा पार्वतीशिवयोः संवादं श्रुतवान् । तदा स शिवस्य उन्मुक्तभावं दृष्ट्वा किञ्चिद् हास्यमकरोत् । तदा पार्वती क्रुद्धा सती उक्तवती– "त्वमहङ्कारयुक्तोऽसि, अतोऽसुरयोनौ जन्म प्राप्स्यसि ।" चित्रकेतुः सस्मितं प्रत्युत्तरं दत्तवान् – "मातः ! मयि भगवत्कृपा अस्ति । अतो जन्म कुत्रापि भवतु, अहं श्रीहरिं स्मराम्येव ।" शिवस्तस्य धैर्यं दृष्ट्वा पार्वतीमुवाच– "एष भगवद्भक्तः शापादपि न विचलितः ।" वृत्रासुरः पूर्वजन्मनि राजा चित्रकेतुरासीत् किन्तु पार्वत्याः शापेनासुरयोनौ जन्म लब्ध्वापि स भगवद्भक्त एव आसीत् । अन्ते स भगवत्कृपया भगवद्धाम प्राप्तवान् ।

अस्याः कथायाः शिक्षा निम्नानुसारेण विचारयितुं शक्यते ।

१. संसारबन्धनं मायामयमस्ति । पुत्रशोकोऽपि केवलं मायया एव ।

२. भगवद्भक्ताः सुखदुःखसमा भवन्ति । चित्रकेतुः शापमपि प्रसन्नचित्तेन स्वीकृतवान् ।

३. सच्चिदानन्दविग्रहस्य विष्णोर्भक्तिर्मोक्षं ददाति । वृत्रासुररूपेणापि स भगवद्धाम प्राप्तवान् ।

**८. दन्तधावनविषयिणीं शास्त्रीयव्यवस्थां वर्णयत ।**

**९. निषिद्धदिनेषु दन्तधावनात् सम्भाव्यां हानिं विवृणुत ।**

**१०. दन्तधावनाय सम्मतानां काष्ठानां विवरणं निर्माय कक्षायां प्रस्तुत ।**

# आदिकाव्यप्रणयनम्

संस्कृतसाहित्यं कालक्रमभाषाप्रयुक्तिदृष्ट्या द्विधा विभज्यते - वैदिकसाहित्यं लौकिकसाहित्यञ्च । संहिता-बाह्मणाऽऽरण्यकोपनिषदादिग्रन्थराशिर्वैदिकसाहित्यं मन्यते । तदनन्तरं प्रणीतानि नैकविधानि ग्रन्थरत्नानि लौकिकसाहित्यपदमाप्नुवन्ति । लौकिकसाहित्यं महर्षिणा वाल्मीकिना विरचितादामायणमहाकाव्यात् प्रारभते । महर्षिर्वाल्मीकिश्चाऽऽदिकविर्मन्यते ।

महर्षिवाल्मीकेर्विषये बह्व्योऽनुश्रुतयः प्रमाणानि च समुपलभ्यन्ते । ब्रह्मवैवर्तपुराणानुसारेण ब्रह्मा स्वदेहतः षोडशपुत्रान् जनयामास । तेषु प्रचेता अन्यतम आसीत् । वाल्मीकिस्तस्यैव प्रचेतसः पुत्रोऽभवत् । मत्स्यपुराणवायुपुराणे ब्रह्मणो दशमानसपुत्रेषु प्रचेता अपि आसीदिति निर्दिशतः । तन्निर्देशानुसारेणापि वाल्मीकिः प्रचेतसः सूनुरित्यवगन्तुं शक्यते । अपरानुश्रुतिर्वर्तते यत् पुरा सुमतिनामाख्यः कश्चन भृगुवंशी ब्राह्मणो बभूव । कौशिकवंशीया कन्या भृगोः पत्नी आसीत् । तयोऽग्निशर्मनामधेयः पुत्रो ववृते । पितुर्भूयो भूयः कथनेनापि अग्निशर्मा वेदाभ्यासे मनो न न्ययोजयत् । सैवाग्निशर्मा महता तपोबलेन वाल्मीकिरभवदिति । केषाञ्चन सम्मतौ दस्युकवाल्मीकी रामायणस्य कर्ता वाल्मीकिश्च भिन्नावेव । एतादृश्यां दशायां सत्यामपि बहूक्तानुश्रुतिः काचिद् भिन्ना वर्तते ।

एकदा ऋषिः प्रचेता भगवन्तं किरातेश्वरं पूजयितुं शास्त्रचर्चां कर्तुञ्च किरातप्रदेशं जगाम । बालकोऽग्निशर्मापि पितरमन्वगच्छत् । तौ अरण्यपथेन गच्छन्तौ आस्ताम् । प्रचेताः पुत्रं पाठयन् पुरो गच्छन् आसीत् । मार्गे एका नदी आसीत् । तस्यास्तटवर्तिषु तरुषु वानरा इतस्तत उत्प्लवमाना आसन् । उत्सुकोऽग्निशर्मा तद् द्रष्टुं तत्रैव स्थिरोऽभवत् । प्रचेताः शास्त्रचिन्तनं विदधानो दूरं जगाम । अग्निशर्मा यदा पितरं नाद्राक्षीत् तदा भीत्वा बहु चक्रन्द रुरोद च । स पितरमन्विषन् वनाभ्यन्तरं प्रापत् । पिता च दूरं गत्वा यदा पुत्रं नापश्यत् तदा तमाह्वयन् खिन्नमनाः स्वाश्रमं प्रत्यावर्तत ।

वने कश्चन आखेटजीवी विचरन् आसीत् । बालकस्य क्रन्दनं निशम्य स तत्समीपं ययौ । आखेटजीवी बालकस्य तत्रागमनस्य कारणञ्चाजानात् । आखेटजीवी निरपत्य आसीत् । तस्य पत्नी सन्ततिप्राप्तये व्याकुला आसीत् । सा तदर्थं कञ्चनोपायं कर्तुं पतिं मुहुर्मुहुर्निवेदयति स्म । सुन्दरं ऋषिकुमारं दृष्ट्वा करुणाभरितहृदय आखेटजीवी तं दत्तकपुत्रं निर्मातुं व्यचिन्तयत् । सोऽष्टवर्षं तं बालकं निजगाद, "मा रोदीः,

अहं त्वां पित्रा साकं मेलयिष्यामि । अधुना मम गृहे वस ।" इति समाश्वास्य आखेटजीवी अग्निशर्माणं स्वगृहं निनाय । आखेटकस्य पत्नी च ऋषिकुमारे पुत्रवत् स्नेहं चकार । अग्निशर्मा आखेटजीविदम्पती स्वपितरौ मनुते स्म । तौ च सन्तोषेण दिनानि अयापयताम् ।

अग्निशर्मा इति ब्राह्मणकुमारस्य नाम आसीत् । एतन्नाम आखेटकदम्पतिभ्यां न रोचते स्म । तौ ततः प्रभृति बालकस्य नाम रत्नाकर इति चक्रतुः । आखेटकदम्पत्योः पुत्रवल्लालनपालनाभ्यां संस्कारेण च रत्नाकरोऽपि आखेटजीवी अभवत् । स प्रतिदिनं मार्गं निकषा संस्थाय पदातीन् सार्थवाहांश्च विलुण्ठ्य धनसञ्चयं विदधाति स्म । स कदाचिद् जनान् जघान । जना रत्नाकरस्य नामश्रवणमात्रेणापि भृशं भीता बभूवुः । स पूर्वं चौरस्य, ततो लुण्ठकस्य, पर्यन्ते च दस्युकस्य वृत्तिं समाचरत् ।

एकदा देवर्षिर्नारदो ब्रह्मलोकान्मनुष्यलोकं गच्छन् आसीत् । स नारायणस्य नाम सङ्कीर्त्य वीणां प्रवाद्य च विचरति स्म । रत्नाकरो भगवन्नाम कीर्तयन्तं वीणां वादयन्तञ्च नारदं दूरादेव ददर्श । यदा नारदो निकटमाजगाम तदा शालतरोः पश्चादात्मानं सङ्गोप्य स्थितो रत्नाकरो झटिति आगत्य मार्गमवरुद्धमकरोत् । स विस्मितमानसं नारदं भाययन् न्यगदत्, "कुत्र गच्छसि ? अत्रैव स्थिरो भव । स्वपार्श्वे यदस्ति तत् सर्वं मह्यं देहि ।" नारदः स्वपार्श्वे किमपि नास्तीति अगदत् । रत्नाकरो वीणां कमण्डलुञ्च दातुमादिशत् । नारदो रत्नाकरस्य कृते तयोर्निष्प्रयोजनत्वं साधयामास परं रत्नाकरस्तद् दातुं भूयोऽपि आदिदेश । "न दीयते चेत् त्वामेव हनिष्यामि" इति च क्रूरचेताः स नारदं प्रत्यादिशत् । नारदोऽवदत्- "एताभ्यां किं करिष्यसि ?" क्रुद्धो रत्नाकरः प्रत्यवदत्- "परिवाराय दास्यामि ।" नारदोऽकथयत्- "तर्हि महत् पापमवाप्स्यसि ।" तच्छ्रुत्वा इतोऽपि क्रुद्धो रत्नाकर आत्मना एतत्सर्वं परिवाराणां पोषणाय तोषणाय च कृतमित्यत एतस्य पापमपि तैरेव लप्स्यते, न त्वात्मनेति व्यतर्कयत् । दानाऽऽदानविषये चिराय मिथः कटुसंवादो बभूव ।

नारदः पापस्य दण्डं लब्धुं परिवारास्तत्पराः सन्ति नवेति विज्ञाय प्रत्यागन्तुं रत्नाकरं परामृशत् । स विश्वासार्थं रत्नाकराय वीणामपि दातुं तत्परोऽभवत् । तां नीत्वा स गृहमगच्छत्, पापस्य दण्डस्य विषये परिवारान् चापृच्छत् । तेन कृतस्य पापस्य दण्डं सोढुं वोढुं वा न कोऽपि तत्परोऽभवत् । परिवर्तितमानसः स प्रत्यागत्य नारदचरणौ सङ्गृह्य विरुद्य च पूर्वकर्म स्मारं स्मारं पश्चात्तापं चकार । करुणार्द्रो नारदश्च सत्पथदर्शनार्थं रामशब्दस्य अक्षरद्वयस्य विपरीतं मरा इत्यक्षरद्वयं तमश्रावयत् । रत्नाकरस्तदेवं मरा इत्यक्षरद्वयं जपन् बहुकालं समाधौ तस्थौ । सततं समाधिमाचरतस्तस्य देहो वल्मीके परिणतोऽभवत् ।

बहुकाले व्यतीते, नारदो भूयोऽपि रत्नाकरस्य तपःस्थलमाजगाम । स वल्मीकावेष्टितस्य रत्नाकरस्य राम राम इति मन्त्रजपं शुश्राव । नारदस्तं समाधितो जागरयामास । पूर्वं कृतदस्युवृत्ती रत्नाकरोऽन्तःस्थमज्ञानं निवार्य शुद्धान्तःकरणः सन् वल्मीकाद् बहिरागतः । ततः स एव रत्नाकरो वाल्मीकिनाम्ना ख्यातिं लेभे ।

एकदा वाल्मीकिः शिष्येण साकं तमसानद्यां प्रस्नाय स्वाश्रमं प्रत्यावर्तमान आसीत् । निकषा क्रौञ्चयुगलं प्रीत्या तिष्ठदासीत् । तदैव कश्चिद् व्याधः पुँस्क्रौञ्चमवधीत् । पतिवियोगेन शोकाकुला स्त्रीक्रौञ्ची अधिकं विललाप । तद् दृष्ट्वा करुणहृदयस्य वाल्मीकेर्मुखात् सहसा छन्दोमयं वाक्यं निःसृतम् –

**मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।**

**यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥**

अनुष्टुप्छन्दसः करुणरसस्य च एतदेव पद्यं लौकिकसंस्कृतस्य प्रथमं श्लोकात्मकं काव्यमासीत् । महर्षिर्वाल्मीकिः संस्कृतसाहित्ये आदिकविरित्युपाधिना लोकख्यातिमवाप । लोकास्तं विश्वाऽऽदिमहाकविञ्च मेनिरे ।

काव्यशास्त्रकारेण आनन्दवर्धनेनापि ध्वन्यालोके एतन्निर्दिष्टम् –

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।**

**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥**

कविकुलगुरुः कालिदासोऽपि रघुवंशमहाकाव्ये कुशेध्माहरणाय आश्रमान्निष्क्रान्तो वाल्मीकी रोदनमनुसृत्य तदनुगच्छन् सीतां प्राप, यस्य मुनेर्व्याधमारितस्य क्रौञ्चपक्षिणो दर्शनेनोत्थितः शोकः श्लोके परिणत इति प्रसङ्गमुद्भाव्य एतदेव वर्णयति–

**तामभ्यगच्छद्रुदितानुसारी कविः कुशेध्माहरणाय यातः ।**

**निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः ॥**



एकदा देवर्षिनारदः पुनश्च वाल्मीकेराश्रमं समाययौ । नारदः कस्यचिन्महिमशालिनश्चरित्रवतश्च महापुरुषस्य विषये काव्यं रचयितुं वाल्मीकिमनुरुन्धे । वाल्मीकिर्नारदमेवं पप्रच्छ -

**को न्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान् ।**

**धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥**

**चारित्रेण च को युक्तः सर्वभूतेषु को हितः ।**

**विद्वान् कः कः समर्थश्च कश्चैकप्रियदर्शनः ॥**

देवर्षिर्नारदो रामजानक्योरादर्शमयं महिममण्डितञ्च चरितमवलम्ब्य सनातनधर्मसंस्कृतिमर्यादाख्यापकं रामायणकाव्यं विरचयितुं वाल्मीकिमित्थं परामृशत् -

**इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः ।**

**नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी ॥**

ततो वाल्मीकिरादिकाव्यं रामायणं विरचयितुमारब्धवान् ।

रामायणे सप्त काण्डानि, पञ्चशतं सर्गाः, चतुर्विंशतिसहस्राणि श्लोकाश्च सन्ति । रामायणं प्रक्षेपमुक्तं स्थापयितुं प्रतिसहस्रं श्लोकस्यारम्भो गायत्रीमन्त्रस्य चतुर्विंशत्यक्षरेण विहितोऽस्ति । यथा-

१. तत् = तपः स्वाध्यायनिरतं ...

२. स = स हत्वा राक्षसान् ...

३. वि = विश्वामित्रः स धर्मात्मा ...

४. तुः = तुष्टां वाचं ...

५. व = वनवासं हि ...

६. रे = राजा सत्यञ्च ...

७. णी (नि) = निरीक्ष्य स ...

८. यं = यदि बुद्धि...

९. भर् = भरतस्यार्यस्य ...

१०. गो = गच्छ शीघ्र...

११. दे = देशकालौ...

१२. व = वन्यास्ते च...

१३. स्य = स निर्जित्य...

१४. धी = धन्या ...

१५. म = मङ्गलाभिमुखी...

१६. हि = हितमदर्थं...

१७. धि = धर्मात्मा...

१८. यो = यस्य विक्रम...

१९. यो = योगक्षेम...

२०. नः = न ते ...

२१. प्र = प्रणम्य ...

२२. चो = चालनात्पर्वतेन्द्रस्य...

२३. द = दाराः पुत्राः...

२४. यात् = यामेव रात्रिं...

रामायणं पूर्वं शतकोटिश्लोकात्मकमासीदित्यनुश्रुतिरपि वर्तते। तस्यैकाक्षरमपि पातकनाशनक्षममिति विश्वस्यते स्म । उक्तञ्च-

**रामायणमिदं पुण्यं शतकोटिप्रविस्तरम् ।**
**एकैकमक्षरं पुंसां महापातकनाशनम् ॥**

रामायणे रामो मर्यादापुरुषोत्तमरूपेण वर्णितो वर्तते । स भगवतो विष्णोरवतारापेक्षयापि मानवो भवितुमीहते । स पुत्र-पति-भूपतीनां भारमादर्शपथमनुसृत्यैव साधु निरवहत् । रामेण विना राष्ट्रं न भवति परं रामेण सहितं वनमपि राष्ट्रं भवतीति वाल्मीकी रामायणे कवयति –

**न हि तद् भविता राष्ट्रं यत्र रामो न भूपतिः ।**
**तद् वनं भविता राष्ट्रं यत्र रामो निवत्स्यति ॥**

वाल्मीकेः पूर्वमपि रामकथा मौखिकरूपेण प्रचलिताऽऽसीत्। वाल्मीकेर्विरचनानन्तरमपि सर्वतः प्रथमं रामात्मजाभ्यां कुशलवाभ्यां प्रगाय एतच्छ्रावितमासीत् । रामायणं सनातनाऽऽर्यसंस्कृतिसमुपासकेषु नैकविधं महत्त्वं बिभर्ति । रामायणस्य शाश्वतं महत्त्वं स्वयं वाल्मीकिर्गायति -

**यावत् स्थास्यन्ति गिरयः सरितश्च महीतले ।**

**तावद् रामायणकथा लोकेषु प्रचरिष्यति ॥**

रामायणस्य क्षेपक-पाठभेद-रचनाकालादिविषयेषु नैकमत्यं वर्तते, तथापि आदिकवेर्वाल्मीके रामायणं सनातनसमाजे सर्वत्र सश्रद्धं सभक्ति च श्रूयते पठचते च । विद्वांसः, साधवः श्रद्धालवश्च वाल्मीकिं रामायणञ्च नितरां प्रशंसन्ति । यथा-

**कवीन्द्रं नौमि वाल्मीकिं यस्य रामायणीं कथाम् ।**

**चन्द्रिकामिव चिन्वन्ति चकोरा इव साधवः ॥**

एवञ्च -

**सदूषणापि निर्दोषा सखरापि सुकोमला ।**

**नमस्तस्मै कृता येन रम्या रामायणी कथा ॥**

रामायणमाश्रित्य बहवष्टीकाग्रन्था ग्रथिता वर्तन्ते । तेषु चतुर्दशशताब्द्यां रामानुजेन रचितं **रामानुजीयम्,** पञ्चदशशताब्द्यां गोविन्दराजेन कृतं **रामायणभूषणम्,** अष्टादशशताब्द्यां प्रसिद्धवैयाकरणेन नागेशभट्टेन लिखितं **रामायणतिलकम्,** रामवर्मणः **तिलकटीका,** माहेश्वरीतीर्थस्य **रामायणकूटम्** चेत्यादीनि प्रमुखाणि मन्यन्ते । रामायणमुपजीव्यं विधाय संस्कृतभाषायामेवाऽऽधुनिकासु नव्यार्यभाषासु च बहूनि काव्यनाटकादीनि विरचितानि सन्ति ।

## अभ्यासः

**१. अतिसङ्क्षेपेण उत्तरयत**

(क) मत्स्यपुराणवायुपुराणभ्यां किमवगम्यते ?

(ख) अग्निशर्मणः पितरौ कौ ?

(ग) पितरमदृष्ट्वा अग्निशर्मा किमकरोत् ?

(घ) आखेटजीवी अग्निशर्माणं कुत्र निनाय ?

(ङ) जनाः कथं बिभ्यति स्म ?

**२. सङ्क्षिप्तोत्तरं लिखत**

(क) रत्नाकरो मार्गमागत्य नारदं किं जगाद ?

(ख) रत्नाकरस्य परिवाराः किमकथयन् ?

(ग) रत्नाकरो वाल्मीकिनाम्ना कथं ख्यातिं लेभे ?

(घ) नारदः कीदृशं काव्यं रचयितुं वाल्मीकिं प्रेरितवान् ?

(ङ) रामायणस्य गायत्रीमन्त्राक्षरस्य च कः सम्बन्धः ?

### ३. अधो लिखितस्य पाठांशस्य स्वगिरा सारांशं लिखत

महर्षिवाल्मीकेर्विषये बह्व्योऽनुश्रुतयः प्रमाणानि च समुपलभ्यन्ते । ब्रह्मवैवर्तपुराणानुसारेण ब्रह्मा स्वदेहतः षोडशपुत्रान् जनयामास । तेषु प्रचेता अन्यतम आसीत् । वाल्मीकिस्तस्यैव प्रचेतसः पुत्रोऽभवत् । मत्स्यपुराणवायुपुराणे ब्रह्मणो दशमानसपुत्रेषु प्रचेता अपि आसीदिति निर्दिशतः । तन्निर्देशानुसारेणापि वाल्मीकिः प्रचेतसः सूनुरित्यवगन्तुं शक्यते । अपरानुश्रुतिर्वर्तते यत् पुरा सुमतिनामाख्यः कश्चन भृगुवंशी ब्राह्मणो बभूव । कौशिकवंशीया कन्या भृगोः पत्नी आसीत् । तयोऽग्निशर्मनामधेयः पुत्रो बभूव । पितुर्भूयो भूयः कथनेनापि अग्निशर्मा वेदाभ्यासे मनो न न्ययोजयत् । स एवाग्निशर्मा महता तपोबलेन वाल्मीकिरभवदिति । केषाञ्चन सम्मतौ दस्युकवाल्मीकी रामायणस्य कर्ता वाल्मीकिश्च भिन्नावेव । एतादृश्यां दशायां सत्यामपि बहूक्तानुश्रुतिः काचिद् भिन्ना वर्तते ।

### ४. अनुच्छेदं पठित्वा तदनुवर्तिनः प्रश्नान् उत्तरयत

नेपालभूमिः, अत्रत्या संस्कृतिः, परम्परा च निरुपमाः सन्ति । अनादिकालतो भूरियं देवतानामाशीर्वचसा वरदानेन च रक्षिता पालिता च वर्तते । ऋषिमहर्षीणां सिद्धपुरुषाणाञ्च तपःस्थलीरूपेण परिचितोऽयं देशः स्वयं नेमुनिना पालितत्वान्नेपाल इति नाम्ना विश्वस्मिन् विश्वे विख्यातो वर्तते । महापुरुषाणां लीलाभूरियं तेषां सत्कार्यैर्बाहुल्येन प्रेरितः प्रभावितश्चास्ते । अत्र भगवतः श्रीरामस्य, सीतायाः, तत्कुटुम्बानाम्, सेवकानाम्, रामायणस्य, रामायणप्रणेतुर्वाल्मीकेश्च प्रभावो बहुत्र दृश्यते । नेपालस्य बहूनि स्थाननामानि राममनुसरन्ति । रामेछाप-रामपुर-रामनगर-रामदी-रामधुनीप्रभृतिस्थानानां नामसु रामशब्दो योजितो वर्तते । जनानां नामकरणं रामप्रसाद-रामनारायण-रामहरि-रामदेव-लक्ष्मीराम-सीताराम-रामबहादुर-राममाया-रामकुमारीपदैर्विधीयते । अत्रैव रामशाहो नामा न्यायप्रियो राजा बभूव । धार्मिके सांस्कृतिके च क्षेत्रे रामजानक्योर्नामनी स्वयमायातः । रामनवमी-सीताजयन्ती-रामलीलाप्रभृतिपर्वोत्सवा रामसीतयोः प्रभावं प्रमाणयन्ति । रामजानक्योः परमभक्तस्य हनुमतो नाम्ना हनुमद्घट्ट-हनुमन्तेनदी-हनुमद्द्वार (हनुमानढोका) - हनुमाननगरसदृशानि स्थलानि ख्यातानि सन्ति । नेपालीसाहित्येऽपि रामपरिवारस्य रामायणस्य च विपुलप्रभावः परिलक्ष्यते । भानुभक्तीयरामायण-राघवालङ्काराऽऽदर्शराघव-मेरोरामसहितानि काव्यानि रामकथां प्रथयन्ति । रामचरितनिबद्धानि संस्कृतकाव्यानि नेपाल्यामनूदितानि च विलोक्यन्ते । लोकचर्याऽऽत्मभूतेषु बालन-भजनादिसांस्कृतिकगायनेषु रामशब्दो वारं वारमुच्चार्यते । नेपालीलोकोक्तावपि रामशब्दस्य

पौनः पुन्येन प्रयोगो भवति । मुखे रामनामकीर्तनं हृदि क्षुरधारा (मुखमा रामराम बगलीमा छुरा) इत्यत्र रामशब्दः सङ्कथनमलङ्करोति । इदानीमाधुनिकेषु नैपालकगीतेषु 'राम जाने' इति पदेन यतिर्निर्मीयते । मनोद्वेगोद्गारेषु सहसा रामशब्द आगच्छति । केचन शपथज्ञापने 'रामोराम' इति द्विरुक्तिं प्रयुज्य दृढविश्वासं दापयन्ति । भूकम्पाग्निकाण्ड-वज्रपातप्रभृतिप्राकृतिकसङ्कटेषु यानादिदुर्घटनासु च 'राम ! राम ! राम !' इत्युच्चार्य बहुवारं रामनाम कीर्त्यते । प्राणान्तकाले रामनामोच्चार्य मरणशीलस्य सद्गतिः प्रकाम्यते । अभिवादनावधौ जना 'रामराम !' इति द्विरुक्तिं प्रयुञ्जन्ति । कुत्रचिदधुनापि गणनाप्रसङ्गे प्रथमाङ्कबोधनाय 'राम' इत्युच्यते, ततो द्वि-त्रि-चतुरिति क्रमोऽनुपाल्यते । विविधजातीनां धार्मिक-सामाजिक-सांस्कृतिककार्येषु रामगाथा प्रगीयते । सुशासनाबद्धं राज्यं रामराज्यं निगद्यते । कतिचिद्वैष्णवसमाजे रामकथा विशेषनियमेन श्रूयते, श्राव्यते च । अस्माकं समाजे रामायणस्य रचयितुर्वाल्मीकेरपि प्रभावो दृश्यते । एतस्यादिकवेर्नाम्ना वाल्मीकिविद्यापीठं सञ्चलदस्ति । नवलपरासीजनपदस्य त्रिवेणीधामसमीपे वाल्मीकेराश्रमो वर्तते । भक्तपुरस्य वीरा-भद्रानामधेययोर्नद्योः सङ्गमे महर्षिवाल्मीकी रामायणं रचितवान् इति विषये विद्वांसः पौराणिकं प्रमाणं पुरस्कुर्वन्ति । कोजाग्रतपूर्णिमायां प्रतिवर्षं वाल्मीकिजयन्ती समायोज्यते ।

**प्रश्नाः**

(क) नेपालनामकरणस्य को हेतुः ?

(ख) धार्मिके सांस्कृतिके च क्षेत्रे रामजानक्योः कीदृशः प्रभावो दृश्यते ?

(ग) रामकथानिबद्धानि काव्यानि कानि ?

(घ) लोकोक्तिक्षेत्रे रामशब्दः कुत्र कुत्र प्रयुज्यते ?

(ङ) 'राम ! राम ! राम !' इति कदा उदीर्यते ?

(च) मरणशीलस्य कृते किमर्थं रामशब्द उच्चार्यते ?

(छ) गणनादौ प्रयुक्तेन रामशब्देन कोऽङ्को बुध्यते ?

(ज विदुषां मतानुसारेण कुत्र निवसन् वाल्मीकी रामायणं रचितवान् ?

(झ) एतस्यानुच्छेदस्य सारांशं लिखत ?

## ५. अधस्तनं कथांशं पठित्वा पृष्टान् प्रश्नान् उत्तरयत

लङ्कापते राक्षसराजस्य रावणस्य विनाशनानन्तरं श्रीरामोऽयोध्यामाजगाम । सर्वे रामस्य जयोद्घोषं कुर्वन्ति स्म । सर्वत्र हर्षोल्लासो व्याप्त आसीत् । रामो राजसिंहासनासीन आसीत् । ब्रह्म-विष्णु-महेशसहिता इन्द्रादिदेवता उपस्थिता आसन् । देवगणा मनुष्याश्च राममभ्यनन्दन् । सीता एतत् सर्वं विलोकयन्ती आसीत् । सर्वे राममेव वदन्ति, स्वस्य नाम तु न कोऽपि उच्चारयतीति विलोक्य

सा सभामध्ये अब्रवीत्, “तुच्छदशाननरावणस्य हननादेष उत्सवः समायोजितः। कथञ्चित् रामः सहस्राननं रावणमहनिष्यत् तदा किमभविष्यत् ?” सीताया वचनेन सभायां कोलाहलो जातः। अस्मिन् विषये सत्यमन्वेष्टुं यत्नः कृतः। सुमालीपुत्री कैकसी रावणौ असूत। एको दशाननः, अपरः सहस्राननश्च। दशाननो लङ्कायां निवसति स्म। सहस्राननः पुष्करद्वीपे वासं चकार। कालानन्तरं भीषणयुद्धे कालीरूपिणी सीता खड्गं प्रहृत्य सहस्राननरावणस्य शिरांसि चिच्छेद।

**प्रश्नाः**

(क) अयोध्यायां के देवा उपस्थिता आसन् ?

(ख) सीता किं व्यचारयत् ?

(ग) सभायां कथं कोलाहलो जातः ?

(घ) रावणयोर्माता का ?

(ङ) सीता कं जघान ?

६. **रामायणस्य प्रशस्तेः कारणानि विवेचयत।**

७. **शिक्षकस्य साहाय्येन वाल्मीकिरामायणस्य बालकाण्डात् स्वेच्छया दशश्लोकान् विचित्य तदाधारेण भगवतः श्रीरामस्य चारित्रिकवैशिष्ट्यं निरूपयत।**

८. **युष्माकं परिवारे भगवतः श्रीरामचन्द्रस्य पितुराज्ञापालनाद्यादर्शस्य कीदृशः प्रभावोऽस्ति ? विलिख्य कक्षायां प्रस्तुत।**

# वाल्मीक्याश्रमः

नेपालो बहुसंस्कृतिवाहकं राष्ट्रं वर्तते । अनादिकालतो बहवः सिद्धमहात्मानश्चिरं सन्तप्य धरामिमां पुपुषुः । तेन वयं भूरि कल्याणं प्राप्नुम इति विश्वसिमः । पौराणिकं वृत्तं लोकोक्तयश्च नेपालस्य महिमानं बहुत्र वर्णयन्ति । भूरियं ज्ञानभूमि-शान्तिभूमि-साधनाभूमिरूपेण आविश्वं प्रथितास्ति येनास्माकं समेषां गौरवं वृद्धिङ्गतं वर्तते । भगवतः श्रीरामस्य कीर्तिकौमुदीगायको महर्षिवाल्मीकिश्चात्रैव तपः समाचरदिति तथ्यं प्रकीर्णमैतिह्यं पुष्णाति ।

महर्षिवाल्मीकेर्जन्मस्थानविषये नैकमतानि सन्ति । नेपाले भारते च बह्व्योऽनुश्रुतयः श्रूयन्ते । भारतस्य पञ्जाबराज्यस्य अमृतसरनगरे, चण्डीगढस्थाने, हरियाणाराज्यस्य फतेहावादहिसारस्थानयोः, कर्णपुरस्य विठुरस्थाने, देहलीवर्तिनि पचकुइँयास्थाने, हरिद्वारस्य कनखले, चित्रकूटे वा वाल्मीकिर्जात इति भारतीया निगदन्ति । केषाञ्चन सम्मतौ विहारराज्यस्य चम्पारणजनपदस्य भैँसालोटनग्रामे वाल्मीकेराश्रम आसीत् । अधुना ग्रामोऽयं वाल्मीकिनगरमित्युच्यते । इतरे नेपाल एवासौ जनिं लेभे इतीतिवृत्तं प्रस्तुवन्ति । अनुसन्धातृभिर्व्यास-पाणिनि-ऋष्यशृङ्ग-भरद्वाजप्रभृतिप्रथितयशसां महर्षीणामिव महर्षिवाल्मीकेरप्याऽऽश्रमोऽत्रैवाऽऽसीदिति प्रमाणानि पुरस्क्रियन्ते । नवलपरासीजनपदस्य तमसा(पूर्णभद्रा)-स्वर्णभद्रा-नारायणीनदीनां सङ्गमे वाल्मीक्याश्रमो वर्तते । तत्र हरिहरमन्दिरं विराजते यच्च वाल्मीकिना स्थापितं मन्यते । यज्ञशाला-हवनकुण्ड-पूजास्थल-भोजनालय-गभीरकूप-पेषणी (सिलौटो)-सीताकूप-सीताकुटी-लवकुशपाठशालाश्च तत्र दृश्यन्ते ।

सीताया अन्तर्धानस्थलम्, लवकुशयोः क्रीडास्थलम्, रामेण मोचितस्य घोटकस्य बन्धस्तम्भः, सीताया जलपात्राऽऽधानस्थलम्, सुन्दरप्राकारः, उट्टङ्किता शैली कला, कङ्कपत्री, त्रिशूलञ्च आश्रमस्य प्रामाण्यं प्रदर्शयन्ति । निकषा निष्कल्मषा तमसानदी प्रवहति । तमसा-स्वर्णभद्रा-नारायणीसङ्गमे स्नात्वा आश्रमप्रत्यावर्तनावधौ केनचन व्याधेन व्यापादितं पुंस्क्रौञ्चं ततस्तदीयस्त्रीक्रौञ्च्या विलापञ्च दृष्ट्वा वाल्मीकेर्हृदयतो यत्र पद्यमयः श्लोको बहिः पुस्फोट तद् वनमपि एतदेवेति तर्क्यते । रामायणानुसारेण वाल्मीकिः स्नानावसरे तमसानद्या जलं पङ्करहितं सत्पुरुषस्य मन इव स्वच्छमस्तीति शिष्यं जगाद । तत आश्रमस्य पवित्रता सौन्दर्यञ्चावगम्यते । तमाश्रमं विलोकयितुमिदानीमपि जना यान्ति । माघकृष्णाऽऽमावस्यायामाश्रमस्य पारेगङ्गं त्रिवेण्यां (तमसा-स्वर्णभद्रा-नारायणीसङ्गमे) मेला भवति यतो हि दिवसोऽयं वाल्मीकेः पुण्यतिथिर्मन्यते ।



श्रीरामो लोकापवादेनायोध्यातः सीतां तत्याज । लक्ष्मणस्ततः सीतामानीय आश्रमेऽस्मिन् अत्यजत् । सीता अत्रैव लवकुशनामधेयौ पुत्रौ जनयामास । महर्षिवाल्मीकिस्तावध्यापयत् । तौ च पश्चाद्रामायणकथां जगतुः । तच्छ्रुत्वा रामः सीतावियोगव्यथया सातिशयं पीडितो बभूव ।

भक्तपुरजनपदस्य भक्तपुरनगरपालिकायाः षोडशवडाक्षेत्रे हनुमानघाटनामकं स्थानं वर्तते । तत्र वीरा-भद्रा-तमसानाम्न्यस्तिस्रो नद्यः प्रवहन्ति । हनुमान् अत्रैव तपस्तेपे अनेनैव कारणेनास्य स्थलस्य नाम हनुमानघाट इति जातम् । निकषा हनुमन्तेनामधेया नदी प्रवहति । वाल्मीकिरामायणे तमसायास्तटे वाल्मीकेराश्रमो वर्णितोऽस्ति । इयं हनुमन्तेनदी सैव तमसाऽस्तीति कथ्यते । वाल्मीकिरत्रैवोषित्वा रामायणं प्रणिनार्येति केषाञ्चन मतमस्ति । हनुमानघाटनिकटे महादेवस्य पाषाणमूर्तिर्विराजते । मूर्तिरेषा वाल्मीकीश्वरनाम्ना प्रसिद्धा वर्तते । वाल्मीकीश्वरं निकषा संस्थाय महर्षिवाल्मीकी रामायणं व्यरचयदिति जनश्रुतिरस्ति । वाल्मीकीश्वरस्य पाषाणमूर्तिरेषा अत्र महर्षिवाल्मीकेश्चिरस्थितिं सङ्केतयति । हनुमानघाटनामके स्थाने स्थित्वा हनुमान्, रामलक्ष्मणौ च चिपिटान्नं भक्षयाञ्चक्रुरित्यपि श्रूयते यद् वाल्मीकेरत्रत्यमस्तित्वं सबलीकरोति । हनुमानघाटस्थाने कोजाग्रतपूर्णिमायां वाल्मीकिजयन्ती समायोज्यते ।

अपरा काचिद् भिन्ना उक्तिरपि प्रचलिता वर्तते । नवलपरासीजनपदस्य पारेत्रिवेणि चितवनजनपदे तमसानद्यास्तीरे वाल्मीकेराश्रम आसीत् । तत्र तपस्यारतो वाल्मीकिः सहसा भक्तपुरस्य वीरा-भद्रानद्योः सङ्गममाजगाम । स्कन्दपुराणस्य नेपालमाहात्म्यवर्णनप्रसङ्गस्य भाषावंशावल्याश्चानुसारेण देवर्षिणा नारदेन रामायणकथां विरचयितुं प्रेरितो वाल्मीकिस्तदुत्तमं कार्यं कर्तुमुचितस्थानस्य विषये नारदमेव पप्रच्छ । नारदो "नेपालक्षेत्रस्य दोलागिरेराग्नेयभागे वीरा-भद्रानद्योः सङ्गमे अतिरमणीयस्थलमस्ति, तत्रैव गत्वा रामायणं रचय" इति वाल्मीकिं परामृशत् । वाल्मीकिश्च तत्रैव एत्य तत्काव्यं विरचयामास ।

वाल्मीकेर्जन्मस्थलस्य, आश्रमस्य, रामायणरचनास्थलस्य च विषयेषु मतैक्यं नास्ति । तदा सम्प्रतीव देशानां सीमा निर्धारिता नासीत् । इदानीं किं स्थानं कुत्र विराजते इत्येव चिन्तनीयं भवति । सत्यं यत् किमपि स्यात्, वाल्मीक्याश्रमस्तपोभूमिः पुण्यतीर्थस्थलञ्चास्तीति विषये नास्ति कस्यापि विप्रतिपत्तिः । नैकविधानि प्रमाणानि वाल्मीकिं नेपालभूम्या साकं योजयन्ति । अत्र गहनाध्ययनस्यानुसन्धानस्य च आवश्यकता वरीवर्ति ।

## अभ्यासः

### १. अतिसङ्क्षेपेण उत्तरयत

(क) सिद्धमहात्मानः किं चक्रुः ?

(ख) अस्माकं गौरवं कथं वृद्धिङ्गतं वर्तते ?

(ग) वाल्मीकिः किं जगौ ?

(घ) अनुसन्धातारः किं पुरस्कुर्वन्ति ?

(ङ) तमसानद्या जलं कीदृशमासीत् ?

(च) वाल्मीकेः पुण्यतिथिः कदा मन्यते ?

(छ) सीता कुत्र लवकुशौ जनयामास ?

(ज) वाल्मीकीश्वरस्य पाषाणमूर्तिः कुत्रास्ति ?

(झ) वाल्मीकिः कुत्र आजगाम ?

(ञ) सन्धिं विच्छिद्य लिखत

अनुसन्धातृभिर्व्यास-पाणिनि-ऋष्यशृङ्ग-भरद्वाजप्रभृतिप्रथितयशसां ऋषिमहर्षीणामिव महर्षिवाल्मीकेरप्याऽऽश्रमोऽत्रैवाऽऽसीदिति प्रमाणानि पुरस्क्रियन्ते ।

(ट) 'विप्रतिपत्तिः' शब्दस्य कोऽर्थः ?

### २. सङ्क्षेपेण उत्तराणि लिखत

(क) वाल्मीकेर्जन्मस्थानविषये कीदृशानि मतानि सन्ति ?

(ख) वाल्मीक्याश्रमे कानि वस्तूनि दृश्यन्ते ?

(ग) लवकुशौ कुत्र कस्मादधीतवन्तौ ?

(घ) हनुमानघाटनामके स्थाने के किं भक्षयाञ्चक्रुः ?

(ङ) नारद-वाल्मीक्योर्मध्ये कस्मिन् विषये कीदृशः संवादो बभूव ?

## ३. पाठस्थमनुच्छेदं पठित्वा तदनुवर्तिनः प्रश्नान् उत्तरयत

भक्तपुरजनपदस्य भक्तपुरनगरपालिकायाः षोडशवडाक्षेत्रे हनुमानघाटनामकं स्थानं वर्तते । तत्र वीरा-भद्रा-तमसानाम्न्यस्तिस्रो नद्यः प्रवहन्ति । हनुमान् अत्रैव तपस्तेपे अनेनैव कारणेनास्य स्थलस्य नाम हनुमानघाट इति जातम् । निकषा हनुमन्तेनामधेया नदी प्रवहति । वाल्मीकिरामायणे तमसायास्तटे वाल्मीकेराश्रमो वर्णितोऽस्ति । इयं हनुमन्तेनदी सैव तमसाऽस्तीति कथ्यते । वाल्मीकिरत्रैवोषित्वा रामायणं प्रणिनार्येति केषाञ्चन मतमस्ति । हनुमानघाटनिकटे महादेवस्य पाषाणमूर्तिर्विराजते । मूर्तिरेषा वाल्मीकीश्वरनाम्ना प्रसिद्धा वर्तते । वाल्मीकीश्वरं निकषा संस्थाय महर्षिवाल्मीकी रामायणं व्यरचयदिति जनश्रुतिरस्ति । वाल्मीकीश्वरस्य पाषाणमूर्तिरेषा अत्र महर्षिवाल्मीकेश्चिरस्थितिं सङ्केतयति । हनुमानघाटनामके स्थाने स्थित्वा हनुमान्, रामलक्ष्मणौ च चिपिटान्नं भक्षयाञ्चक्रुरित्यपि श्रूयते यद् वाल्मीकेरत्रत्यमस्तित्वं सबलीकरोति । हनुमानघाटस्थाने कोजाग्रतपूर्णिमायां वाल्मीकिजयन्ती समायोज्यते ।

**प्रश्नाः**

(क) हनुमानघाटस्थाने का नद्यः प्रवहन्ति ?

(ख) हनुमन्तेनद्या विषये किं कथ्यते ?

(ग) वाल्मीकीश्वरं निकषा वाल्मीकिः किमकरोत् ?

(घ) वाल्मीकीश्वरस्य पाषाणमूर्तिः किं सङ्केतयति ?

(ङ) हनुमानघाटनामके स्थाने वाल्मीकेरस्तित्वं कथं सबलीभवति ?

(च) वाल्मीकिजयन्ती कदा कुत्र समायोज्यते ?

## ४. अधो लिखितमनुच्छेदं पठित्वा निर्दिष्टकार्याणि कुरुत

दत्तात्रेयः प्राचीन ऋषिर्वर्तते । पुराणानुसारेण दत्तात्रेयो भगवतो विष्णोश्चतुर्विंशत्यवतारेषु षष्ठोऽवतारो मन्यते । स परमयोगी सिद्धमहापुरुष आसीत् । स अत्रेरनसूयायाश्च पुत्र आसीत् । महासती अनसूया त्रीन् पुत्रान् जनयामास । भगवतः शङ्करस्यांशतस्तपोमूर्तिर्महर्षिदुर्वासाः, भगवतो ब्रह्मणः अंशतः सदाचारपोषकश्चन्द्रमाः, भगवतो विष्णोः अंशतस्त्रिमुखो गौरवर्णो ज्ञानमूर्तिर्दत्तात्रेयश्चानसूयाया जनिं लेभिरे । दत्तात्रेयस्य जन्मप्रसङ्गे एका कथा प्रसिद्धा वर्तते । मार्कण्डेयपुराणानुसारेण प्रतिष्ठानपुरे कौशिकनामकः कश्चन ब्राह्मणो वसति स्म । पूर्वजन्मनः पापस्य कारणात् स कुष्ठरोगेण पीडित आसीत् । तस्यैकस्यां वेश्यायामासक्तिरासीत् । एकदा तस्याऽऽज्ञानुसारेण पतिव्रता स्त्री तं स्कन्धे

ऊढ्वा रात्रौ वेश्याऽऽगारं गच्छन्ती आसीत् । मार्गे ब्राह्मणस्य पादो माण्डव्यस्य शरीरमपृशत् । तेन क्रुद्धो ऋषिः 'सूर्योदयं यावन्म्रियस्व' इति शशाप । सत्याः प्रभावेण सूर्योदयो नाभवत् येन सर्वत्र महान् कोलाहलो जातः । ब्रह्मणः कथनानुसारेण सर्वे देवा अत्रेः पत्नीमनसूयामुपागच्छन् । अनसूया तव पतिर्जीवितो नीरोगश्च भविष्यतीति निगद्य ब्राह्मणपत्नीं समाश्वासयत् । ततः सूर्योदयोऽभवत् । अनसूया ब्राह्मणं पुनर्जीवितञ्च कृतवती । ततः प्रसन्ना देवाः स्वेच्छया तव गर्भतो ब्रह्मा-विष्णु-महेशास्त्रय एव देवा जनिं लप्स्यन्त इति वरं प्रायच्छन् । तदनुसारेण ब्रह्मा सोमस्वरूपेण, शिवो दुर्वाससः स्वरूपेण, विष्णुश्च दत्तात्रेयस्वरूपेण समजायन्त ।

हैहयराजोऽत्रिमुनिमधिकं पीडयामास । ततः क्रुद्धो दत्तात्रेयो गर्भतः सप्तम एव दिवसे बहिरागत आसीत् । दत्तात्रेयो योगसाधनरत आसीत् । योगसम्बद्धा अनेके ग्रन्था अस्यैव सन्तीति कथ्यते । भक्तप्रह्लादो दत्तात्रेयादेव वेदान्तं जज्ञौ । पुराणानामनुसारेण दत्तात्रेयस्य चतुर्विंशतिसङ्ख्याका गुरव आसन् । ते यथा—पृथ्वी, वायुः, आकाशः, जलम्, अग्निः, चन्द्रमाः, सूर्यः, कपोतः, अजगरः, सागरः, पतङ्गः (भ्रमरः), मधुकरः, गजः, मधुहारी (प्राणिविशेषः), हरिणः, मत्स्यः, पिङ्गलावेश्या, गृध्रः, बालकः, कुमारीकन्या, बाणकारकः, सर्पः, ऊर्णनाभिः, पुत्तलिका च । दत्तात्रेयस्योपदेशा मानवान् लोभाद् दूरं स्थातुं शिक्षयन्ति । असौ नेपालस्य प्राचीन ऋषिर्मन्यते ।

काष्ठमण्डपोपत्यकायाः पूर्वदक्षिणभागे गोदावरीक्षेत्रे असौ तपश्चकार । भक्तपुरस्य तँचबहालटोलनामके स्थाने दत्तात्रेयस्य मन्दिरं वर्तते । आदिशङ्कराचार्येण मन्दिरमिदं निर्मापितमासीत् । हिन्दवो बौद्धमार्गिणश्चात्र सभक्ति सदर्शनं दत्तात्रेयं पूजयन्ति । अत्र श्रावणस्य सोमवासरे, पौषस्य बुधवासरे, हरितालिकायाम्, धान्यपूर्णिमायाञ्च मेला भवति । धान्यपूर्णिमायां दत्तात्रेयस्य जन्मजयन्ती आयोज्यते । दत्तात्रेयस्य दर्शनं त्रिदेवानामेव दर्शनजन्यं पुण्यफलं ददातीति मान्यतामनुसृत्य दर्शनार्थिनोऽत्र आगच्छन्ति । नवविवाहिता दाम्पत्यजीवनस्य सौख्याय अटलसौभाग्यकामनया चात्र दर्शनं विदधति । अत्र प्रसादत्वेन अर्पितयोर्दधिचिपिटान्नयोर्भक्षणाद् अस्पष्टवाचां वृद्धानां बालानाञ्च वाक् स्पष्टा भवतीति जनविश्वासो वर्तते । अत्र नित्यपूजा भवति । काष्ठमण्डप इव एकस्यैव वृक्षस्य काष्ठेन निर्मितं त्रितलात्मकं मन्दिरमिदं नेपालस्य सांस्कृतिकवैभवस्योत्कृष्टनिदर्शनरूपेण विराजमानमस्ति ।

**प्रश्नाः**

(क) दत्तात्रेयस्य जन्मप्रसङ्गं कथयत ।

(ख) अनसूयायाः परिचयं दत्त ।

(ग) ब्राह्मणस्य कुष्ठरोगस्य कारणं लिखत ।

(घ) ब्रह्म-विष्णु-महेश्वराणामंशाः के ?

(ङ) दत्तात्रेयस्य चतुर्विंशतेर्गुरूणां नामानि क्रमेण सूचीं कुरुत ।

(च) अधो लिखितानां पदानामाधारेण दत्तात्रेयमन्दिरस्य विषयेऽनुच्छेदमेकं लिखत

(अ) मन्दिरस्यावस्थितिः (आ) मन्दिरस्य स्वरूपम्

(इ) मेलावसराः (ई) नवविवाहितानां दर्शनकामना

(उ) दधिचिपिटान्नयोर्भक्षणस्य कारणम्

(छ) काष्ठमण्डप-दत्तात्रेयमन्दिरयोः साम्यं निगदत ।

(ज) गोदावरीक्षेत्रस्य दत्तात्रेयस्य च सम्बन्धं कक्षायां श्रावयत ।

(झ) अधःस्थस्य वाक्यस्य विश्लेषणं कृत्वा त्रिभिर्वाक्यैः पुनर्लेखनं कुरुत

भगवतःशङ्करस्यांशतस्तपोमूर्तिर्महर्षिदुर्वासाः, भगवतोब्रह्मणःअंशतःसदाचारपोषकश्चन्द्रमाः, भगवतो विष्णोः अंशतस्त्रिमुखो गौरवर्णो ज्ञानमूर्तिर्दत्तात्रेयश्चानसूयाया जनिं लेभिरे ।

(ञ) दत्तात्रेयोऽस्मान् किं शिक्षयति ? एकवाक्येन कथयत ।

**५. अधो लिखितं कथांशं पठित्वा चतुर्भिर्वाक्यैः साराशं लिखत**

लक्ष्मणः सीतां वाल्मीक्याश्रमे परित्यज्य अयोध्यां प्रत्याजगाम । सिंहासनारूढो रामः सीतावियोगेन व्यथित आसीत् । रामं व्यथितं दृष्ट्वा लक्ष्मणोऽवदत्, "भवदाज्ञया अहं शुभाचारिणीं सीतां महर्षिवाल्मीकेराश्रमं निकषा त्यक्त्वा भूयोऽपि भवतश्चरणसेवायामुपागतोऽस्मि । भवतो दशां दृष्ट्वा ममापि चेतो विचलति । भवादृशानां महानुभावानां कृते शोको न शोभते । जगति यः सञ्चीयते तस्य विनाशोऽपि नासम्भवः । स्त्री-मित्र-धनादिषु आसक्तिर्नोचिता । एतेभ्यो वियोगः सुनिश्चित एव । भवान् मनोबुद्ध्यात्मनो वशीकर्तुं सर्वथा क्षमः । शोकस्तु दुर्बलानां लक्षणम् । न्यायेन राज्यं पाल्यताम् । वयं सर्वदैव भवन्तमनुसरामः ।" लक्ष्मणकथनेन ईषच्छान्तचेता रामो राज्यभारं निरवहत् परं संन्यासिनो रूपेण जीवनं यापयाञ्चकार ।

**६. वाल्मीक्याश्रमसम्बद्धानि तथ्यानि अनुश्रुतिञ्च वर्णयत ।**

**७. वाल्मीक्याश्रमस्य संरक्षणाय सर्वकारस्य पक्षतः कर्तव्यानि कार्याणि उल्लिखत ।**

**८. परिवारस्य वसतेर्वा कञ्चन विज्ञं पृष्ट्वा स्वनिवासक्षेत्रस्य सांस्कृतिकमहत्त्वख्यापकानां प्रमुखस्थलानां विवरणं निर्मात ।**

द्वादशः पाठः

# नेपालः

नेपालो बहुसांस्कृतिकानां बहुधार्मिकाणाञ्च जनानां भूमिरस्ति । यथा एकस्माद् गवाक्षाद् बहूनि दृश्यानि द्रष्टुं शक्यन्ते तथैव सुन्दरस्थले नेपाले अनेकानि भौगोलिकानि परिदृश्यानि अनुभवितुं शक्यन्ते । एतद्देशः मुनीनां तपोभूमिरस्ति । हिमालयानां मनोरञ्जकैर्दृश्यैः, निर्झराणां सुमधुराभिः झर्झरध्वनिभिः, पक्षिणां कलरवैश्च व्याप्तो वर्तते नेपालः । प्रतिवर्षं लक्षाधिकाः पर्यटकाः अस्य सौन्दर्यपानाय आगच्छन्ति । पूर्वे मेचीगङ्गा वहति चेत् पश्चिमे कालीगङ्गा प्रवहति । तयोर्मध्यभागे अवस्थितस्य नेपालस्य उत्तरत्र हिमालयाः सर्वदा प्रफुल्लिता अवलोक्यन्ते । दक्षिणे समतलभूमिः शस्यशालिनी अस्मान् परिपोषयन्ती हर्षिता विलोक्यते । पूर्वजानां प्राणोत्सर्गैः संरक्षिते एतादृशे नेपालदेशे स्वसंस्कृतिं पालयन्तो वयं गौरवमनुभवामः ।



बहुविधेषु धार्मिकेषु ग्रन्थेषु, पुराणेषु च नेपालस्य चर्चा विहिता दृश्यते। नेपालः प्राचीनभूमिरस्ति। त्रयोदशकोटिभ्यो वर्षेभ्यः पूर्वमेव पर्वतशृङ्खलानामुत्पत्तिरभवदिति वैज्ञानिकाः कथयन्ति। तेषामध्ययनेन पश्चिमनेपालस्य बुटवलक्षेत्रे रामापिथेकस इति आदिकालिकस्य मानवस्य अवशेषस्य प्राप्त्या एककोटिभ्यो वर्षेभ्यः प्रागेव अत्र मानवा वसन्ति स्म इति प्रमाणितं वर्तते।

नेपाल इति नाम्नः प्रथममुल्लेखस्तु अथर्वपरिशिष्टे प्राप्यते। तस्य रचनाकालस्तथा निश्चितो नास्ति परन्तु खीष्टपूर्वं पञ्चमषष्ठशताब्द्योरन्तराले तस्य रचना अभूदिति मन्यन्ते विद्वांसः। तस्मिन् ग्रन्थे अवन्ती-कामरु-विदेह-केकयोदुम्बरदेशानां क्रमे एव नेपालस्य चर्चास्ति। विनयसङ्ग्रहनामके बौद्धग्रन्थे बुद्धस्य समये तस्य शिष्याः वणिग्भिः सह नेपाले प्रविष्टा इति सन्दर्भः प्राप्यते। महाभारतस्य वनपर्वणि नेपालविषयस्य चर्चा वर्तते, एतेन नेपालं मण्डलरूपेण तदा व्यवह्रियते स्म इति ज्ञातुं शक्यते।

खीष्टपूर्वं चतुर्थशताब्द्याः आवश्यकसूत्रनामके जैनग्रन्थे तथा कौटिल्यस्य अर्थशास्त्रे च नेपालस्य प्रसङ्गो दृश्यते। स्कन्दपुराणे तु नेपालस्य विषये नेपालमाहात्म्यमिति प्राप्यते। भारतीयभूपतिना समुद्रगुप्तेन इलाहावादाभिलेखे प्रतिवेशिराज्यरूपेण नेपालस्य नाम गृहीतो वर्तते। ततः पश्चाद् येऽभिलेखा अस्मिन् विषये प्राप्यन्ते तेषु स्वतन्त्रराज्यरूपेण नेपालस्य उल्लेखो विलोक्यते। नेपाले प्राप्तेषु शिलालेखेषु ५६९ तमे वैक्रमाब्दे लिखितस्य टिस्टुङस्थानस्य अभिलेखे प्रथमवारं नेपाल इनि नाम उट्टङ्कितं वर्तते। ततः पश्चाद् विविधेषु अभिलेखेषु नेपाल इति नाम्नो बहुधा प्रयोगो दृश्यते। युगानुसारेण नेपालस्य नाम भिन्नमस्तीति प्रसङ्गे श्लोकोऽयं प्राप्यते-

**सत्ये सत्यवती तत्र त्रेतायां तु तपोवनम्।**
**द्वापरे मुक्तिसोपानं कलौ नेपालिका पुरी॥**

नेपालस्य नामकरणप्रसङ्गे भाषाजातयः प्रमुखाधाराः सन्ति। लिच्छविसमये नेपालनाम्नि बहुक्षेत्राणि समाविष्टानि आसन् परन्तु मल्लकाले उपत्यकास्थानानि एव नेपाल इति नाम्ना सम्बोधितानि। यदा नेपाल एकीकृतस्तदा नेपालस्य राजधानी काष्ठमण्डपमभवत्। अनन्तरं नेपालनाम्ना वर्तमाना भूमिः सम्बोधिता। संस्कृतभाषायां नीपः इति पर्वतस्य अधोभागो भवति। आलयः इति गृहं स्थानं वा अस्ति। अतः पर्वतश्रेणीनामधोभागे स्थितस्य अस्य देशस्य नाम नेपाल अभवदिति केचन वदन्ति।

किरातीया नेपा एव पश्चाद् नेपालनाम्ना व्यवहृतो वर्तत इति वदन्ति। तेषां भाषायां ने इति मध्यः, पा इति देशः भवति। तस्मात् कारणाद् मध्यपर्वतीयखण्डे विराजिततया इदं क्षेत्रं नेपालाख्यं बभूव इति विश्वस्यते। तिब्बतक्षेत्रीयाः ने इति गृहम्, पाल इति ऊर्णां वदन्ति। उच्चपर्वतीयक्षेत्रेषु मेषपालनस्य परम्परा वर्तते। तेन ऊर्णोत्पादने प्राचीनकालादेव नेपालः सुप्रसिद्धो विद्यते। अनेन कारणेन अस्य देशस्य नाम ऊर्णागृहरूपेण नेपाल इति बभूव। एवं कथयन्ति केचन।

नेवारजातीयाः पूर्वं नेपा इत्येव सम्बोधयन्ति स्म । एतेषां मते अपि ने इति मध्यः, पा इति देशः भवति । हिमालयपर्वतानां मध्यभागे स्थिततया क्षेत्रमिदं नेपालनामकं जातमिति ते विश्वसन्ति । लेप्चाभाषायां ने इति पवित्रम्, पाल इति गुहा भवति । इत्थं विचारिते सति पुण्यभूमिरूपेण अस्य नाम नेपालो जात इति कथयितुं शक्नुमः । तामाङभाषायां ने इति स्तनः भवति । पृथिव्याः स्तनरूपेण पर्वतादयो गृह्यन्ते । पृथिव्याः स्तनस्वरूपैः पर्वतैः पालितं क्षेत्रं नेपाल अभूदिति तेषां मतम् ।

नेपालमाहात्म्यानुसारेण नेनामकेन ऋषिणा इदं क्षेत्रं पालितं, शासितञ्च । अतोऽस्य नाम नेपाल इति जातम् । दक्षिणभारतस्य केरलक्षेत्रनिवासिनो मालबारजातिरूपेण परिचिता नेवाराः सिम्रौनगढस्य संस्थापकेन नान्यदेवेन सह अत्र आगताः । तेषामागमनतः पश्चाद् अस्य नाम नेपाल इति बभूव । इत्थं केषाञ्चन मतमस्ति । नेपालस्य प्राचीनशासका गोपालवंशजा नीपाः कथ्यन्ते, तेषां आलयः नेपाल अभवदिति केचन विश्वसन्ति । चिनयात्रिणः नेपालं परिचाययितुं निपोलो इति कथयन्ति स्म । तदेव नाम पश्चाद् नेपाल अभूदिति च कथ्यते । कतिपयेषु बौद्धग्रन्थेषु नेवाल इति अस्य नाम प्राप्यते ।

लिच्छविकालात् प्राङ् नेपालदेशस्य इतिहासाध्ययनाय अभिलेखादयो न प्राप्यन्ते । वंशावल्यनुसारेण, पुराणानुसारेण च काष्ठमण्डपोपत्यकायाः विषये विविधाः कथाः प्राप्यन्ते । प्राचीनकाले काष्ठमण्डपोपत्यका नेपालोपत्यका इति नाम्ना परिचीयते स्म । तदा काष्ठमण्डपोपत्यका वनैर्व्याप्ता आसीत् । अस्य मध्ये सरोवर आसीत् । सरोवरे नागा निवसन्ति स्म । अत एव नागसरोवरनाम्ना (नागदह) इदं स्थानं प्रसिद्धमासीदिति वदन्ति विचक्षणाः । अत्र च समये समये विपश्वीबुद्धः, शिखीबुद्धः, विश्वभूबुद्धः, मञ्जुश्रीबोधिसत्वः, क्रकुच्छन्दबुद्धश्च आगता आसन् इति कथ्यते ।



प्राप्तस्रोतांसि परिलक्ष्यंते चेन्नेपालोपत्यकायामागतः प्रथमो महात्मा विपश्वीबुद्ध आसीत्। एष महात्मा बन्धुमतीनगरे सत्ययुगे एव आगत आसीदिति विश्वस्यते। स आगत्य नागार्जुनपर्वतेऽवसत्। किञ्चित्कालानन्तरं चैत्रशुक्लपूर्णिमायां नागसरोवरस्य मध्यभागे कमलस्य बीजमवपत्। अत एव तस्मिन् दिने अद्यापि विपश्वीबुद्धं संस्मृत्य मेलाया आयोजनं भवतीति मन्यते। तस्य षण्मासानन्तरं आश्विनशुक्लपूर्णिमायामलौकिकपुष्पमुत्पन्नम्। तस्मिन् भगवान् स्वयम्भूः प्रकटित इति श्रुत्वा शिखीबुद्धः तस्य आराधनार्थमत्र आगतः। समयानन्तरं शिखीबुद्धः स्वयम्भुवि भगवति एव विलीनोऽभवत्। शिखीबुद्धो यत्र स्थितस्तस्य पर्वतस्य नाम ध्यानोच्चपर्वत इति अभूत्। तं संस्मृत्य माघमासस्य प्रथमे दिने तत्र मेलाया आयोजनं भवतीति कथा प्रचलिताऽस्ति।

विश्वभूबुद्धस्त्रेतायुगे अत्र आगत्य बहुपुष्पयुक्तं पर्वतं विचित्य आश्रमं निर्माय स्थितः। स पर्वतः फुलोच्च इति नाम्ना प्रसिद्धोऽभवत्। उपत्यकायाः जलनिष्काशनस्य मार्गः एतेनैव शिष्यान् प्रति विमर्शीकृत इति अपरा कथा विद्यते। विश्वभूबुद्धस्य प्रत्यावर्तनस्य केभ्यश्चिद् वर्षेभ्यः पश्चात् चिनदेशाद् मञ्जुश्रीबोधिसत्वः अत्रागतः। तस्य विषये वंशावलीषु अधिकचर्चा विहिताऽस्ति। सोऽत्रागत्य स्वयम्भुवो दर्शनं प्राप्य उपत्यकायाः जलनिष्काशनाय अचिन्तयत्। स उपत्यकाया भूगोलमधीत्य कटुवाल इति नामके स्थाने जलनिष्काशनस्य मार्गं निरमात्। ततः स्वयम्भूक्षेत्रतो गुह्येश्वरीक्षेत्रपर्यन्तं विशालं नगरं समस्थापयत्। स एव धर्माकरनामकं पुरुषं राजपदेन समलङ्करोत्। मञ्जुश्रीबोधिसत्वस्य प्रत्यावर्तनानन्तरं तस्य शिष्याः तत्संस्थापितस्य नगरस्य मञ्जुपत्तनम् इति नाम अकुर्वन्। अद्यापि वसन्तपञ्चम्याः अवसरे स्वयम्भूचैत्ये तं संस्मृत्य मेलकस्य आयोजनं भवतीति कथ्यते।

वंशावल्यनुसारेण मञ्जुश्रीबोधिसत्वस्य प्रत्यावर्तनानन्तरं क्रकुच्छन्दबुद्धः स्वयम्भुवः ज्योतिदर्शनार्थमत्रागतः। तदाऽत्र जलाभावं विलोक्य गुह्येश्वरीं प्रार्थयत्। ततो गुह्येश्वरी शिवपुरीतो वाग्वतीं समुदपातयत्। क्रकुच्छन्दबुद्ध एव निःसन्तानस्य धर्माकरस्य शासनकालानन्तरं धर्मपालं राजपदेन समलञ्चकार। धर्मपालानन्तरं सुधन्वा राजा अभवत्। स सीतायाः स्वयम्वरे भागं ग्रहीतुं तत्र प्रस्थित आसीदिति च प्रसङ्गो वर्तते। द्वापरयुगस्य अन्त्यकाले गौडदेशस्य राजा प्रचण्डदेवः स्वयम्भुवः, गुह्येश्वर्याश्च दर्शनार्थमत्र आगतः। स स्वयम्भुवः समीपे वसुपुर-अग्निपुर-वायुपुर-नागपुर-शान्तिपुरनामकानां कुटीराणां निर्माणमकरोत्। कलिकालस्यागमनं विज्ञाय स स्वयम्भुवो ज्योतिः पाषाणखण्डैः पिधाय चैत्यनिर्माणमकरोदिति वंशावली कथयति। ततस्तस्य पुत्रः शक्तिदेवः, तदनन्तरं गुणकामदेवोऽत्र राज्यमकरोदिति कथा प्राप्यते।

# अभ्यासः

## १. अतिसङ्क्षेपेण उत्तरयत

(क) नेपालः केषां तपोभूमिरासीत् ?

(ख) कदा पर्वतशृङ्खलानामुत्पत्तिरभवत् ?

(ग) मल्लकाले कानि स्थानानि नेपालनाम्ना सम्बोधितानि ?

(घ) नेवारजातीया मल्लकालं केन नाम्ना सम्बोधयन्ति ?

(ङ) नेपालोपत्यकायामागतः प्रथमो महात्मा क आसीत् ?

## २. सङ्क्षिप्तोत्तरं लिखत

(क) नेपालः कीदृशोऽस्ति ?

(ख) संस्कृतज्ञा नेपालनाम कथं जातमिति वदन्ति ?

(ग) नागसरोवरः नेपालेन सह कथं सम्बद्धः अस्ति ?

(घ) माघमासस्य प्रथमे दिवसे किमर्थं मेलकस्य आयोजनं भवति ?

(ङ) विश्वभूबुद्धविषये का कथा विद्यते ?

## ३. अधो लिखितं पाठांशं पठित्वा तालिकां पूरयत

बहुविधेषु धार्मिकेषु ग्रन्थेषु, पुराणेषु च नेपालस्य चर्चा विहिता दृश्यते । नेपालः प्राचीनभूमिरस्ति । त्रयोदशकोटिभ्यो वर्षेभ्यः पूर्वमेव पर्वतशृङ्खलानामुत्पत्तिरभवदिति वैज्ञानिकाः कथयन्ति । तेषामध्ययनेन पश्चिमनेपालस्य बुटवलक्षेत्रे रामापिथेकस इति आदिकालिकस्य मानवस्य अवशेषस्य प्राप्त्या एककोटिभ्यो वर्षेभ्यः प्रागेव अत्र मानवा वसन्ति स्म इति प्रमाणितं वर्तते ।

नेपाल इति नाम्नः प्रथममुल्लेखस्तु अथर्वपरिशिष्टे प्राप्यते । तस्य रचनाकालस्तथा निश्चितो नास्ति परन्तु खीष्टपूर्वं पञ्चमषष्ठशताब्द्योरन्तराले तस्य रचना अभूदिति मन्यन्ते विद्वांसः। तस्मिन् ग्रन्थे अवन्ती-कामरु-विदेह-केकयोदुम्बरदेशानां क्रमे एव नेपालस्य चर्चास्ति । विनयसङ्ग्रहनामके बौद्धग्रन्थे बुद्धस्य समये तस्य शिष्याः वणिग्भिः सह नेपाले प्रविष्टा इति सन्दर्भः प्राप्यते । महाभारतस्य वनपर्वणि नेपालविषयस्य चर्चा वर्तते, एतेन नेपालं मण्डलरूपेण तदा व्यवह्रियते स्म इति ज्ञातुं शक्यते ।

खीष्टपूर्वं चतुर्थशताब्द्याः आवश्यकसूत्रनामके जैनग्रन्थे तथा कौटिल्यस्य अर्थशास्त्रे च नेपालस्य प्रसङ्गो दृश्यते । स्कन्दपुराणे तु नेपालस्य विषये नेपालमाहात्म्यमिति प्राप्यते । भारतीयभूपतिना समुद्रगुप्तेन इलाहावादाभिलेखे प्रतिवेशिराज्यरूपेण नेपालस्य नाम गृहीतो वर्तते । ततः पश्चाद् येऽभिलेखा अस्मिन् विषये प्राप्यन्ते तेषु स्वतन्त्रराज्यरूपेण नेपालस्य उल्लेखो विलोक्यते । नेपाले प्राप्तेषु शिलालेखेषु ५६९ तमे वैक्रमाब्दे लिखितस्य टिस्टुङस्थानस्य अभिलेखे प्रथमवारं नेपाल इनि नाम उट्टङ्कितं वर्तते । ततः पश्चाद् विविधेषु अभिलेखेषु नेपाल इति नाम्नो बहुधा प्रयोगो दृश्यते ।

**नेपाल इति नाम्नः प्रयोगस्य समयतालिका**

| क्र.स. | ग्रन्थनाम | कालः |
|---|---|---|
| १. | | |

## ४. बोधपाठं पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत

सङ्खुवासभामण्डलं नेपालस्य पूर्वभागे स्थितं मनोरमं मण्डलमस्ति । तस्य मण्डलस्य नाम सभानद्याः सङ्खुवानद्याश्च मिश्रणेन सङ्खुवासभा इति जातं मन्यते । सिद्धकाली-शिवधारा-गुहापुष्करिण्यादिभिर्धार्मिकमहत्त्वयुतैः, प्राकृतिकसौन्दर्ययुतैः स्थलैः सुसज्जितस्य सङ्खुवासभामण्डलस्य अतीव प्रसिद्धा पुष्करिणी वर्तते - सभापुष्करिणी । सङ्खुवासभामण्डलस्य खाँदबारीस्थानात् चत्वारि दिनानि यावत् पदयात्रां विधाय सभापुष्करिणी प्राप्यते । तस्या एव पुष्करिण्या नाम्ना तत्क्षेत्रस्य ग्रामपालिकाया नामकरणं कृतं वर्तते । तेह्रथुममण्डलात् च पदयात्रया तत्स्थानं प्राप्तुं शक्यते । इयं पुष्करिणी समुद्रतलाद् ४१०० मिटरपरिमाणात्मके उच्चस्थाने विराजिता वर्तते इति अनुमीयते ।

सभापुष्करिण्याः कारणेन एव एकस्या नद्या नाम सभा जाता इति स्थानीयाः कथयन्ति । अनुपमसौन्दर्ययुक्ता सभापुष्करिणी न केवलं प्राकृतिकदृष्ट्या अपि तु धार्मिकदृष्ट्या च महत्त्वपूर्णा विद्यते । सभापुष्करिण्या विषये विभिन्ना उक्तयः प्रचलिताः सन्ति । सङ्खुवासभामण्डले गुहापुष्करिणी (गुहापोखरी) अपि अस्ति । गुहापुष्करिण्यां देवगणा निवसन्ति स्म, ते च सभापुष्करिण्यां सभां सञ्चालयन्ति स्म इति एका लौकिकोक्तिः प्रचलिता वर्तते । महर्षिर्वेदव्यासः महाभारतं रचयितुं

सभापुष्करिण्यां वेदीं निर्माय स्थितः, अनन्तरं गौरीपुत्रस्य गणेशस्य सहयोगश्च गृहीत इति अपरा जनश्रुतिरस्ति ।

तथैव पूर्वकाले असुराणां प्रहाराद् भूमिं संरक्षितुं देवता अत्रागत्य सभामकुर्वन्, अतोऽस्याः पुष्करिण्या नाम सभापुष्करिणी अभवदिति च जनश्रुतिर्विद्यते । केचन स्थानीया महर्षिवेदव्यासः समस्तान् ऋषिगणान् आहूय तत्र सभां समचालयत्, पुराणानि अश्रावयदिति कथयन्ति । सभापुष्करिण्या मध्यभागे वेदीसमाना लघुभूमिरस्ति । सा एव व्यासासनमिति कथयन्ति ते । सभानन्तरं शिवस्वरूपपर्वताद् जलं निष्क्रम्य व्यासासनं संरक्षितं, तेन तत्र पुष्करिणी जातेति जनविश्वासो वर्तते ।



**प्रश्नाः**

(क) किं स्थानमतीव सुन्दरमस्ति ?

(ख) सङ्खुवासभामण्डले कानि प्रसिद्धानि स्थानानि सन्ति ?

(ग) खाँदबारीस्थानात् कतिदिनानां पदयात्रया सभापुष्करिणी प्राप्यते ?

(घ) सङ्खुवासभामण्डलस्य नाम कथं जातमिति मन्यते ?

(ङ) गुहापुष्करिणी किमर्थं प्रसिद्धा अस्ति ?

(च) सभापुष्करिण्या विषये प्रचलितां जनश्रुतिं क्रमानुसारेण लिखत

प्रथमा जनश्रुतिः -

द्वितीया जनश्रुतिः -

तृतीया जनश्रुतिः -

चतुर्थी जनश्रुतिः -

**५. भाषाजातीनामाधारेण नेपाल इति नाम कथं सञ्जातमिति विवेचयत ।**

**६. विपश्वीबुद्ध-शिखीबुद्ध-विश्वभूबुद्ध-मञ्जुश्रीबोधिसत्व-क्रकुच्छन्दबुद्धाः काष्ठमण्डपोपत्यकया सह कथं सम्बद्धाः सन्ति ?**

**७. अधस्तनं संवादं पठित्वा शिक्षकस्य सहयोगेन सपादचतुर्वादने मिलितानां तेषां संवादः कथं भवेदिति विचार्यैकं संवादं लिखत**

(महेशः, राहुलश्च विद्यालयगमनार्थं मार्गे चलन्तौ आस्ताम् । तदा एको वयोवृद्धः समीरस्तयोः समीपमागच्छत् ।)

समीरः - भो किशोरौ, अहं काष्ठमण्डपे नवीनोऽस्मि । युवां तु नगरवासिनौ स्त इति मन्ये । अतः काष्ठमण्डपे भ्रमणीयानां स्थलानां विषये युवाभ्यां किञ्चिदधिगन्तुमिच्छामि ।

महेशः - आवां नगरवासिनौ एव स्वः । केषाञ्चन भ्रमणीयानां स्थलानां नामानि जानीवः । प्रथमं तु, भवता पाशुपतक्षेत्रं गमनीयम् ।

समीरः - तत्राहं काष्ठमण्डपे अवतरणपश्चादेव अगच्छम् । भवगतः पशुपतेः स्तुतिं विधाय प्रसादञ्च अगृह्णाम् । गुह्येश्वरीशक्तिपीठं च प्राप्य पूजां च अकुर्वि ।



राहुलः - तत्तु समीचीनं विहितं भवता । तदनन्तरं काष्ठमण्डपम् आगत्य वसन्तपुरप्रासादक्षेत्रस्य, ललितपुरप्रासादक्षेत्रस्य, भक्तपुरप्रासादक्षेत्रस्य च भ्रमणं भवता कार्यम् ।

समीरः वसन्तपुरललितपुरक्षेत्रयोः भ्रमणार्थमहं ह्यस्तनदिवसेऽगच्छम् । भक्तपुर-क्षेत्रावलोकनार्थमद्य गच्छामि । एतद् विहाय मम मनस्येका जिज्ञासा वर्तते । तत्समाधानं युवाभ्यां कर्तव्यमिति ममानुरोधोऽस्ति ।

महेशः - अवश्यमेव । का जिज्ञासा वर्तते ? वदतु भवान् ।

समीरः - अस्माकं देशस्य नामकरणं कथं जातमिति मम जिज्ञासा ।

राहुलः - एतस्मिन् विषये तु मया पूर्वं कदापि न चिन्तितम् । महेश, त्वं जानासि किल ?

महेशः - अहमपि त्वत्सदृश एवास्मि ।

राहुलः - भो ज्येष्ठ, आवामद्य विद्यालये गुरुणा सह अस्मिन् विषये पृच्छावः । यदि समयो मिलति चेद् भवान् सपादचतुर्वादने अत्रैव आगच्छतु । तदा नेपालनामकरणविषये चर्चां कुर्वः ।

समीरः - भवतु तर्हि । अहम् आगच्छामि । पुनर्मिलामः ।

(महेशराहुलौ विद्यालयं प्रति प्रस्थितवन्तौ । समीरश्च भ्रमणार्थम् अगच्छत् ।)

# पशुपतिः

पशूनां पतिरेव पशुपतिरस्ति। व्यावहारिकदृष्ट्या वयं गोमहिषादीन् पशुरूपेण जानीमः परन्तु तन्त्रशास्त्रे पशुशब्देन मनुष्यादयो जीवा बोध्यन्ते–

**ब्रह्माद्याः स्थावरान्ताश्च पशुपक्षिमृगादयः।**

**पशवः परिकीर्त्यन्ते देवः पशुपतिः स्मृतः॥**

शिवस्य करुणया मनुष्याः शिवत्वं प्राप्नुवन्ति अर्थात् तस्य प्रसादेन पशवः पशुभावं त्यजन्ति। एतेनैव कारणेन भगवान् शिवः पशुपतिरिति कथ्यते। तान्त्रिकदृष्ट्या पशुपतेर्महन्महत्त्वं वरीवर्ति। उपासकाः शिवसायुज्यप्राप्तये पशुपतेराराधनं कुर्वन्ति। एतादृशो भगवान् पशुपतिर्नेपालस्य वाग्वतीप्रदेशस्य काष्ठमण्डपमण्डले ज्योतिर्लिङ्गरूपेण चिरकालाद् विराजितो वर्तते।

काष्ठमण्डपस्य पूर्वोत्तरभागे विराजितो भगवान् पशुपतिः प्राक्तनकालात् समग्रदेशस्य कल्याणं विदधानो राष्ट्रदेव इत्युच्यते। पशुपतेर्ज्योतिर्लिङ्गस्य उत्पत्तिः कदाऽभवदिति निश्चित्य वक्तुं न शक्यते परन्तु तस्य पशुपतेश्चर्चा न केवलं वंशावलीषु अपि तु वेदपुराणेषु च प्राप्यते। शुक्लयजुर्वेदे '**पशुपतये च नमः**' इत्येवंरीत्या पशुपतेरुल्लेखो वर्तते चेदथर्ववेदेऽपि '**पशूनामधिपः**' इति पशुपतेः सङ्केतो विहितो दृश्यते। अनेन ज्ञायते यद्, वैदिककालादेव पशुपतेरर्चनायाः परम्परा आसीत्। अत्र वाग्वत्यास्तटे पशुपतिनाथस्य सुमनोहरं मन्दिरमस्ति। अत एवात्र दर्शनार्थं नेपालस्य विविधस्थानेभ्यो मनुष्या आगच्छन्ति। भारतादिदेशेभ्यश्च लक्षशो जनाः प्रतिवर्षं पशुपतेर्दर्शनार्थमेव नेपालस्य भ्रमणं कुर्वन्ति।



पशुपतेर्ज्योतिर्लिङ्गस्य विषये अनेके प्रसङ्गाः प्राप्यन्ते। प्रथमं तत्र महज्ज्योतिर्लिङ्गमासीत्। साधारणो जनस्तज्ज्योतिर्लिङ्गस्य दर्शनाय समर्थो न भवेदिति विचार्य ब्रह्मा तत्

सङ्केतयितुं तत्र शिलां समस्थापयत्। तत्र च विष्णुः पञ्चमुखात्मकं शिवलिङ्गं निरमात्। तेन कारणेन तल्लिङ्गं ब्रह्मविष्णुशिवात्मकं कथ्यते। नेपालमाहात्म्ये पशुपतेर्ज्योतिर्लिङ्गस्य विषयेऽपरः प्रसङ्गोऽपि प्राप्यते। श्लेष्मान्तकः सहस्राधिकवर्षपर्यन्तं पाशुपतक्षेत्रे स्थित्वा तपश्चकार। तस्य तपसा प्रसन्नः शङ्करस्तस्मै श्लेष्मान्तकनाम्ना तद्वनस्य प्रसिद्धिर्भविष्यतीति वरं ददौ। अद्यापि वयं तद् वनं श्लेष्मान्तकनाम्ना एव व्यवहरामः।

नेपालस्याधिकेषु स्थानेषु माघमासे स्वस्थानीदेव्या माहात्म्यं पठ्यते श्राव्यते। तत्र च भगवतः शिवस्यानेके प्रसङ्गा वर्णिताः सन्ति। शिवः पाशुपतक्षेत्रे मृगस्य रूपं धृत्वा क्रीडारत आसीत्। महादेवस्याभावे कैलासः शून्यो जातः। देवादयो महादेवमन्वेष्टुं प्रारभन्त। पार्वत्यपि महादेवेन सह पाशुपतक्षेत्रे एवासीत्। ब्रह्मा, विष्णुः, इन्द्रश्च महादेवस्य दर्शनार्थं पाशुपतक्षेत्रे आगच्छन्। तत्र पार्वती कन्यारूपेण स्थिता आसीत्। सा एव भगवती पार्वती अस्तीति विज्ञाय ते तां महादेवस्य विषयेऽपृच्छन्। सा मृगरूपं महादेवमदर्शयत्। ब्रह्मा, विष्णुः, इन्द्रश्च मृगस्थलीं प्राप्य महादेवस्य स्तुतिम् अकुर्वन् परन्तु महादेवो मृगशरीरं नात्यजत्। ततस्ते मृगस्य शृङ्गं ग्रहीतुं यतमाना अभवन्। तेन मृगशरीरात् शृङ्गमुच्छिन्नम्। तच्च शृङ्गं त्रिधा विभक्तम्। इन्द्रस्य हस्ते शृङ्गस्य अग्रभागः, ब्रह्मणो हस्ते मध्यभागः, विष्णोर्हस्ते च मूलभाग आसीत्। भीतास्ते महादेवस्य प्रार्थनां चक्रुः। प्रसन्नो महादेवो ब्रह्माणं वाग्वत्यास्तटे शृङ्गखण्डं संस्थापयितुमादिशत्। एतेनैव प्रकारेण स विष्णुं रसातले, इन्द्रं च स्वर्गे शृङ्गखण्डं संस्थापयितुमादिशत्। अयं प्रसङ्गः पाशुपतक्षेत्रं पशुपतेः क्रीडास्थलमस्तीति प्रमाणयति। अधस्तनं हिमवत्खण्डान्तर्गतं श्लोकं ज्योतिर्लिङ्गस्य अनादित्वं प्रकाशयति-

**कामधेनुः समागत्य दुग्धं स्रवति नित्यशः।**
**संस्नाप्य पशुपं देवमाप्लाव्य वाग्वतीजले॥**



एकदा गोपाल एकां गां तत्र दुग्धं समर्पयन्तीमपश्यत्। तत औत्सुक्येन तस्य स्थलस्योत्खननाय स प्रयत्नरतोऽभवत्। ततः स लिङ्गस्य तेजसा तत्रैव भस्मीभूतोऽभवदिति च चर्चा श्रूयते। 'महाभारतस्य युद्धेऽस्माभिः स्वसम्बन्धिनो हताः। अतः पापमोचनं कर्तव्यम्' इति मत्वा पाण्डवा महादेवस्य दर्शनार्थं हिमालयं प्रति प्रस्थितवन्तः। पाण्डवान् दृष्ट्वा भगवान् महिषरूपमधरत्। तं महिषं शिवं ज्ञात्वा पाण्डवाः समीपं गताः परन्तु महिषरूपः शिवो भूमौ एव विलीनोऽभवत्। तदा ते तस्य पुच्छमस्पृशन्। तदा भगवान् केदारनाथनाम्ना पुच्छस्थाने प्रकटितोऽभवत्, शिरःस्थाने तु पशुपतिनाथनाम्ना नेपाले प्रकटितोऽभवदिति च जनश्रुतिः प्रसिद्धाऽस्ति।

ज्योतिर्लिङ्गस्योत्पत्तिविषये कालनिश्चयो न सम्भवति। वैदिककालादेव तल्लिङ्गमासीदिति कथयितुं शक्यते। तथैव पशुपतेर्ज्योतिर्लिङ्गस्य पूजनस्य परम्परा प्राचीनास्तीति निश्चित्य वक्तुं शक्यते। मन्दिरस्य स्थापनाविषयेऽपि प्रामाणिक उल्लेखो नास्ति। गोपालराजवंशावल्यनुसारेण सुपुष्पदेवो मन्दिरस्य निर्माणमकरोत्। वंशावल्यनुसारेण सुपुष्पदेवो लिच्छविकालस्य चतुर्थो राजा आसीत्। पशुपतिनाथमन्दिरस्य स्थापनायाः प्रामाणिकः कालः अयमस्तीति निश्चित्य कथयितुं न शक्यते। सुपुष्पदेवस्य शासनसमयोऽपि इतिहासे स्पष्टतया उल्लिखितो न वर्तते। इतिहासशिरोमणिर्बाबुरामाचार्योऽस्य मन्दिरस्य निर्माणम् एकोनत्रिंशदुत्तरषट् शततमे वैक्रमाब्दे अभवदिति निश्चयं करोति परन्तु अस्मिन् बहुश इतिहासविदाम् असहमतिर्दृश्यते। केचिदस्य मन्दिरस्य निर्माणं ख्रीष्टसंवत्सरस्य नवत्युत्तरचतुःशतवर्षेभ्यः पूर्वमभवदिति निगदन्ति। केचित् सोमदेवराजवंशस्य पशुप्रेक्षः ख्रीष्टसंवत्सरस्य त्रिशतवर्षेभ्यः पूर्वं मन्दिरस्य निर्माणमकरोदिति कथयन्ति। एवं समीक्ष्य सुपुष्पदेव एवास्य प्रथमो निर्माता इति अनुमातुं शक्यते।

सुपुष्पदेवस्य पुत्रो भास्करवर्मा नेपालस्य दक्षिणराज्यानि विजित्य सुवर्णादीनि आनयत्, मन्दिरक्षेत्रे सुवर्णाहुतिञ्चाकरोदिति वंशावल्यां प्राप्यते। ततः पश्चात् पञ्चाशदधिकसप्तशततमे वैक्रमाब्दे राजा शिवदेवो द्वितीयो मन्दिरस्य पुनर्निर्माणमकरोत्। तदा ताम्रच्छदिमकारयदिति केषाञ्चन इतिहासविदां मतमस्ति। तदनन्तरमेकपञ्चाशदुत्तरत्रयोदशशततमे वैक्रमाब्दे अनन्तमल्लः सुवर्णच्छदिमकारयदिति इतिहासविदो वदन्ति। विक्रमस्य षडुत्तरचतुर्दशशततमे वर्षे बङ्गालस्य राजा समसुद्दिनः काष्ठमण्डपे आक्रमणमकरोत्। तस्य सैनिकाः सप्ताहं यावत् स्थित्वा पशुपतिनाथमन्दिरस्य ध्वंसमकुर्वन्।

पश्चात् सप्तदशोत्तरचतुर्दशशततमे वैक्रमवर्षे तात्कालिको महामन्त्री जयसिंहरामवर्धनः पुनर्निर्माणमकरोत्। त्रिसप्तत्युत्तरचतुर्दशशततमे वैक्रमाब्दे राजा ज्योतिर्मल्लो मन्दिरस्य जीर्णोद्धारमकरोत्। सप्तत्युत्तरषोडशशततमे वैक्रमाब्दे कान्तिपुरस्य राजा शिवसिंहमल्लो मन्दिरस्य पुनर्जीर्णोद्धारमकरोत्। तस्य राज्ञी त्रिखण्डयुतां छदिं भग्नमानां दृष्ट्वा द्विखण्डयुतां छदिमकारयत्, मन्दिरशिखरञ्च स्वर्णमयमकारयत्। तदनन्तरं चतुस्त्रिंशदुत्तरसप्तदशशततमे वैक्रमाब्दे नृपेन्द्रमल्लः पुनर्मन्दिरस्य जीर्णोद्धारमकरोत्। मन्दिरस्य दुरवस्थां विलोक्य त्रिपञ्चाशदुत्तरसप्तदशशततमे वैक्रमवर्षे राजा भूपालेन्द्रमल्लस्य अनुमत्या तन्माता ऋद्धिलक्ष्मी मन्दिरस्य पुनर्निर्माणस्य आरम्भमकरोत्। चतुःपञ्चाशदुत्तरसप्तदशशततमे वैक्रमाब्दे निर्माणस्य कार्यं सम्पन्नमभवत्। पशुपतिनाथमन्दिरस्य वर्तमानस्वरूपं भूपालेन्द्रनिर्मितमस्तीति इतिहासज्ञाः कथयन्ति।

ज्योतिर्लिङ्गस्योत्पत्तिः कदाऽभवदिति न कश्चन निश्चित्य कथयितुं शक्नोति । वैदिककालादेव पशुपतेश्चर्चा विहिता दृश्यते। मन्दिरस्य निर्माणविषये विदुषां मतवैविध्यं दृश्यते परन्तु सुपुष्पदेवो मन्दिरस्य निर्माणमकरोदिति बहुशो विद्वांसो मानयन्ति । प्राक्तनकालाद् भगवान् शिवः पशुपतिरूपेण अत्र विराजितः सन् अस्माकं कल्याणं कुर्वन्नस्ति । अतो वयं सदा प्रार्थयामहे- **शं करोतु शङ्करः** इति ।

## अभ्यासः

### १. अतिसङ्क्षेपेण उत्तरयत

(क) कः पशुपतिः कथ्यते ?

(ख) पशुपतिः कुत्र विराजितो वर्तते ?

(ग) कः पाशुपतक्षेत्रे स्थित्वा तपश्चकार ?

(घ) बाबुरामाचार्यो मन्दिरनिर्माणविषये किं वदति ?

(ङ) पशुपतिनाथमन्दिरस्य वर्तमानस्वरूपं केन निर्मितमिति इतिहासज्ञाः कथयन्ति ?

### २. सङ्क्षिप्तोत्तरं लिखत

(क) केन कारणेन भगवान् शिवः पशुपतिरिति कथ्यते ?

(ख) पशुपतेर्लिङ्गं किमर्थं ब्रह्मविष्णुशिवात्मकं कथ्यते ?

(ग) कः प्रसङ्गः पाशुपतक्षेत्रं पशुपतेः क्रीडास्थलमस्तीति प्रमाणयति ?

(घ) पशुपतिकेदारनाथयोः कः सम्बन्धः ?

(ङ) पशुपतिनाथमन्दिरस्य स्थापनायाः प्रामाणिककालविषये कानि मतानि सन्ति ?

### ३. अधो लिखितं पाठांशं पठित्वा तालिकां पूरयत

सुपुष्पदेवस्य पुत्रो भास्करवर्मा नेपालस्य दक्षिणराज्यानि विजित्य सुवर्णादीनि आनयत्, मन्दिरक्षेत्रे सुवर्णाहुतिञ्चाकरोदिति वंशावल्यां प्राप्यते । ततः पश्चात् पञ्चाशदधिकसप्तशततमे वैक्रमाब्दे राजा शिवदेवो द्वितीयो मन्दिरस्य पुनर्निर्माणमकरोत् । तदा ताम्रच्छदिमकारयदिति केषाञ्चन इतिहासविदां मतमस्ति । तदनन्तरमेकपञ्चाशदुत्तरत्रयोदशशततमे वैक्रमाब्दे अनन्तमल्लः सुवर्णच्छदिमकारयदिति इतिहासविदो वदन्ति । विक्रमस्य षडुत्तरचतुर्दशशततमे वर्षे बङ्गालस्य राजा समसुद्दिनः काष्ठमण्डपे आक्रमणमकरोत् । तस्य सैनिकाः सप्ताहं यावत् स्थित्वा पशुपतिनाथमन्दिरस्य ध्वंसमकुर्वन् ।

पश्चात् सप्तदशोत्तरचतुर्दशशततमे वैक्रमवर्षे तात्कालिको महामन्त्री जयसिंहरामवर्धनः पुनर्निर्माणमकरोत् । त्रिसप्तत्युत्तरचतुर्दशशततमे वैक्रमाब्दे राजा ज्योतिर्मल्लो मन्दिरस्य जीर्णोद्धारमकरोत् । सप्तत्युत्तरषोडशशततमे वैक्रमाब्दे कान्तिपुरस्य राजा शिवसिंहमल्लो मन्दिरस्य पुनर्जीर्णोद्धारमकरोत् । तस्य राज्ञी त्रिखण्डयुतां छदिं भग्नमानां दृष्ट्वा द्विखण्डयुतां छदिमकारयत्, मन्दिरशिखरञ्च स्वर्णमयमकारयत् । तदनन्तरं चतुस्त्रिंशदुत्तरसप्तदशशततमे वैक्रमाब्दे नृपेन्द्रमल्लः पुनर्मन्दिरस्य जीर्णोद्धारमकरोत् । मन्दिरस्य दुरवस्थां विलोक्य त्रिपञ्चाशदुत्तरसप्तदशशततमे वैक्रमवर्षे राजा भूपालेन्द्रमल्लस्य अनुमत्या तन्माता ऋद्धिलक्ष्मी मन्दिरस्य पुनर्निर्माणस्य आरम्भमकरोत् । चतुःपञ्चाशदुत्तरसप्तदशशततमे वैक्रमाब्दे निर्माणस्य कार्यं सम्पन्नमभवत् । पशुपतिनाथमन्दिरस्य वर्तमानस्वरूपं भूपालेन्द्रनिर्मितमस्तीति इतिहासज्ञाः कथयन्ति ।

**पशुपतिनाथमन्दिरस्य निर्माणक्रमः**

| क्र.स. | व्यक्तिनाम | समयः | कार्यम् |
|---|---|---|---|
| १. | | | |
| २. | | | |

## ४. अनुच्छेदं पठित्वा निर्दिष्टकार्याणि कुरुत

पिण्डेश्वरधाम बाबाधाम इति नाम्ना नेपालिनां हृदयेषु प्राचीनकालादेव विराजमानमस्ति । नेपालस्य धार्मिकस्थलानां विषये स्कन्दपुराणे बहुधा चर्चा प्राप्यते । तत्र च रुद्राक्षारण्यमाहात्म्यरूपेण पिण्डेश्वरस्य विषये उल्लेखः प्राप्यते । विजयपुरस्थानस्य वनमेव रुद्राक्षारण्यमस्ति, यतो रुद्राक्षाणामरण्यम् अर्थात् वनं रुद्राक्षारण्यं भवति, तच्च वनं विजयपुरवनं सङ्केतयतीति विदुषामभिमतमस्ति । पिण्डेश्वरस्य विषये इत्थं चर्चा विहिता दृश्यते -

**तदा तदमृतं देवः कृत्वा वस्त्रेण गालितम् ।**
**पिष्टिं निष्कास्य निक्षिप्य पाययामास तान् सुरान् ॥**
**ततस्तु तां सुधापिष्टिं गृहीत्वा त्रिदशास्तथा ।**
**पिण्डीकृत्य प्रहृष्टास्ते लिङ्गं चक्रुरनुत्तमम् ॥**
**तल्लिङ्गं स्थापयामासुस्तस्मिन् रुद्राक्षकानने ।**

**स्थापयित्वा ततो लिङ्गं पूजयामासुरादरात् ॥**

**नाम चक्रे ततस्तस्य पिण्डेश्वर इति प्रभो ।**

**सुधापिण्डीकृतो यस्मात् पिण्डेश्वर इति स्मृतः ॥**

पिण्डेश्वरस्योत्पत्तिर्देवदानवानां समुद्रमन्थनेन तथा अमृताविर्भावेन च सह सम्बद्धा अस्ति । तदा देवदानवानां युद्धः प्रमुखः समस्याविषयोऽभवत् । तद्विषयं समाधातुं, तात्कालिकीं परिस्थितिं शमयितुं वा देवा दानवाश्च मिलित्वा समुद्रमन्थनस्य आयोजनमकुर्वन् । स्कन्दपुराणानुसारेण समुद्रमन्थनेन प्राप्तया सुधापिष्ट्या रुद्राक्षकानने लिङ्गं संस्थाप्य देवा अपूजयन् । तेन कारणेनैव पिण्डेश्वरनाम जातमिति वदन्ति विद्वांसः ।




**(क) निम्नलिखितान् प्रश्नानुत्तरयत**

(अ) पिण्डेश्वरधाम्नोऽपरं नाम किमस्ति ?

(आ) स्कन्दपुराणे केषां चर्चा अस्ति ?

(इ) रुद्राक्षारण्यं नेपालस्य किं वनं सङ्केतयति ?

(ई) पिण्डेश्वरस्योत्पत्तिः केन सह सम्बद्धाऽस्ति ?

(उ) के मिलित्वा समुद्रमन्थनस्य आयोजनमकुर्वन् ?

(ऊ) पिण्डेश्वरनामकरणस्याधारः कः ?

(ख) **अधोलिखितयोः श्लोकयोरन्वयं कुरुत**

(अ) ततस्तु तां सुधापिष्टिं गृहीत्वा त्रिदशास्तथा ।
पिण्डीकृत्य प्रहृष्टास्ते लिङ्गं चक्रुरनुत्तमम् ॥

(आ) तल्लिङ्गं स्थापयामासुस्तस्मिन् रुद्राक्षकानने ।
स्थापयित्वा ततो लिङ्गं पूजयामासुरादरात् ॥

५. **ज्योतिर्लिङ्गस्य विषये के प्रसङ्गाः प्राप्यन्ते, सविस्तरं वर्णयत ।**

६. **पशुपतिनाथमन्दिरस्य परिसरं वर्णयित्वा एकमनुच्छेदं लिखत ।**

७. **अधस्तनं सन्दर्भं पठित्वा शिक्षकस्य सहयोगेन पशुपतेरेकां स्तुतिमन्विष्य लिखत**

भवानीसहितशिवपूजनस्य अस्माकं परम्परा वर्तते । संस्कृतसाहित्यस्य महाकविः कालिदासः स्वग्रन्थे रघुवंशमहाकाव्ये प्रथमं भवानीशङ्करयोर्वन्दनां करोति -

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥**

सामान्यतया नैपालकाः शिवमन्दिरेषु गत्वा अधोलिखितश्लोकमाध्यमेन शिवपार्वत्योः स्तुतिं कुर्वन्ति-

**कर्पूरगौरं करुणावतारं**
**संसारसारं भुजगेन्द्रहारम् ।**
**सदा वसन्तं हृदयारविन्दे**
**भवं भवानीसहितं नमामि ॥**

स एव भगवान् शिवः पशुपतिनाम्ना सम्बोध्यते । पशुपतेर्वन्दनायां पशुपत्यष्टकस्य वाचनं क्रियते । तस्य प्रथमः श्लोकः अधः प्रस्तूयते -

**पशुपतिं द्युपतिं धरणीपतिं**
**भुजगलोकपतिं च सतीपतिम् ।**
**प्रणतभक्तजनार्तिहरं परं**
**भजत रे मनुजागिरिजापतिम् ॥**

भगवतः पशुपतिनाथस्य मन्दिरं नेपालदेशस्य काष्ठमण्डपमण्डले वर्तते। बहुशः पर्यटकाः पशुपतिनाथमन्दिरस्य दर्शनार्थं विभिन्नेभ्यो देशेभ्य आगच्छन्ति । पशुपतिर्नेपालस्याराध्यदेवो मन्यते ।

## ८. अधस्तनमनुच्छेदं पठित्वा निर्दिष्टकार्याणि कुरुत

नेपालदेशस्य पश्चिमक्षेत्रं शक्तिपीठैरतीव समृद्धं वर्तते। तेषु शक्तिपीठेषु त्रिपुरासुन्दर्याश्चर्चा विशेषतया विधीयते । त्रिपुरासुन्दरी डोल्पामण्डलस्य त्रिपुराकोटस्थाने विराजमानाऽस्ति । मन्दिरस्य स्थापनाविषये स्थानीयानां मध्ये बह्व्यः किंवदन्त्यः प्रचलिता दृश्यन्ते । केचित् स्वस्थानीव्रतकथायाः प्रसङ्गं समुपस्थापयन् इयमेव देवी त्रिपुरासुरस्य हन्त्री वर्तते इति कथयन्ति । तस्मात् कारणादेव अस्या नाम त्रिपुरासुन्दरी जातेति तेषां मतम् । केचित् तु सतीदेव्या देहपीठपतनेन तत्र शक्तिपीठं समुत्पन्नम्, मुकुटेश्वरमहादेवश्च तस्य पीठस्य संरक्षकत्वेन तत्र स्थितोऽस्तीति आमनन्ति ।

अस्मिन् विषये अपरा किंवदन्ती च वर्तते। तत्र पुरा विक्रमशाहीनामाख्यो राजासीत्। तदानीं तत्रैकं शिलाया उलूखलमासीत्। तेन तत्र प्रशासकत्वेन केचन नियुक्ता आसन्। तेषां पत्न्यो धान्यं नीत्वा उलूखलेन तण्डुलान् निर्माय आगच्छन्ति स्म। कदाचित् चतुर्मानकपरिमितानां धान्यानामष्टमानकपरिमितास्तण्डुला भवन्ति स्म परन्तु कदाचिद् अष्टमानकपरिमितानां धान्यानां केवलं चतुर्मानकपरिमितास्तण्डुला भवन्ति स्म । अष्टमानकपरिमितधान्येभ्यः चतुर्मानकपरिमिततण्डुलानां प्राप्तिस्तु स्वाभाविकी भवति। परं चतुर्मानकपरिमितधान्येभ्योऽष्टमानकपरिमितानां तण्डुलानां प्राप्तिस्तु सर्वथाऽसम्भवा भवतीति विचार्य उलूखलस्य अधोभागे किमपि स्यादिति मत्वा स्थानीयैस्तत्र खननं कृतम् । ततस्ते तत्र षट्कोणाष्टदलयुक्ते यन्त्रे विराजिताया देव्याः प्रस्तरमूर्तिं व्यलोकयन्, मूर्तिञ्च ऊर्ध्वभागे आनेतुं प्रयत्नमकुर्वन् । तदा तस्माद् गर्ताद् देवीनां मूर्तयः पुत्तलीरूपेण उड्डीय विविधेषु स्थानेषु गता। मालिका, कनकासुन्दरी, वागीश्वरी, खैराबाङ्भगवती, त्रिपुरेश्वरी, बडीमालिका इति नामभिः प्रसिद्धा देव्यस्तस्मादेव गर्ताद् निष्क्रम्य गताः सन्तीति विश्वस्यते ।

पुत्तलीरूपेण निर्गतासु बाला, त्रिपुरा, सुन्दरी च तत्रैव स्थिता इति स्थानीयानां विश्वासो वर्तते । तत्र डोल्पामण्डलस्य मन्दिरे बाला-त्रिपुरा-सुन्दरी-देवी-महाकालीनां प्रतिमाः सन्ति। अत एव बालात्रिपुरासुन्दरीमन्दिरमिति च तस्य नाम कथयन्ति विद्वांसः। न केवलं देवीनाम् अपि तु विक्रमशाहीनामधेयस्य राज्ञः, तस्य अग्रावतीनाम्नीराज्ञ्याः, तस्य पुत्रस्य च प्रतिमास्तत्र स्थापिताः सन्ति । ख्यातिङ्गतस्य त्रिपुरासुन्दरीमन्दिरस्य दर्शनार्थं बहवस्तन्त्रोपासकाश्च देशस्य बहुक्षेत्रेभ्यस्तत्र गच्छन्ति ।

### (क) एकपदेन उत्तरयत

(अ) त्रिपुरासुन्दरी कस्मिन् मण्डले विराजमाना अस्ति ?

(आ) राज्ञो नाम किमस्ति ?

(इ) किं धान्यैस्तण्डुलान् कारयति ?

(ई) गर्तात् का निर्गताः ?

**(ख) सङ्क्षेपेण उत्तरयत**

(अ) स्थानीयाः किमर्थं देव्या नाम त्रिपुरासुन्दरी अभवदिति कथयन्ति ?

(आ) का सर्वथा असम्भवा ?

(इ) गर्ताद् निर्गत्य गतानां देवीनां नामानि कानि ?

(ई) त्रिपुरासुन्दरीमन्दिरे केषां प्रतिमाः स्थापिताः सन्ति ?

चतुर्दशः पाठः

# आर्याष्टाङ्गमार्गाः



सकलस्य दुःखसमुदायस्य मूलमस्ति तृष्णा । तृष्णायाः कारणेनैव शाश्वतीं शान्तिमपरिगणय्य जना अनित्यान् भोग्यपदार्थान् प्रति सततं समाकृष्टा दृश्यन्ते । जीवने दुःखमस्ति चेद् दुःखहेतुर्दुःखनिरोधोपायाश्च अवश्यं वर्तन्त इति विचारयता परमकारुणिकेन महात्मना बुद्धेन आर्यसत्यचतुष्टयरूपेण एतत्तथ्यमाविष्कृतं वर्तते । तानि च आर्यसत्यानि सन्ति- हेयम् (दुःखमस्ति), हेयहेतुः (दुःखकारणमस्ति), हानम् (दुःखनिरोधः सम्भवोऽस्ति), हानोपायः (दुःखनिरोधस्योपायोऽस्ति) । दुःखनिरोधस्योपायरूपेण भगवता बुद्धेन आर्याष्टाङ्गमार्गा उपदिष्टाः सन्ति । तेषामङ्गानां निर्वाणाय शाश्वतानन्दाय वा विनियोगः । तत्र च प्रज्ञा-शील-समाधिरूपेण तेषां रत्नत्रयात्मकं पुनर्वर्गीकरणमपि वर्तते । ते यथा-

| आर्याष्टाङ्गमार्गाः | | |
|---|---|---|
| **प्रज्ञा** | **शीलम्** | **समाधिः** |
| १. सम्यग् दृष्टिः | ४. सम्यक् कर्मान्तः | ७. सम्यक् स्मृतिः |
| २. सम्यक् सङ्कल्पः | ५. सम्यग् आजीवः | ८. सम्यक् समाधिः |
| ३. सम्यग् वाक् | ६. सम्यग् व्यायामः (प्रयत्नः) | |

'मार्गः' इत्यस्य तात्पर्यमस्ति दुःखनिरोधस्योपायः । दुःखनिरोधाच्च निर्वाणम् । तृष्णायाः प्रहाणेन निर्वाणप्राप्तये भगवता बुद्धेन एते उपायाः समुपदिष्टाः । अतो बौद्धाचारे एतन्नाम 'दुःखनिरोधगामिनी प्रतिपदा' इत्युच्यते । अष्टाङ्गमार्गान् उपदिशन् भगवान् बुद्धो जगाद- **कतमञ्च, भिक्खवे, दुक्खनिरोधगामिनी पटिपदा अरियसच्चं ? अयमेव अरियो अट्ठङ्गिको मग्गो सेय्यथिदं- सम्मादिट्ठि सम्मासङ्कप्पो सम्मावाचा सम्माकम्मन्तो सम्माआजीवो सम्मावायामो सम्मासति सम्मासमाधि ।**

अष्टाङ्गमार्गाणां भाव एवंविधो वर्तते–

- सम्यग् दृष्टिः - चतुर्षु आर्यसत्येषु विश्वासः
- सम्यक् सङ्कल्पः - मानसिकस्य नैतिकस्य च विकासस्य प्रतिज्ञा
- सम्यग् वाक् - हानिकरीं मिथ्या च वाचं त्यक्त्वा उचितभाषणम्
- सम्यक् कर्मान्तः - कुशले कर्मणि प्रवर्तनम्
- सम्यग् आजीवः - स्पष्टतया अस्पष्टतया वा सदैव उचितं जीविकासाधनम्
- सम्यग् व्यायामः - स्वात्मनः शोधनाय स्वयं प्रयासः
- सम्यक् स्मृतिः - स्पष्टज्ञानेन दर्शनशीलताया मानसिक्या योग्यतायाः प्राप्तिप्रयासः
- सम्यक् समाधिः - निर्वाणं प्राप्तुं चेष्टावत्त्वम्, तत्प्राप्तिश्च

एतेषां विषये बौद्धाचारे सविशेषं वर्णनं प्राप्यते । प्रत्येकमपि अङ्गं दुःखनिरोधाय पृथक्-पृथक् पूर्णां भूमिकां निर्वहतीति कस्यचन एकस्यैव अङ्गस्य अनुशीलनेनापि निर्वाणलाभ इति केचन कथयन्ति । बहवस्तु सर्वेषामङ्गानामनुष्ठानेनैव कल्याणं भवतीति निर्वाणाय सर्वेषामङ्गानामाश्रयणमनिवार्यमिति वदन्ति । एतेषामष्टाङ्गसाधनानां विषये विस्तरश एवं वर्णनमवाप्यते ।

१. **सम्यग् दृष्टिः** – दृष्टेः सामान्यार्थो भवति दर्शनं प्रतीतिर्वा । ज्ञानं विचारश्चिन्तनं वा दृष्टेर्व्यापकोऽर्थः । सम्यक्-शब्दः समीचीनार्थकः । सम्यग् दृष्टिर्निर्वाणप्राप्त्यर्थमष्टसु प्रथमं सोपानम् । सम्यग् दृष्टिः सर्वेषु प्राणिषु दुर्भावं निराकृत्य सद्भावं विकासयति । सर्वत्र यथास्थितदृष्टिमातनोति । अविद्ययाऽस्माकं दृष्टिर्विकृता, भ्रमयुक्ता च भवति । जनानां भ्रमस्थितेरुद्धारायैव भगवता बुद्धेन सम्यग् दृष्टिरुपदिष्टा । कुशलाकुशलकर्मणां रहस्यं ज्ञात्वा सम्यग् दृष्टिः प्रवर्धनीया । लोभः, पारस्परिको द्वेषभावः, आसक्तिश्च अकुशलकर्मणि प्रवर्तनस्य कारणम् । सत्कर्मणां कारणञ्च तादृशानामवगुणानामभावः । एतस्मिन् विषये स्पष्टतया बोध एव सम्यग् दृष्टिरस्ति ।

    अविद्यायाः कारणेनैव वयमनित्यं वस्तु नित्यम्, अपवित्रं वस्तु पवित्रम्, अनात्मवस्तु आत्मवस्तु च मन्यामहे । एतेन सदा दुःखमनुभूयते । सम्यग् दृष्ट्या एतत् सर्वमपि भ्रमजातं निवार्यते । तदनु आर्यसत्यानां सम्यग् ज्ञानं प्राप्यते । तदेव ज्ञानं सम्यग् दृष्टिः ।

    लौकिकी लोकोत्तरा चेति सम्यग् दृष्टिश्च द्विधा विभज्य व्याख्यातुं शक्यते । कुशलेन सुकर्मणा परेभ्यः सुखप्रदानविचारो लौकिकी सम्यग् दृष्टिः । लोकोत्तरा च यथास्थितार्थदर्शनम् ।

२. **सम्यक् सङ्कल्पः** – यदा दृष्टिः स्पष्टा भवति, तदा निश्चयोऽपि स्पष्टो भवति । अतोऽष्टाङ्गिकमार्गाणां द्वितीयं सोपानमस्ति सम्यक् सङ्कल्पः । इन्द्रियाणां माध्यमेन असीमितरूपेण विषयसेवनं मास्त्विति

दृढसङ्कल्पः सम्यक् सङ्कल्पो भवति। सर्वैः सह अक्रोधनेन, अहिंसाभावेन च सद्भावपूर्वकं व्यवहाराय निश्चयनमपि सम्यक् सङ्कल्प एव । अतः शोभनव्यवहाराय प्रबला इच्छाशक्तिरपेक्ष्यते । तदर्थं सम्यक् चरित्रमावश्यकं भवति । चरित्रनिर्माणेन सहैव स्वस्य स्वभावशोधनाय निश्चयः सम्यक् सङ्कल्पो भवति । यस्य कस्यापि असीमा कामना दुःखकारणम् । अतः सर्वकामनानाशाय विचारे दृढताऽऽनयनं सम्यक् सङ्कल्प इत्युच्यते । सत्कार्यं कर्तुं दुष्कृतं त्यक्तुं च सम्यक् सङ्कल्पः सहायो भवति ।

बौद्धाचारे सम्यक् सङ्कल्पः चतुर्धा उपदिष्टो वर्तते-

(क) नैष्कर्म्यसङ्कल्पः

(ख) अव्यापादसङ्कल्पः

(ग) अविहिंसासङ्कल्पः

(घ) बोधिसत्त्वसङ्कल्पश्चेति

जगति जायमानां मनश्चञ्चलतां निरुत्साहिताञ्च त्यक्त्वा शान्तेराश्रयणं नैष्कर्म्यसङ्कल्पः। कथञ्चनापि परेषामपीडनस्य सुखप्रदानस्य च अभिलाषोऽव्यापादसङ्कल्पः । प्राणिनो दुःखान्निर्मुक्ता भवेयुरिति प्राणिषु करुणाभावोऽविहिंसासङ्कल्पः । एवञ्च सर्वेषां भूतानां दुःखमुक्तये उदात्तेनाभिप्रायेण बौद्धमार्गे प्रवृत्तेर्निश्चयनं बोधिसत्त्वसङ्कल्पो वर्तते ।

३. **सम्यग् वाक्** – अनुचितभाषणं परिहरन् समुचितवाक्यानां प्रयोग एव सम्यग् वाग् वर्तते । सम्यग् वाक् तादृशी वाग् वर्तते, यया परेभ्यः कदापि पीडनं न भवति । परेषां हानिकरस्य वचसोऽनभ्यासश्च सम्यग् वाग् वर्तते । अन्येषामवमानं यया भवति, अन्येभ्यो मिथ्या सूचना यथा मिलति, वृथा प्रलापेन यदा च परेषां कृते क्लेशो जायते, तादृशी वाक् सम्यग् वाङ् न भवति । अतो मिथ्याभाषणम्, परनिन्दनम्, परुषवचनम्, निष्क्रियभाषणञ्च सर्वथा परित्यक्तव्यम् । सदैव स्वविवेकं प्रयुज्य परोपकारिणी साध्वी वाणी प्रयोक्तव्या । एवं कृत्वा वचसः शुद्धिर्भवति ।

४. **सम्यक् कर्मान्तः** – कार्यस्य परिणामः कर्मान्त इत्युच्यते । यदि कृतं कर्म आत्मनः परेषाञ्च लाभाय भवति, तर्हि स सम्यक् कर्मान्तो मन्यते । अतः परेषां हानये दुरभिप्रायेण कर्म कदापि नाचरणीयम् । भ्रष्टाचारादिकर्माणि सम्यङ् न भवन्ति । दुष्कृतं परित्यज्य सत्कर्मणि प्रवर्तनेन खलु सम्यक् कर्मान्तः प्राप्यते । निर्वाणं प्राप्तुमिच्छावद्भिः सम्यक् कर्माणि कर्तव्यानि । क्रूरं कर्म सर्वथा त्यक्तव्यम् । व्यभिचारो न करणीयः । वञ्चनं लुण्ठनं चौर्यादिकं वा सकलं दुष्कृतं त्यजनीयम् । सदैव सर्वेषां हितबुद्ध्या कर्माचरणमेव सम्यक्कर्मान्तस्याभ्यासः । मनसा वचसा शरीरेण च कर्तव्यानि सर्वाणि कर्माणि शुभानि भवन्तु । अनेन जीवनं सुन्दरं भवति ।

५. **सम्यग् आजीवः** – सत्कर्म कृत्वा जीवनयापनं सम्यग् आजीवोऽस्ति । आचरणं सम्यग् भवति चेद् जीविकापि शुद्धा भवति । तादृश्या जीविकया जीवनमत्यन्तं सुखदं हितकरञ्च भवति । अतः

सम्यग् जीवनाय जीविकायाः शुद्धिरावश्यकी । तेन जीवनमपि सुदृढं भवति । गृहस्थस्य प्रव्रजितस्य च सम्यग् आजीविका भवत्वित्यत्र बौद्धाचारे विशेषा व्यवस्था वर्तते । जीवनयापनार्थं परेषां वञ्चनम्, छलबुद्धिः, निषिद्धकर्मसु प्रवर्तनमित्यादीनि अशुभानि कर्माणि सन्ति । अतः सर्वाणीमानि कार्याणि त्यक्तव्यानि । आजीविकायाः कृतेऽनुचितं जीविकाविधिं परित्यज्य समुचितो जीविकाविधिः स्वीकरणीयः । शस्त्रव्यापार-पशुव्यापार-मांसमद्यविषव्यापारादीन् निषिद्धव्यापारान् परिहृत्य सम्यगाजीवः समाश्रयणीयः । परहानिं विश्वासघातादिकञ्च परित्यज्य सम्यग् आजीविकया धनार्जनं करणीयम् ।

भगवता बुद्धेन भिक्षूणां गृहस्थानाञ्च कृते सम्यग् आजीविकायै नियमाः समुपदिष्टाः सन्ति । प्रव्रजितानां कृते किं किं निषिद्धमिति तस्योपदेशो वर्तते–

**कुहना** - मार्गपार्श्वे विविक्ते वा स्थाने, मार्गे कश्चन भिक्षां दास्यतीति आशया सुखासने सूत्रपाठपूर्वकं वा स्थितिः ।

**लपना** - दानस्य आदरस्य च आशया अनावश्यकसम्बन्धं परिभाव्य संवादः ।

**नैमित्तिकत्वम्** - यदि कश्चित् किमपि ददाति पोषयति वा अन्येद्युश्च तस्मात् प्राप्त्याशया तस्याधिकप्रशंसनम् ।

**नैष्पेशिकत्वम्** - यदि कश्चिद् अन्नदानादिकं न ददाति चेत्तस्मै पाप-धर्म-स्वर्ग-नरकादीनामुपदेशपूर्वकं भयदानम् ।

**लाभप्रतिकाङ्क्षा** - व्यक्तिगतधनव्ययेन उत्तमानि उपभोग्यानि वस्तूनि क्रीत्वा अन्येषां पुरतः प्रदर्शनम् । तेन च लज्जया तेभ्य उत्तमचीवरादीनामादानाशा ।

एवमेव गृहस्थानां कृते किं किं निषिद्धमिति भगवतो बुद्धस्योपदेशो वर्तते– विषव्यापारः, शस्त्रव्यापारः, पशुव्यापारः, मादकद्रव्यस्य तस्करकार्यम्, मांसव्यापारश्च ।

६. **सम्यग् व्यायामः** – सत्कर्मणां कृते सम्यक् प्रयासः सुन्दरस्योद्योगस्य नाम वा सम्यग् व्यायामो वर्तते । अभ्यासः श्रमो वेति व्यायामस्य सामान्यार्थः । इन्द्रियाणां नियन्त्रणम्, अशुभभावानां दमनम्, सद्भावानां विकासाय प्रयत्नः च सम्यग् व्यायामाः सन्ति ।

सत्कर्म कर्तुं सम्यग् भावानाया अभ्यासः सदैव करणीयः । तस्य कृते सततं प्रयत्नः साधनीयः । इन्द्रियाणां नियन्त्रणम्, नकारात्मकभावानां निराकरणम्, परेषां कल्याणञ्चेत्यादीनां सम्यग् भावानां कृते नित्यं प्रयतमानेन भाव्यम् । एतदर्थं बौद्धाचारे चत्वारः उपाया उपदिष्टाः सन्ति-

(क) अनुत्पन्नस्य अकुशलचित्तस्यानुत्पत्तौ विशेषावधानता, उत्पन्ने च तादृशे चित्ते तन्निवारणाय यत्नः ।

(ख) उत्पन्नस्याकुशलस्य चित्तस्य त्यागः, उत्पद्यमानस्याशोभनविचारस्य वा चित्ते स्थाननिषेधे प्रयतनम् ।

(ग) अनुत्पन्नस्य कुशलस्य चित्तस्योत्पादनाय, चित्ते सद्विचारस्योद्भावनाय वा प्रयासः ।

(घ) सदा सद्विचारार्थं प्रयतनम्, चित्तस्य नियन्त्रणम्, उत्पन्नस्य कुशलस्य चित्तस्य संरक्षणञ्च ।

७. **सम्यक् स्मृतिः** – स्मरणमेव स्मृतेः सामान्यार्थः । सुकृतानां कर्मणां स्मरणं सम्यक् स्मृतिः । चित्तमहितं प्रति न भ्रमत्विति अकुशलात्तस्य वारणाय सम्यक् स्मृतिः करणीया । अतः समुचितस्य वस्तुनो व्यवहारस्य वा स्मरणं सततं कर्तव्यं भवति । पञ्चस्कन्धानां पञ्चेन्द्रियाणां चतुर्णामार्यसत्यानाञ्च स्मरणं सम्यक् स्मृतिरस्ति । शरीरस्य वेदनायाः चित्तस्य धर्मस्य च याथार्थ्यं ज्ञातुं स्मृतिरावश्यकी भवति । मनुष्यशरीरं पाञ्चभौतिकमस्ति, एवञ्च विष्टादीनां तत्र सत्त्वात् तदशुद्धमन्तवच्चास्तीति सर्वदा स्मरणीयम् । एतदर्थं चतुर्णां स्मृत्युपस्थापनानां माध्यमेन प्रोच्यते-

- **कायानुस्मृतिः** - शरीरस्य यथार्थस्वरूपस्य सदा स्मरणम्
- **वेदनानुस्मृतिः** - वेदनाया उत्थानविनाशस्वभावस्य स्मरणम्
- **चित्तानुस्मृतिः** - चित्तस्य विविधानामवस्थानां स्मरणम्.
- **धर्मानुस्मृतिः** - वस्तूनां स्वरूपस्य सम्यक् स्मरणम्

स्मृतिः सर्वदैव शुभभावानां समुत्पादनशीला भवत्विति अवधेयम् । क्लेशासक्तिचाञ्चल्यादिवर्धिका स्मृतिः कदापि नाश्रयणीया । क्लेशान्निर्मुक्त्यै चानेका अनुस्मृतयो बौद्धाचारे समुपदिष्टाः सन्ति । तदर्थं बुद्धानुस्मृतिः, धर्मानुस्मृतिः, संघानुस्मृति, त्यागानुस्मृतिः, देवानुस्मृतिः, उपशमानुस्मृतिश्चेति बह्व्योऽनुस्मृतयः सन्ति । एतासामभ्यासेन सम्यक् स्मृतिर्निर्मातुं शक्या ।

८. **सम्यक् समाधिः** – चित्तस्य एकाग्रावस्था शान्तिरस्ति । चित्तस्यैकाग्रीकरणाय प्रयुक्तं वस्तु आलम्बनं मन्यते । तादृशे आलम्बने चित्तस्य स्थिरीकरणमेव समाधिरस्ति । चित्तस्य क्लेशराहित्यसम्पादनाय यादृश्याः समाधेरभ्यासो विधीयते, सैव सम्यक् समाधिः । सम्यक् समाधिरेव साधकं निर्वाणं प्रापयति । चित्तस्य शून्यता पूर्णजागरणावस्था वा समाधिरस्तीति मन्यते ।

विषयदृष्ट्या शून्यम्, विषयिदृष्ट्या च यदा पूर्णतया चित्तं जागरितं भवति, तदैव साधकः समाधिमधितिष्ठति । समाधिद्वारा मानवजीवनस्यैव परिणमनं भवति । अनेन अविवेकिनो जना अपि विवेकिनः सम्पद्यन्ते । समाधौ प्राप्त आनन्द वर्णनाशक्यो भवति । समाधिरेव मनुष्यं जीवनस्य उत्कृष्टं लाभमास्वादयति । सम्यक् समाधिरित्यत्र ध्यानस्य चत्वारः स्तराः परिचर्चिताः सन्ति-

**प्रथमः** - निष्कामविचारः, प्रेम, सुखं, एकाग्रतया च ध्यानम्

**द्वितीयः** - प्रेम्णा, सुखेन, एकाग्रतया च ध्यानम्

**तृतीयः** - सुखेन एकाग्रतया च ध्यानम्

**चतुर्थः** - जागरुकतया अवहेलनया च ध्यानम्

इति समाधिसंज्ञकस्तरचतुष्टयस्य नाम खलु सम्यक् समाधिर्वर्तते ।

रत्नत्रयस्य बोधाभावेन जीवो जन्ममरणयोश्चक्रे बम्भ्रमीति । शीलपालनेन मनोवाक्कायशोधनं भवति । यदा तु शीलं प्रतिष्ठितं भवति, तदा शोधितमनोवाक्कायो जनः समाधिमधितिष्ठति । शोधितचित्तस्यैकाग्रता एव समाधिरस्ति । प्रज्ञा समाधिशीलयोः फलं वर्तते । भवचक्रस्य मूलमविद्या । अविद्यायाश्च उच्छेदः प्रज्ञया । अतः प्रज्ञां विना नहि निर्वाणप्राप्तिः । त्रिरत्नानुष्ठानेनैव दुःखनिरोधो निर्वाणप्राप्तिर्वा सम्भवतीति आर्याष्टाङ्गमार्गाणां शीलादिरत्नत्रयस्य वा सरणिर्भगवता बुद्धेन समुपदिष्टा ।

## अभ्यासः

### १. अतिसङ्क्षेपेण उत्तरयत

(क) दुःखसमुदायस्य मूलं किमस्ति ?

(ख) 'मार्गः' इत्यस्य तात्पर्यं किम् ?

(ग) दृष्टेः सामान्यार्थः कः ?

(घ) अविद्यायाः कारणेन वयं किं मन्यामहे ?

(ङ) अष्टाङ्गमार्गाणां द्वितीयं सोपानं किमस्ति ?

(च) का सम्यग् वाक् ?

(छ) सम्यक् कर्मान्तः कः कथ्यते ?

(ज) के निषिद्धव्यापाराः ?

(झ) का कायानुस्मृतिः ?

(ञ) कः समाधिः ?

### २. सङ्क्षिप्तोत्तरं लिखत

(क) आर्यसत्यानि कानि सन्ति ?

(ख) कार्याष्टाङ्गमार्गाणां रत्नत्रयात्मकं वर्गीकरणं प्रस्तुत ?

(ग) अष्टाङ्गमार्गाणां भावस्य सूचीं प्रदर्शयत ।

(घ) बौद्धाचारे सम्यक् सङ्कल्पः कतिधा विभक्तोऽस्ति ? नामानि च लिखत ।

(ङ) किमर्थं साध्वी वाणी प्रयोक्तव्या ?

(च) अस्माभिः कीदृशानि कार्याणि न कर्तव्यानि ? सम्यक्कर्मान्ताधारेण विलिखत ।

(छ) प्रव्रजितानां कृते किं किं निषिद्धमस्ति ?

(ज) सम्यग्व्यायामस्य सामान्यार्थं विलिख्य के सम्यग्व्यायामाः सन्तीति लिखत ।

(झ) चत्वारि स्मृत्युपस्थापनानि कानि ?

(ञ) ध्यानस्य चत्वारः स्तराः के ?

## ३. अधो लिखितं पाठांशं पठित्वा स्वगिरा सारांशं लिखत

सत्कर्म कृत्वा जीवनयापनं सम्यग् आजीवोऽस्ति । आचरणं सम्यग् भवति चेद् जीविकापि शुद्धा भवति । तादृश्या जीविकया जीवनमत्यन्तं सुखदं हितकरञ्च भवति । अतः सम्यग् जीवनाय जीविकायाः शुद्धिरावश्यकी । तेन जीवनमपि सुदृढं भवति । गृहस्थस्य प्रव्रजितस्य च सम्यग् आजीविका भवत्वित्यत्र बौद्धाचारे विशेषा व्यवस्था वर्तते । जीवनयापनार्थं परेषां वञ्चनम्, छलबुद्धिः, निषिद्धकर्मसु प्रवर्तनमित्यादीनि अशुभानि कर्माणि सन्ति । अतः सर्वाणीमानि कार्याणि त्यक्तव्यानि । आजीविकायाः कृतेऽनुचितं जीविकाविधिं परित्यज्य समुचितो जीविकाविधिः स्वीकरणीयः । शस्त्रव्यापार-पशुव्यापार-मांसमद्यविषव्यापारादीन् निषिद्धव्यापारान् परिहृत्य सम्यगाजीवः समाश्रयणीयः । परहानिं विश्वासघातादिकञ्च परित्यज्य सम्यग् आजीविकया धनार्जनं करणीयम् ।

भगवता बुद्धेन भिक्षूणां गृहस्थानाञ्च कृते सम्यग् आजीविकायै नियमाः समुपदिष्टाः सन्ति । प्रव्रजितानां कृते किं किं निषिद्धमिति तस्योपदेशो वर्तते–

**कुहना** - मार्गपार्श्वे विविक्ते वा स्थाने, मार्गे कश्चन भिक्षां दास्यतीति आशया सुखासने सूत्रपाठपूर्वकं वा स्थितिः ।

**लपना** - दानस्य आदरस्य च आशया अनावश्यकसम्बन्धं परिभाव्य संवादः ।

**नैमित्तिकत्वम्** - यदि कश्चित् किमपि ददाति पोषयति वा अन्येद्युश्च तस्मात् प्राप्त्याशया तस्याधिकप्रशंसनम् ।

**नैष्पेशिकत्वम्** - यदि कश्चिद् अन्नदानादिकं न ददाति चेत्तस्मै पाप-धर्म-स्वर्ग-नरकादीनामुपदेशपूर्वकं भयदानम् ।

**लाभप्रतिकाङ्क्षा** - व्यक्तिगतधनव्ययेन उत्तमानि उपभोग्यानि वस्तूनि क्रीत्वा अन्येषां पुरतः प्रदर्शनम् । तेन च लज्जया तेभ्य उत्तमचीवरादीनामादानाशा ।

एवमेव गृहस्थानां कृते किं किं निषिद्धमिति भगवतो बुद्धस्योपदेशो वर्तते– विषव्यापारः, शस्त्रव्यापारः, पशुव्यापारः, मादकद्रव्यस्य तस्करकार्यम्, मांसव्यापारश्च ।

## ४. अनुच्छेदं पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत

योगस्य प्रणेता महर्षिः पतञ्जलिरस्ति । स कथयति - 'योगश्चित्तवृत्तिनिरोधः' । तस्य मते विषयेषु लिप्तायाश्चित्तवृत्तेर्निरोध एव योगोऽस्ति । योगसूत्रस्य रचयिता पतञ्जलिर्योगस्याऽष्टाङ्गानां चर्चामकरोत् । स योगसूत्रे अलिखत् -

**यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयोऽष्टावङ्गानि ।**

तेन तेषामष्टाङ्गानां परिचयश्च सूत्ररूपेणैव एवं प्रस्तुतो वर्तते-

**तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः ।**

**शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ।**

**स्थिरसुखमासनम् ।**



**तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः ।**



**स्वविषयासम्प्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः ।**

**देशबन्धश्चित्तस्य धारणा ।**

**तत्र प्रत्ययैकतानता ध्यानम् ।**

**तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः।**

यथा योगस्याष्टाङ्गानि सन्ति तथैव दुःखनिरोधस्योपायरूपेण बुद्धेन आर्याष्टाङ्गमार्गा निर्दिष्टाः सन्ति।

**प्रश्नाः**

(क) योगस्य कति अङ्गानि सन्ति ?

(ख) यमान्तर्गता विषयाः के ?

(ग) के नियमाः ?

(घ) आसनस्य लक्षणं किम् ?

(ङ) प्राणायामस्य अभ्यासे किं क्रियते ?

(च) कः प्रत्याहारः ?

(छ) ध्यान-धारणा-समाधीनां लक्षणानि अष्टाङ्गयोगक्रमेण लिखित्वा वर्णयत।

**५. आर्यसत्यानां पालनेन के लाभाः ?**

**६. आर्याष्टाङ्गमार्गाणां पालनाय निषिद्धानि कर्माणि कानि सन्ति ? विवेचयत।**

**७. शिक्षकस्य सहयोगेन पञ्चशीलानां विषये लघुनिबन्धमेकं रचयत।**

**८. अधस्तनमनुच्छेदं पठित्वा निर्दिष्टकार्याणि कुरुत**

मत्स्येन्द्रनाथः सौभिक्ष्यस्य देवताऽस्ति। हिन्दुधर्मावलम्बिनः नाथसम्प्रदायस्य गोरक्षनाथस्य गुरुं मत्स्येन्द्रनाथं पूजयन्ति। स च नाथसम्प्रदायस्य प्रमुखो देवो मन्यते। बौद्धधर्मावलम्बिनस्तु इमं देवं बहुनामभिः सम्बोधयन्ति। तेषु पद्मपाणिः, आर्यावलोकितेश्वरः, लोकनाथश्च प्रचलितानि नामानि सन्ति। ते पञ्चबुद्धेषु चतुर्थबुद्धरूपेण इमं देवं सङ्केतयन्ति। मत्स्येन्द्रनाथस्य बहुकालिकानि मन्दिराणि सन्ति। तेषु काष्ठमण्डपस्य मत्स्येन्द्रनाथः श्वेतमत्स्येन्द्रनाथनाम्ना परिचितो वर्तते चेल्ललितपुरस्य मत्स्येन्द्रनाथः रक्तमत्स्येन्द्रनाथनाम्ना प्रसिद्धो वर्तते। एतौ विहाय नालास्थानस्य मत्स्येन्द्रनाथः श्वेतमत्स्येन्द्रनाथोऽस्ति, दोलखामण्डलस्य कीर्तिपुरस्य च मत्स्येन्द्रनाथो रक्तमत्स्येन्द्रनाथो विद्यते इति जना विश्वसन्ति। ललितपुरस्य रक्तमत्स्येन्द्रनाथस्य रथयात्रा प्रतिवर्षं विधीयते। वैशाखमासस्य शुक्लपक्षस्य प्रतिपत्त आरभ्य आषाढमासस्य शुक्लपक्षस्य चतुर्थीपर्यन्तं यावद् रक्तमत्स्येन्द्रनाथस्य रथयात्रा विधीयते। ललितपुरस्य पुल्चोकस्थानाद् रथयात्रां निष्कास्य रथो मङ्गलबजार-सुन्धारा-लगनखेल-कुमारीपाटीस्थानानि प्राप्यते। जावलाखेलस्थानं प्राप्य

पेटकवस्त्रप्रदर्शनानन्तरं रथयात्रा समाप्यते । लिच्छविकालिकस्य राज्ञो नरेन्द्रदेवस्य समयादारभ्य यात्रासमापने राज्ञः प्रमुखातिथ्यस्य परम्परा प्रचलितेति इतिहासज्ञाः कथयन्ति । मत्स्येन्द्रनाथस्य रथनिर्माणं स्थानीयवाराहीजातीयैरेव कर्तव्यमिति मान्यता प्रचलिता वर्तते । षोडशशतवर्षपूर्वं रक्तमत्स्येन्द्रनाथस्य रथयात्रायाः प्रचलनमारब्धमिति जना विश्वसन्ति । श्वेतमत्स्येन्द्रनाथस्य रथयात्रापि प्रतिवर्षं क्रियते । काष्ठमण्डपोपत्यकाया वृद्धान् मत्स्येन्द्रनाथं दर्शयितुमस्याः परम्परायाः विकासो जात इति विश्वासोऽस्ति । अयं देवः सौभिक्ष्यस्य देव इति कथ्यते । इमं देवं जमलस्थानं प्रापयित्वा रथे संस्थाप्यते । ततो नगरपरिक्रमां कारयित्वा लगनटोलस्थाने स्थितायास्तस्या मातुः त्रिवारं परिक्रमां विधाप्य रथयात्रा विसृज्यते ।

**(क) एकपदेन उत्तरयत**

(अ) मत्स्येन्द्रनाथः कस्य देवता अस्ति ?

(आ) बौद्धधर्मावलम्बिनः कतमबुद्धरूपेण मत्स्येन्द्रनाथं सङ्केतयन्ति ?

(इ) रक्तमत्स्येन्द्रनाथस्य रथयात्रा कतिमासपर्यन्तं प्रचलति ?

(ई) जावलाखेलस्थाने किं प्रदर्श्यते ?

**(ख) एकवाक्येन उत्तरयत**

(अ) बौद्धधर्मावलम्बिन इमं देवं कैर्नामभिः सम्बोधयन्ति ?

(आ) अनुच्छेदानुसारेण मत्स्येन्द्रनाथस्य कुत्र कुत्र मन्दिराणि सन्ति ?

(इ) रक्तमत्स्येन्द्रनाथस्य रथयात्रा कदा भवति ?

(ई) श्वेतमत्स्येन्द्रनाथस्य रथयात्रा कथं विसर्ज्यते ?

# अशोकस्य नेपालभ्रमणम्

अशोको मगधसाम्राज्यस्य सम्राडासीत्। तस्य शासनकालः खीष्टसंवत्सरस्य त्रिसप्तत्युत्तरद्विशततमवर्षतः पूर्वादारभ्य द्वात्रिंशदुत्तरद्विशततमवर्षपूर्वपर्यन्तमासीदिति इतिहासविदो वदन्ति। स मौर्यवंशस्य चक्रवर्ती राजाऽऽसीत्। राज्ञो बिन्दुसारस्य धर्मायाश्च पुत्ररूपेण अशोकस्य जन्म अभवत्। धर्मा क्षत्रियकुले जाता कन्या नासीत्। सा स्वप्नावस्थायां स्वपुत्रः सम्राड् भविष्यति इति अजानात्। अत एव तस्याः पुत्रः सम्राड् भविष्यतीति धर्माया मुखादेव श्रुत्वा राजा तां राज्ञीरूपेण स्वीकृतवानिति कथ्यते। बाल्यकाले एव युद्धकलायां प्रवीणोऽशोको विशालराज्यस्य सम्राडऽभवत्। स एव सम्राड् बुद्धस्यानुयायी अभवत्। एष बौद्धचिन्तनस्य प्रचारकश्चासीत्।

अशोकस्य पराक्रमस्य चर्चा सर्वत्र व्याप्ताऽऽसीत्। एकदा तक्षशिलायां विद्रोहो जातः। विद्रोहदमनार्थं राजा बिन्दुसारोऽशोकं तत्र प्रेषितुं निरणयत्। तच्छ्रुत्वैव तत्र विद्रोहः शान्तोऽभवदिति कथ्यते। ततः पश्चादशोको निर्वासनाय राज्ञा प्रेषितः। अशोकः कलिङ्गराज्यमगच्छत्। उज्जयिन्या विद्रोहदमनाय स पुनराहूतः। कालान्तरे विमातृपुत्रा अशोकस्य मातरं हतवन्तः इति वार्ता अशोकस्य कर्णविषयताङ्गता। तेन अतीव क्रुद्धोऽशोको विमातुः पुत्रान् जघान। तदानीमशोकः क्रूरो जातः। तस्य नामश्रवणेन एव यः कोऽपि कम्पते स्म इति श्रूयते। कलिङ्गेन सह जाते युद्धेऽशोको विक्षिप्तो जातः। तदनन्तरं बौद्धधर्ममङ्गीकृत्य स हिंसाया मार्गमत्यजत्।



‘अहिंसा परमो धर्मः’ इति बुद्धस्य वाणी आसीत् । बौद्धमतानुयायी अशोको युद्धाद् विरक्तो जातः । तस्मात्कारणाद् बुद्धस्य शान्तिसन्देशान् अवलम्ब्य स बौद्धोपदेशानामनुसरणं कर्तुं जनान् प्रैरयत् । स स्वशासनकालस्य विंशतितमे वर्षे बुद्धस्य जन्मस्थलं लुम्बिनीम् आगच्छत् । तत्र स्तम्भं निरमात् । स च स्तम्भः अशोकस्तम्भ इति नाम्ना प्रसिद्धो वर्तते । तस्मिन् स्तम्भेऽभिलेखो वर्तते । इतिहासविदः कथयन्ति- “तत्र चाशोकेन बुद्धजन्मस्थले स्तम्भो निर्मित इति उल्लिखितोऽस्ति ।” अभिलेखस्य लिपिर्ब्राह्मी वर्तते । अभिलेखानुसारेण लुम्बिन्यां ग्राम आसीत् । अशोकेन निर्मितः स्तम्भ एव लुम्बिनी गौतमबुद्धस्य जन्मस्थलमस्ति इत्यस्य प्रमुखं प्रमाणं वर्तते । अद्यापि वयं तत्र गत्वा अशोकस्तम्भं द्रष्टुं शक्नुमः । तस्य स्तम्भस्य अधोभागेऽभिलेखस्य नेपालिभाषायाम्, आङ्ग्लभाषायां चानुवादोऽस्ति ।

अशोकस्तम्भः पूर्वं लुम्बिन्यामासीदिति न कोऽपि जानाति स्म । नेपाले यदा वीरशमशेरः प्रधानमन्त्री आसीत्, तदा जर्मनीदेशस्य नागरिकः फ्युररः बुद्धसम्बद्धस्थलस्योत्खननाय अनुमतिं गृहीतवान् । तेन सह तात्कालिकस्य प्रधानमन्त्रिणो वीरशमशेरस्य आज्ञया तस्य भ्राता खड्गशमशेरो लुम्बिनीं प्राप्नोत् । तत्र खड्गशमशेरः अशोकस्तम्भस्य लघुभागमपश्यत् । खीष्टसंवत्सरस्य षण्णवत्युत्तराष्टादशशततमे वर्षे डिसेम्बरमासस्य प्रथमे दिवसे खड्गशमशेरः, फ्युररश्च अशोकस्तम्भस्य, अभिलेखस्य च विषयेऽन्वेषणं प्रारभेताम् । ततः पश्चाद् बौद्धधर्मानुयायिनः तद् बुद्धजन्मस्थलं ज्ञात्वा अतीव हर्षिता अभवन् । पश्चाद् बौद्धधर्मावलम्बिनस्तत्र आगन्तुं प्रारभन्त । यदा गौतमबुद्धोऽजायत, तदा कपिलवस्तुः शाक्यगणराज्यस्य राजधानी आसीदिति विदुषां मतमस्ति ।

सम्राडशोकः स्वतनयया चारुमत्या सह काष्ठमण्डपमपि आगच्छत् । तस्याः पुत्री बौद्धमार्गस्य अनुयायिनी आसीत् । अशोकः काष्ठमण्डपमागत्य चारुमत्या विवाहं देवपालेन सह अकारयत् । देवपालः तात्कालिको राजकुमार आसीदिति केचिद् वदन्ति चेत् केचित् स एकः क्षत्रिय एवासीदिति वदन्ति । केचित्तु देवपालो राजा आसीद् इति च वदन्ति । तयोर्विवाहं कारयित्वा अशोकः पशुपतिनाथमन्दिरस्य निकटे देवपत्तननामके स्थाने तयोर्वासमकारयदिति इतिहासविदां कथनमस्ति । अशोको बौद्धसन्देशस्य प्रचाराय नैकविधं प्रयासमकरोत् । स ललितपुरक्षेत्रस्य चतुर्षु दिक्षु चतुरः स्तूपान् निरमात् । अद्यापि ते स्तूपाः तत्रैवावस्थिताः सन्ति ।

ललितपुरक्षेत्रस्य पूर्वदिशि इमाडोलनामके स्थाने एकोऽशोकस्तूपोऽस्ति । स च स्तूपः काष्ठमण्डपोपत्यकायाः चक्रपथस्य बहिर्भागेऽवस्थितो वर्तते ।अन्ये त्रयः स्तूपाः चक्रपथस्यान्तर्भागे सन्ति ।दक्षिणभागेऽवस्थितोऽशोकस्तूपो लगनखेलनामके स्थाने विद्यते । चतुर्षु स्तूपेषु एष विशालतमो वर्तते । अपरोऽशोकस्तूपः पुल्चोकनामके स्थानेऽस्ति । एष ललितपुरक्षेत्रस्य पश्चिमदिशि विराजते । अन्यः स्तूपः शङ्खमूलस्थाने अस्ति । एष उत्तरदिशि वर्तते । अशोकस्तदा ललितपुरक्षेत्रस्य चतुर्षु स्थानेषु बौद्धविचाराणां प्रचारो भवेदिति विचार्य चतुर्णां स्तूपानां निर्माणमकरोत् ।













बौद्धभिक्षूणां सङ्गत्या शासनकालस्योत्तरार्धेऽशोकः यथासम्भवं बुद्धस्य शान्तिसन्देशानां प्रचारमकरोत् । तस्य प्रमाणरूपेण ललितपुरक्षेत्रे एव चत्वारः स्तूपाः सन्ति । तेषां दर्शनार्थम् इन्डोनेसिया-ताइवान-भुटानप्रभृतिभ्यो देशेभ्यः बौद्धमार्गानुयायिनः प्रतिवर्षमागच्छन्ति । अशोकस्य पुत्री चारुमती बुद्धस्य परमानुयायिनी आसीत् । सा च पितुरशोकस्य प्रभावेण बौद्धोपदेशान् अनुसरति स्म । देवपालस्य निधनानन्तरं सा भिक्षुणी अभवत् । पशुपतिक्षेत्रस्य निकटे चाबहिलस्थाने सा बौद्धविहारनिर्माणम् अकारयत् । स च चारुमतीविहारः इति नाम्ना व्यवह्रियते ।

मगधदेशस्य सम्राजः अशोकस्य नेपालेन सह प्रियः सम्बन्धो दृश्यते । स शासनकालस्य उत्तरार्धे बुद्धस्योपदेशानां पालनमकरोत् । बौद्धमार्गमवलम्ब्य परमां शान्तिमन्वभवत् । बौद्धभिक्षवस्तं सन्मार्गमदर्शयन् । स च नेपालस्य लुम्बिनीमागत्य स्तम्भं निर्माय बुद्धस्य सम्मानमकरोत् । तस्य नेपालभ्रमणेनैव लुम्बिनी बुद्धस्य जन्मस्थानमासीदिति प्रमाणितं वर्तते । स लुम्बिन्यामेव नातिष्ठत्, अपितु काष्ठमण्डपोपत्याकामागत्य बौद्धदर्शनस्य प्रचारमकरोत् । तेन निर्मिताश्चत्वारः स्तूपा नेपालस्य सांस्कृतिकसम्पद्रूपेण विराजमानाः सन्ति । तेषां दर्शनार्थं सहस्राधिकाः पर्यटकाः प्रतिवर्षम् आगच्छन्ति । तैः काष्ठमण्डपोपत्यकायाः शोभा वर्धितास्ति । सम्राजोऽशोकस्य भ्रमणेन नेपालस्य ऐतिहासिकगौरवो वर्धमानोऽनुभूयते ।

## अभ्यासः

१. **अतिसङ्क्षेपेण उत्तरयत**

(क) अशोकस्य मातापितरौ कौ ?

(ख) अशोकः कदा विक्षिप्तो जातः ?

(ग) बुद्धस्य वाणी का ?

(घ) अशोकेन सह का काष्ठमण्डपम् आगच्छत् ?

(ङ) चारुमतीविहारः कुत्रास्ति ?

२. **सङ्क्षिप्तोत्तरं लिखत**

(क) धर्मा कथं राज्ञी अभवत् ?

(ख) अशोकः किमर्थं विमातृपुत्रान् जघान ?

(ग) स्वगिरा अशोकस्तम्भं परिचाययत ।

(घ) अशोकस्तम्भः कथं मिलितः ?

(ङ) ललितपुरक्षेत्रे कुत्र कुत्र अशोकस्तूपाः निर्मिताः सन्ति ?

३. **अधो लिखितं पाठांशं पठित्वा सारांशं लिखत**

ललितपुरक्षेत्रस्य पूर्वदिशि इमाडोलनामके स्थाने एकोऽशोकस्तूपोऽस्ति । स च स्तूपः काष्ठमण्डपोपत्यकायाः चक्रपथस्य बहिर्भागेऽवस्थितो वर्तते । अन्ये त्रयः स्तूपाः चक्रपथस्यान्तर्भागे सन्ति । दक्षिणभागेऽवस्थितोऽशोकस्तूपो लगनखेलनामके स्थाने विद्यते । चतुर्षु स्तूपेषु एष विशालतमो वर्तते । अपरोऽशोकस्तूपः पुल्चोकनामके स्थानेऽस्ति । एष ललितपुरक्षेत्रस्य पश्चिमदिशि विराजते । अन्यः स्तूपः शङ्खमूलस्थाने अस्ति । एष उत्तरदिशि वर्तते । अशोकस्तदा ललितपुरक्षेत्रस्य चतुर्षु स्थानेषु बौद्धविचाराणां प्रचारो भवेदिति विचार्य चतुर्णां स्तूपानां निर्माणमकरोत् ।

बौद्धभिक्षूणां सङ्गत्या शासनकालस्योत्तरार्धेऽशोकः यथासम्भवं बुद्धस्य शान्तिसन्देशानां प्रचारमकरोत् । तस्य प्रमाणरूपेण ललितपुरक्षेत्रे एव चत्वारः स्तूपाः सन्ति । तेषां दर्शनार्थम् इन्डोनेसिया-ताइवान-भुटानप्रभृतिभ्यो देशेभ्यः बौद्धमार्गानुयायिनः प्रतिवर्षमागच्छन्ति । अशोकस्य पुत्री चारुमती बुद्धस्य परमानुयायिनी आसीत् । सा च पितुरशोकस्य प्रभावेण बौद्धोपदेशान् अनुसरति स्म । देवपालस्य

निधनानन्तरं सा भिक्षुणी अभवत् । पशुपतिक्षेत्रस्य निकटे चाबहिलस्थाने सा बौद्धविहारनिर्माणम् अकारयत् । स च चारुमतीविहारः इति नाम्ना व्यवह्रियते ।

## ४. कथां पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत

एकदा बुद्धः स्वशिष्यान् शिक्षयन् आसीत् । शिष्या बुद्धस्योपदेशं ध्यानेन शृण्वन्त आसन् । तदा एव एको वणिग्जनस्तत्र आगच्छत् । स क्रुद्ध आसीत् । आगत्य अभद्रतया अनुमतिं विनैव उच्चैः स्वरेण कथयितुमारभत -

वणिक् - अत्र बुद्धः कोऽस्ति ?

बुद्धः - अहमस्मि । मया सह भवतः कार्यमस्ति किम् ?

वणिक् - मम किमपि कार्यं नास्ति परन्तु त्वमस्माकं सन्ततीनां समयो व्यर्थं यापयन् असि । तव गृहं नास्ति । तव परिवारो नास्त्यत्र । अत एव त्वमन्येषां समयं निष्फलं कारयसि ।

बुद्धः - (स्मितं विहस्य) अन्यदपि अस्ति किं कथनीयम् ?

वणिक् - तवात्र आगमनेन अस्माकं सन्ततयः कार्यं त्यक्त्वा तव व्यर्थां वाणीं श्रोतुमागताः सन्ति । इत्थं लौकिको व्यवहारः कथं सम्भवति ? भोजनं कथं प्राप्यते ? जीवनं कथं चलति ?



(बुद्धः किमपि नावदत् । स गालीं ददान आसीत् । बुद्धस्य वदने लेशमात्रमपि मलिनता नैव सञ्जाता । वणिक् स्वकथनं सर्वं समाप्य ततो निर्गतः । एतत्सर्वं दृष्ट्वा शिष्या विस्मिता आसन् । वणिज आलापेन ते सर्वे क्रुद्धा जाताः । परन्तु बुद्धस्तु प्रसन्नचेता एव आसीत् । एकः शिष्यस्तूष्णीं स्थातुं नाशक्नोत् ।)

शिष्यः - भो गुरो ! वणिग् भवते गालीमयच्छत् । अस्मभ्यं तस्य व्यवहारो नारोचत परन्तु भवानधुनापि प्रसन्नमनाः सन् स्थितोऽस्ति ।

बुद्धः - यस्य पार्श्वे धनमस्ति स धनं दातुं शक्नोति । यस्य पार्श्वे सद्वचनानि सन्ति स सद्वचनं कथयति । वणिजः पार्श्वे क्रोध आसीत् । स गालीं दत्वा अगच्छत् । मम पार्श्वे सर्वेषां प्राणिनां कृते प्रेम अस्ति । अहं तदेव यच्छामि ।

बुद्धस्य कथनेन शिष्याः सन्तुष्टा जाताः । बुद्धस्य तादृशेन व्यवहारेण वणिगपि पश्चात्तापेन गलितः सन् तत्रैवागच्छत् । स बुद्धस्य सद्गुणैः शिष्यत्वं स्वीकृत्य तत्रैवातिष्ठत् ।

**प्रश्नाः**

(क) क उपदिशन् आसीत् ?

(ख) बुद्धस्य समीपे क आगच्छत् ?

(ग) लौकिकव्यवहारस्य तात्पर्यं किम् ?

(घ) वणिग्जनस्य आरोपः कः ?

(ङ) शिष्याः किमर्थं क्रुद्धा जाताः ?

(च) शिष्यो बुद्धं प्रति किमवदत् ?

(छ) युष्माकं मते वणिग्जनस्य व्यवहारः कीदृश आसीत् ?

(ज) बुद्धो गालीं ददानं वणिजं प्रत्यपि किमर्थं शान्त आसीत् ?

(झ) युष्मभ्यं यदि कश्चन गालीं ददाति चेद् यूयं किं कुरुथ ?

(ञ) कथायाः कः सन्देशः ?

## ५. प्रदत्तानुच्छेदस्य सारांशं लिखत

काकवेणी मुस्ताङमण्डलस्य प्रसिद्धं तीर्थस्थलं वर्तते । मुक्तिनाथमन्दिरस्य निकटे स्थितमिदं तीर्थस्थलं कृष्णागण्डकीमुक्तिगण्डक्योः सङ्गमोऽस्ति । मुक्तिगण्डकीं केचित् कागखोला इति नाम्ना च सम्बोधयन्ति । तत्र प्रकृतेरनुपमा शोभा दृश्यते । वृक्षवनस्पतिरहिताः पर्वताः स्वसौन्दर्येण सर्वान् आकर्षयन्ति । काकवेणी पितृतीर्थरूपेण परिचिता विद्यते । प्राचीनकाले काकभुशुण्डिनामको मुनिः मनाङमण्डलस्य तिलिचोसरोवरपरिसरे तपः कृत्वा काकवेणीमागच्छत् । ततश्च तेन समस्तपितृणामुद्धाराय तर्पणपिण्डदानादीनि कार्याणि सम्पादितानीति चर्चा शास्त्रेषु प्राप्यते । अतो हिन्दुधर्मावलम्बिनस्तत्र प्राप्य श्राद्धादीनि पितृकार्याणि सम्पादयन्ति । पुरा काकवेणीधाम्नः पार्श्वे विशालः सरोवर आसीत् । कस्मिँश्चिद् दिने काकौ तत्र पतित्वा मृतौ । तावेव काकौ अकस्माद्

हंसरूपौ सन्तौ प्रकटितौ बभूवतुः । तस्मात्कारणात् तस्य तीर्थस्य नाम 'हंसतीर्थः' इति जातम् । एवं केषाञ्चनाभिमतमस्ति । एतेन तत्र काचिद् दिव्यशक्तिरस्तीति प्रतिपादितम् । अतः श्राद्धतर्पणेच्छुका मुक्तिनाथस्य यात्रिणः पूर्वं काकवेणीं प्राप्य पितृकार्यं कुर्वन्ति, तदनन्तरं मुक्तिनाथस्य भगवतो दर्शनार्थं गच्छन्ति ।

६. **'अहिंसा परमो धर्मः' अस्य भावार्थं प्रकाशयत ।**

७. **सामाजिकसञ्जालस्य सहयोगेन लगनखेलनामके स्थाने स्थितस्य अशोकस्तूपस्य परिसरं वर्णयत ।**

८. **अधस्तनपद्यं पठित्वा शिक्षकसहयोगेन 'धन्यो गृहस्थाश्रमः' इति विषयेऽनुच्छेदमेकं रचयत**

सानन्दं सदनं सुतास्तु सुधियः कान्ता प्रियालापिनी
सन्मित्रं सधनं स्वयोषिति रतिश्चाज्ञापराः सेवकाः ।
आतिथ्यं शिवपूजनं प्रतिदिनं मिष्टान्नपानं गृहे
साधोः सङ्गमुपासते च सततं धन्यो गृहस्थाश्रमः ॥